C-0. In Public Domain. Digitization by eGangotri.Funding: MID

सरस्वतीभवन-अध्ययनमाला

(१७)

अथर्ववेदे शान्तिपुष्टिकर्माणि

डॉ० वामात्रिपाठीकृतिः

वाराणसेय-संस्कृत-विश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MI

वेद

द.नं. ५८९६२

आंशिक आ० नं० १७८

आंशिक आरक्षित

वा०क्या०पु०

अनुसन्धान

आंशिक आरक्षित

अथर्ववेदः

अनुसन्धानार्थंच

वे.अ
३२

वाल्मीकि क्याम्पस
पुस्तकालय

NEPAL

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

SARASVATĪ BHAVANA STUDIES

Vol. XVII

General Editor
Baladeva Upādhyāya
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

ATHARVAVEDA ŚĀNTIPUṢṬIKARMĀṆI

By
Dr. Māyā Mālavīyā
M. A.; Vidyāvāridhi (Ph. D.)

VARANASI
1967

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

Published by–
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

299.59215
MAL

Acc 2882

Printed by–
Ghanshyam Upadhyaya
Varanaseya Sanskrit Vishvavidyalaya Press,
Varanasi.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

आ. सं. ८६

सरस्वतीभवन-अध्ययनमाला

(१७)

अथर्ववेदे शान्तिपुष्टिकर्माणि

लेखिका सम्पादिका च

डॉ० माया मालवीया

एम० ए०, विद्यावारिधिः (पीएच० डी०)

वाराणस्याम्

१८८९ तमे शकाब्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

प्राप्तिस्थानम् :—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी—२

मूल्यम्—अष्टौ रूप्यकाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रास्ताविकम्

अथेदानीं हर्षस्यायमवसरो यत् 'अथर्ववेदे शान्तिपुष्टिकर्माणि' इत्ययं वेदविषयकः शोधप्रबन्धः संमुद्रय प्रकाश्यते। वेदसंहितानां मध्ये अर्थवसंहिता स्ववर्ण्यविषयविशिष्टतामूलकं किमपि वैलक्षण्यं भजत इति परिचितं वेदाध्यायिनां विपश्चिताम्। तत्तु वैलक्षण्यं यातुशब्देन चोद्यते। यातुकर्मणां प्रतिपादनपरोऽयं वेदोऽन्येभ्यो वेदेभ्यो हेतुनाऽनेन विभिद्यते इति विद्यते विदुषां कोऽपि समानोऽभिप्रायः, परन्तु नैष विचारः सर्वाङ्गीणतया शोभनो न वा प्रामाणिकः। अस्य शोधप्रबन्धस्य लेखिका स्वाभिमतं मतं प्रदर्शयन्ती स्पष्टं वक्ति—"यतो ह्यन्येष्वपि वेदेषु समानान्येवोदाहरणानि यातोः समुपलभ्यन्ते। अतो नायमथर्ववेदो यातुकृत्यानां प्रायः प्रचुरेण प्रसङ्गेनान्येभ्यो वेदेभ्यो विशिष्टो विभिन्नो वेति प्रदर्शयितुमेव ममास्मिन् प्रबन्धे प्रयासः" (पृष्ठे १८)। निर्व्यूढं च निपुणं तथा प्रमाणपुरस्सरं दृष्टान्तोपोद्वलितं चेदं मतं समग्रेऽस्मिन् प्रबन्धे।

अयमत्राभिसन्धिः, भारतीयायाः संस्कृते रूपद्वयं समुपलभ्यते—एका शिष्टसंस्कृतिः, अपरा च लोकसंस्कृतिः। शिष्टानां सुशिक्षितानां पुरुषाणामाचारविचारव्यवहारादीनां प्रतिपादयित्री या, सा च शिष्टसंस्कृतिः। लोकानामनधिगतशिक्षादीक्षाणामसमुन्नतचेतसां पुरुषाणामाचारव्यवहारादीनां विवेक्त्री या सा तु लोकसंस्कृतिः। इत्युभयरूपयोः पार्थक्यं समुन्नेतुं सुशकम्। अथर्ववेद एव लोकसंस्कृतेः स्वरूपं दृष्टान्तं च प्रथयति, सामान्यजनानां हृदि भूतप्रेतपिशाचादीनां नानाकार्येष्वदृष्टमपि प्रभूतं प्रभावजातं समुन्मीलयति, नित्यं सांसारिकेषु कृत्येषु रोगादिनिवारण-शत्रुविजय-सपत्नपराभव-सपत्नीविद्वेषणाद्यनेकेषु दैनन्दिनेषु कार्येषु चादृष्टरूपाया दृष्टप्रचुरसामर्थ्यायाः कृत्यायाः प्रतीकारान् दृढं वर्णयतीति विश्वासो जरीजृम्भते वेदाध्ययनसमुद्भूतविमलमतीनामपि वेदाध्येतॄणां गोष्ठीषु, परन्तु नेदं विचारसहं शोभनं मतम्। तावत्या प्रभूत्या मा भवतु, परन्तु इतरेष्वपि वेदेषु लोकसंस्कृते रूपं सर्वथैव साक्षात् क्रियते तज्ज्ञैः।

वेदेषु यद् वस्तु 'यातु'शब्देनोपवर्ण्यते, तदेव पाश्चात्यदेशे आङ्गलभाषायाम् 'मैजिक' इति शब्देन व्यपदिश्यते, परन्तु यातुकर्म नहि सर्वदा निन्दनीयमेव भवति। अथर्ववेदे ऐहिककामानां सम्पूर्तये विशिष्टा मन्त्राः संकलिता इति तु निर्विवादम्, परन्त्वत्र द्विप्रकारका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

मन्त्रा उपलभ्यन्ते। शान्तिक-पौष्टिकायुष्यादिसाधनपरा मन्त्राः प्राचुर्येण सन्निविष्टा दृश्यन्ते, परन्तु मारण-मोहनाद्यभिचारकृत्यासम्बन्धिनां मन्त्राणामपि प्राचुर्यं तत्र समुपलभ्यते। उभयविधमन्त्राणां संमिश्रणादेव वेदोऽयम् 'अथर्वाङ्गिरस'नामधेयेन सर्वत्र व्यपदिश्यते।

अङ्गिरामन्त्रः=आङ्गिरसः=अभिचारो घोरकृत्याविधिसम्पन्नः।

प्रत्यङ्गिरामन्त्रः=आथर्वणः=शान्तिपौष्टिकायुष्यमन्त्रः।

हेतुनानेनोभयविधमन्त्रसम्पत्त्या वेदोऽयं वायुपुराणे द्विशरीरशिरस्कत्वेन स्पष्टमित्थं निर्दिश्यते—

ब्रह्मवेदस्तथा घोरैः कृत्याविधिभिरन्वितः।
प्रत्यङ्गिरसयोगैश्च द्विशरीरशिरोऽभवत् ॥

(वायुपुराणे ६५।२७)

अस्मिन् पद्ये 'प्रत्यङ्गिरसयोगैश्च' इति पदस्याभिप्राय आथर्वणमन्त्र एवेति विषये हरिवंशस्य १।३।६५ श्लोकमनुरुध्य तत्रत्या नीलकण्ठव्याख्या द्रष्टव्या।

इत्थं व्यतिकरेऽथर्ववेदेऽभिचारविधीनां वैशिष्ट्यं मन्यमाना विपश्चितोऽन्येषु वेदेषु तदभावमेव संमन्वते, परन्तु शोधप्रबन्धेऽस्मिन् प्रमाणपूर्वकमेतन्निर्दिष्टं यदितरेष्वपि वेदेषु तदभावाभाव एव वरीवर्तते। लेखिकायाः पक्षोऽयं वेदनिष्णातधिषणैः पण्डितैर्निपुणं निभालनीय एव। स्वपक्षपुष्ट्यर्थं शोधप्रबन्धस्यैतस्य रचयित्री श्रीमती मायामालवीया विस्तृतस्य वैदिकवाङ्मयस्यानुशीलनं गाढं विधाय प्रचुराणि प्रमाणानि तत्तद्ग्रन्थेभ्यः समुदहार्षीदिति सा वैदिकानां धन्यवादान् आशीर्वादाँश्च ध्रुवमर्हतीति नूनं विश्वसिमि। एवंविधानामन्येषामपि वैदिकतथ्यप्रतिपादनपराणां प्रबन्धानां निर्माणे सा दत्तावधाना भविष्यतीति तामाशीर्वचनैः संयुनज्मि। शोधप्रबन्धमिमं विलिख्य 'विद्यावारिधिः' इत्याख्यो महनीयोपाधिस्तया समुपलब्ध इति तस्याः परिश्रमं वैदुषीं च मुहुर्मुहुः संस्तौमि।

केन्द्रीयविश्वविद्यालयानुदानायोगस्यार्थिकेन साहाय्येनास्य ग्रन्थस्य मुद्रणं सञ्जातमिति विश्वविद्यालयस्य पक्षेण तत्रत्येभ्योऽधिकारिभ्यः साधुवादान् वितरन् विरमामि।

वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी
मेषसंक्रान्ति सं० २०२३
१४-२-६७

श्रीबलदेव उपाध्यायः
अनुसन्धानसंस्थानस्य सञ्चालकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

आत्मनिवेदनम्

विश्वस्यागमेषु वेदाः प्राचीनतमाः, अत एव नृशास्त्रज्ञानाम्, मानवप्रकृति-अध्येतॄणां जगतो विभिन्नेषु धर्मेषु सश्रद्धं प्रवर्तमानानाञ्च जनानां सानुरागविषया इमे वेदा इति सर्वेषां विदितचरम्। भारतवर्षे पावनाः पठनीयाश्चेमे ग्रन्था आलोच्यविषयापेक्षया अर्हणीयतामेवाधि-कामाप्तवन्तः। रॉथ-वेनफे-वेवरू–मैक्समूलर-गेल्डनर-हॉग-ओल्डेनवर्ग-ह्विटनी-हिलेब्राँट-कॉलाद-ब्लूमफील्ड-ग्रिफिथ-एगलिंग-मैकडानेल-कीथप्रभृतयोऽनेके पाश्चात्त्य-विपश्चितोऽप्येतेषां सम्य-गध्ययनाय समाकृष्टा इव प्रवृत्ताः। सत्यप्यन्तरायबाहुल्ये तैरधीत्य वेदान् अस्माकं पूर्वजैरारण्यकै-र्महर्षिभिर्मुनिभिश्चादिकालादारभ्य दृष्टान् सुरक्षितांश्च वेदार्थानवगन्तुं प्रयतितम्। पाश्चात्त्या इमे विद्वांसोऽधीत्येमं वेदराशिं यद् गभीरमुल्लिखितवन्तस्तदर्थं नूनं ते श्लाघनीयाः कृतज्ञतया ग्राह्याश्च।

भारतीयानां हिन्दूनां पावनानामेतेषां ग्रन्थानामध्ययनानुसन्धानफलस्वरूपमेतैः पाश्चात्त्यै-र्विद्वद्भिर्यत् सामान्यतया स्वीकृतं तत्रैतदतिरिक्तं नास्त्यन्यत् किञ्चिद् भ्रामकं यदथर्ववेदः केवलं वशीकरणादियातुकर्मणामेव वेदः शेषाश्च स्तुतिपरा यज्ञपराश्चेति। मनीषिणां विमर्शार्थं समुपस्था-पिते प्रस्तुतेऽस्मिन् प्रबन्धे मदीयोऽयमेव प्रयासो यन्नायं निष्कर्षो निकषेण निघर्षितो रुचिरोऽङ्गी-कार्यश्च तिष्ठति, प्रत्युत सारतः सिद्धान्ततश्चाथर्ववेदोऽपि शेषैरन्यैर्वेदैस्तुल्य एवेति। तत्र सर्वेषां वेदानां सम्यगध्ययनेनालोचनेन चेदं स्पष्टमवगम्यते यत्परम्परया अङ्गीकृता अथर्ववेदस्य शान्ति-पुष्ट्यादिविषया अन्येष्वपि वेदेषु समानमेवोपलभ्यन्त इति न शान्तिपुष्ट्यादिविषया अथर्व-वेदस्यैव केवलार्था इति।

चत्वारोऽपि वेदाः साधारण्येन मन्त्रब्राह्मणयोर्द्वयोर्भागयोर्विभक्ताः। वेदपदवाच्याः संहितारूपा एव वेदा इति नास्ति भारतीयपरम्परानुरूपो न्याय्यश्च विचारः। तत्र ऋग्वेदस्य, सामवेदस्य, शुक्लयजुर्वेदस्याथर्वणश्च मन्त्रभागाः संहितापदवाच्याः, किन्तु कृष्णे यजुर्वेदे संहिताया-मथवा ब्राह्मणे मन्त्रा ब्राह्मणानीत्येतावुभावपि सम्मिलितौ वर्तेते। प्रस्तुतेऽस्मिन् प्रबन्धेऽत एव मया संहिता ब्राह्मणमित्युभावप्याश्रित्य निदर्शनानि प्रदर्शितानि।

वेदेषु शान्तिपुष्ट्यभिचारविषयः सविशेषं कर्मकाण्डसम्बद्धोऽत एव वेदानां प्रायशो ज्ञानकाण्डात्मकावारण्यकोपनिषद्भागौ नात्र मया गृहीतौ विचाराय। यद्यपि मूलमाधृत्यैव मया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

खितो ह्येष प्रबन्धः, तथापि सौकर्यार्थं कुत्रचनाधृतोऽप्यनुवादः प्रामाणिकानां पाश्चात्त्यानां ग्रिफिथ-ह्विटनी-एगलिंग-कीथ-कालँदेत्यादीनामेव गृहीतः। किन्तु तैत्तिरीय-सामविधान-गोपथब्राह्मणानामाङ्ग्लानुवादाभावाद् गुरुमुखाद् ज्ञातार्थ एवाधारीकृतः।

सम्पूर्णोऽयं निबन्धः सप्तसु भागेषु विभक्तः। तत्र प्रथमेऽध्याये यातोर्धर्मस्य च प्रतिपाद्यभूतस्यार्थस्य विशदं विवेचनं कृत्वा अथर्ववेदे के के विषया इत्यपि प्रतिपादितम्। पुनस्तदग्रिमेषु पञ्चस्वध्यायेषु विभिन्नानां वेदसंहितानां ब्राह्मणानाञ्च यातुसम्बधिनां कर्मणामुल्लेखो निदर्शनत्वेन कृतो विद्यते। उपसंहारे च स्वकीयाध्ययनस्यानुसन्धानस्य च निष्कर्षभूतमुल्लिख्य पाश्चात्त्यानां विदुषां धर्मविषयके यातुविषयके च विचारे एतदनुसन्धानफलस्वरूपमपेक्षितं संशोधनमपि प्रस्तुतम्।

अथर्ववेदसंहितायाः व्याख्यानभूमिकायां श्रीमान् वेदशास्त्रविचक्षणः सायणाचार्योऽथर्ववेदस्य विषयांस्तथाऽऽथर्वणस्य पुरोधसः कर्तव्यांश्चोपवर्णयन्ननेकेषां ग्रन्थानां लेखकानाञ्चोद्धरणमदात्तत्राहमस्मि "शान्तिपुष्ट्यभिचाराः" अथर्ववेदस्य विषया इति श्रीकुमारिलभट्टोक्तं गृहीतवती। यतो ह्यभिचारस्य प्रयोग आत्मनो रक्षार्थं क्रियतेऽतोऽस्य सन्निवेशो मया शान्त्यन्तर्गतः कृतः। सायणाचार्यैरप्युद्धृतः कामन्दकः स्वकीये नीतिसारनाम्नि ग्रन्थे चतुर्थाध्याये ३१ श्लोके उक्तवान्—

त्रय्यां च दण्डनीत्यां च कुशलः स्यात् पुरोहितः।
अथर्वविहितं कर्म कुर्याच्छान्तिकपौष्टिकम्॥

अत्र गणनायां यद्यपि शान्तिशब्दस्य पूर्वप्रयोगः, किन्त्वन्येषु ग्रन्थेषु योगक्षेमक्रमानुसारमथवा 'शं' 'यु' इति क्रममनुसृत्य पूर्वं पुष्टिप्रयोगास्तदनन्तरं च शान्तिसम्बद्धाः प्रयोगाः, यतो हि पुष्टिर्भावात्मिका शान्तिश्चाभावात्मिका। कामन्दकः कथं पूर्वं शान्तिं न्यगृह्णादनन्तरं च पुष्टिमित्यत्रायं हेतुः प्रतीयते यदन्तरायभूताया अशान्तेर्निराकरणे जाते शान्तावेव पुष्टेः प्ररोहः संभूयत इति।

यद्यपि याथार्थ्येन शान्तिपुष्ट्योः स्पष्टं विभिन्नोद्देश्यकत्वम्, तथापि बहुषु प्रयोगेषु विशेषत आयुष्य-स्त्री-राजकर्मसु द्वयोरभेदेन ग्रहणं दृश्यते।

महदिदं सौभाग्यं मदीयं यदस्माकं श्रद्धेया निर्देशकमहाभागाः श्रीक्षेत्रेशचन्द्रचट्टोपाध्यायाः सततमविगणय्य स्वकीयमसौविध्यं परमेण वात्सल्येन मामनुगृह्यासमाप्ति मार्गं निर्दिशन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

संशोधनञ्च कुर्वन्तो दुर्लभग्रन्थप्रदानेन चानुगृह्णन्तो महान्तं साहाय्यमाचरितवन्त इति तेभ्यो भूयो भूयः प्रणमामि ।

अहं श्रीसुभद्रझा-महाभागानाम् (अध्यक्ष, सरस्वतीभवन पुस्तकालय, वा० सं० विं० वि० वाराणसी) तथा तेषां सहायकानामप्यत्यन्तमनुगृहीतास्मि ये न केवलं काले काले आवश्यकानि पुस्तकानि शीघ्रं प्रदत्तानि, अपि तु यथावसरं ममोत्साहवर्धनाय स्वीयान्युत्साहवचनान्यपि श्रावितानि, येनास्माकं लेखनादिकार्येष्वावश्यिका प्रगतिः समुत्पन्ना ।

अन्ते श्रीबलदेव-उपाध्यायमहाभागानाम् (संचालक, अनुसन्धानसंस्थान, वाराणसेय संस्कृतविश्वविद्यालय, वाराणसी) प्रत्याभारं प्रकटयन्ती विरमाम्यहम्, येषां प्रयत्नेनायं प्रबन्धः शीघ्रं मुद्रितः ।

५६२ महामना मालवीय नगर
इलाहाबाद
मेषसंक्रान्ति
१४-४-६७

मायामालवीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

सङ्केत-सूची

अ० वे० सं०	...	...	अथर्ववेदसंहिता
आश्व० श्रौ० सू०	...	...	आश्वलायन-श्रौतसूत्रम्
आ० सं०	...	...	आरण्यकसंहिता
ऋ० वे० सं०	...	...	ऋग्वेदसंहिता
ऐ० ब्रा०	...	...	ऐतरेयब्राह्मणः
कौ० सू०	...	...	कौशिकसूत्रम्
गो० ब्रा०	...	...	गोपथब्राह्मणः
ता० ब्रा०	...	...	ताण्डयब्राह्मणः
तै० ब्रा०	...	...	तैत्तिरीयब्राह्मणः
तै० सं०	...	...	तैत्तिरीयसंहिता
पं० विं० ब्रा०	...	...	पञ्चविंशब्राह्मणः
मा० सं०	...	...	माध्यन्दिनवाजसनेयिसंहिता
मै० सं०	...	...	मैत्रायणी-संहिता
श० ब्रा०	...	...	शतपथब्राह्मणः
ष० विं० ब्रा०	...	...	षड्विंशब्राह्मणः
स० वि० ब्रा०	...	...	सामविधानब्राह्मणः
सा० वे० सं०	...	...	सामवेदसंहिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

विषय-सूची

विषयः	पृष्ठ-संख्या
प्रास्ताविकम्	क—ख
आत्म-निवेदनम्	ग—ङ
सङ्केत-सूची	च
प्रथमोऽध्यायः	१-२३
अथर्ववेदः	१-६
यातुः	६-११
धर्मः	११-१४
वेदेषु यातुः	१४-१८
अथर्ववेदसंहिताया विषयाः	१८-२३
द्वितीयोऽध्यायः	२४-६०
ऋग्वेदसंहितायां यातुसामग्री	२४-३५
ऐतरेयब्राह्मणे यातुसामग्री	३५-५०
कौषीतकिब्राह्मणे यातुसामाग्री	५०-६०
तृतीयोऽध्यायः	६१-८९
तैत्तिरीयसंहितायां यातुसामग्री	६१-७७
तैत्तिरीयब्राह्मणे यातुसामग्री	७७-८६
चतुर्थोऽध्यायः	९०-११९
माध्यन्दिनसंहितायां यातुसामग्री	९०-९६
शतपथब्राह्मणे यातुसामग्री	९६-११६
पञ्चमोऽध्यायः	१२०-१४४
सामवेदसंहितायां यातुसामग्री	१२०-१२१
पञ्चविंशब्राह्मणे यातुसामग्री	१२१-१३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

षड्विंशब्राह्मणे यातुसामग्री	१३३-१३६
सामविधानब्राह्मणे यातुसामग्री	१३६-१४२
मन्त्रब्राह्मणे यातुसामग्री	१४२-१४४
षष्ठोऽध्यायः	१४५-१६८
अथर्ववेदसंहितायां यातुसामग्री	१४५-१६७
गोपथब्राह्मणे यातुसामग्री	१६७-१६६
सप्तमोऽध्यायः	१७०-१७२
उपसंहार	१७०-१७२
पठितग्रन्थानां सूची	क—ङ
शब्दानां सङ्केताः	च—छ
अनुक्रमणिका	झ—ञ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

द.नं. ५९६६२
आंशिक आ०नं०
आंशिक आरक्षित
वा०व्या०पु०
अथर्व वेद.
अनुसन्धानार्थ

अथर्ववेदे शान्तिपुष्टिकर्माणि

आंशिक आरक्षित

प्रथमोऽध्यायः

अथर्ववेदः

ऋग्यजुःसामाथर्वाख्याश्चत्वारो वेदाः सन्तीति सुविदितमेव। तत्रैतेष्वाद्यास्त्रयो वैदिकं यज्ञियं धर्ममनुसृत्य प्रवृत्ता इत्यपि परम्परातोऽनुसृतम्। तथा च ऋग्वेदो होतुः पुरोधसस्तदनुयायिनाञ्च धर्ममाख्याति, यजुर्वेदोऽध्वर्योः पुरोधसस्तदनुयायिनाञ्च धर्ममथ च सामवेद उद्गातुः पुरोधसस्तदनुवर्त्तिनाञ्चेति। प्रथमं तावत् परमार्थतो मूलरूपेण त्रय एवैते वेदाः प्रतीता अभूवन्नित्थं मैकडानलः स्वीये संस्कृतसाहित्येतिहासे १८५ पृष्ठे प्रतिपादयति—ऋक्सामाथ यजुर्वेद इति त्रय एवैते वेदा वैदिकसङ्ग्रहाः; यत एत एव महता यज्ञियेनानुष्ठानेन संस्कारेण च सम्बद्धाः, अथर्ववेदस्तु तत्त्वतोऽसम्बद्धः, एतेनान्तिमाध्यायवर्जं यच्च स्फुटमेव यज्ञियेन विधिनाऽस्य सम्बन्धमाख्यातुं सम्बद्धः। एतेनैव हेतुना संभवतो वेदानाम् 'त्रयी' इत्याख्या परम्परया समजनि। वेदेष्वथर्वणः परिगणनं पश्चात्कालिकमेव। तथाहि छान्दोग्योपनिषदि विद्यानां वर्णनप्रसङ्गे—

"ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳराशिं देवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳसर्पदेवजनविद्यामेतद् भगवोऽध्येमि" इत्युक्तम्। तत्र ऋग्यजुःसामभिः साकं वेदशब्दस्य प्रयोग उपलभ्यते, नाथर्वणः। एवमनुक्रमे पञ्चमत्वेन परिगणितयोरितिहासपुराणयोरपि विषये वेदशब्दस्यासम्प्रयोगः। तत्राथर्वणो विषयेष्वन्यसंहितातस्तत्त्वतो भेदो दृश्यते। अत एव भारतीयपरम्परामनुसृत्यास्याथर्वणो विषये महिम्नस्तोत्रस्य सप्तमश्लोकव्याख्यावसरे प्रस्थानभेदरूपेण मधुसूदनसरस्वत्या, कौशिकसूत्राणां ब्लूमफील्डस्य संस्करणे ३०७ पृष्ठे केशवेन च स्वव्याख्यायाम् "शान्तिकपौष्टिकाभिचारिकाद्भुतानि कर्माणि संहिताविधावुक्तानि" इत्युल्लिखितम्। ततश्च स्पष्टमेवायमथर्वा शान्तेः पुष्टेः शत्रूणामुच्छेदादेश्च विषयमुपवर्णयति। सायणाचार्योऽप्यथर्वव्याख्यायाम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

"पौरोहित्यं शान्तिकपौष्टिकानि राज्ञामथर्ववेदेन कारयेद् ब्रह्मत्वञ्च" इत्युल्लिख्य विष्णुपुराणोक्तमुद्धरति—

शान्तिपुष्ट्यभिचारार्था एकब्रह्मर्त्विगाश्रयाः।
क्रियन्तेऽथर्ववेदेन त्रय्येवात्मीयगोचराः॥

इत्थं नृपाणां निखिलं पौरोहित्यं शान्तिकर्माणि पुष्टिकर्माणि चाथर्ववेदायत्तानि, तथा यज्ञीयब्रह्मणोऽपि सर्वो विधिरथर्वोक्तदिशा विधेय इति समायाति।

यूरोपीया विद्वांसोऽथर्वणं यातुकर्मणामभिचारादीनाञ्च कृते सर्वोत्तमं वेदं स्वीकुर्वन्ति। आधुनिका भारतीयाश्च विद्वांसः सामान्यरूपेणेमामेव विचारसरणिमनुसरन्ति। तथा च ए० ए० मैकडानेलमहोदयोऽथर्वणो विषय इत्थमाख्याति--साकल्येन अयमथर्वा विभिन्नजातीयानां मन्त्राणां सङ्ग्रहरूपः। अस्य मुख्यं विधेयमभिचारादिकर्म। यतोऽयं रोगाणां घातकपशूनां भूतप्रेतादीनां शत्रूणां ब्राह्मणोत्पीडकानाञ्च प्रतिपन्थिनां कर्मणां विरोधाय विनाशाय चोपदिशति। किन्त्वत्र बहवो मन्त्राः शुभावहा अपि सन्ति। यथाहि--पारिवारिके ग्रामीणे च जीवने सौमनस्यं समाधातुम्, शत्रून् विनाशयितुम्, दीर्घायुष्प्रमवाप्तुम्, स्वास्थ्यमैश्वर्यञ्चाधिगन्तुमत्राथर्वणि मन्त्राः सन्ति। एतदतिरिक्तं यात्रायां सुरक्षार्थं द्यूते विजयार्थञ्चाप्यत्र मन्त्रा विद्यन्ते। इत्थमयमथर्वा शान्त्यर्थं पुष्ट्यर्थं शापार्थञ्चापि मन्त्राणामुल्लेखं समाचरन् स्वीयं द्विविधं रूपं प्रस्तुतीकरोति। विण्टरनित्जमहोदयो वेदमिममथर्वाणमथवा यात्वभिचारकर्मणां ग्रन्थं मनुते। सर्वानिमान् विचाराननुसरन् भारतीय इतिहासवेत्ता श्री आर० डी० बैनर्जी कथयति यदथर्वो वेदो यातुकर्मकाणां मन्त्राणां निधानमस्तीति।

अथर्वणो वेदत्वेऽङ्गीकृते गोपथब्राह्मणेन वैतानसूत्रेण चास्याथर्वणः सम्बन्धो वैदिकैर्विधिभिः संस्कारैश्च संस्थापयितुमुक्तं यद् वेदोऽयं पुरोहितस्य ब्रह्मणस्तथा तत्सम्बन्धि कर्तव्यञ्चोपदिशति। उदात्तान्तो 'ब्रह्मा'शब्द आद्युदात्तात् 'ब्रह्मन्'शब्दान्निष्पन्नः। अतोऽनेके पाश्चात्या विद्वांसोऽथर्ववेदो यातुकर्मणां वेदोऽस्तीति मन्यमानास्तथाथर्ववेदिनामुपर्युक्तं पूर्वाग्रहं दृष्ट्वा 'ब्रह्मन्'शब्दो यातुकर्मसम्बद्ध इति वदन्ति।

'ब्रह्मन्'शब्दस्य तात्त्विकमर्थं विमृशद्भिर्बहुभिर्विद्वद्भिर्बहवो विचाराः समुपस्थापिताः सन्ति। श्रीगङ्गानाथझामहोदयानामभिनन्दनग्रन्थे (पूना १९३७) हर्टलचार्पेन्टियर-डुमेजिलनामकानां विदुषां विचाराणां समीक्षां कुर्वन् डा० ए० बी० कीथमहोदय एकस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

निबन्धे कथयति यद् 'ब्रह्मन्'शब्द उद्गातुः प्रार्थनापरो न तु मन्त्रपरः; तथौपनिषदस्य पूर्णस्य नित्यस्य ब्रह्मणः प्रार्थनायाश्च मध्ये पवित्रतैव परस्परं नियामकः सम्बन्धः। अत्रेदं विशेषतोऽवधेयं यदुपनिषत्सु प्रयुक्तो 'ब्रह्मन्'शब्दः पूर्णस्य शाश्वतस्य च ब्रह्मणो द्योतकः।

ऋग्वेदे 'ब्रह्मन्'शब्द उद्गातुः प्रार्थनापर इति कीथमहोदयप्रतिपादितमर्थमेव तत्रभवन्तः श्रीक्षेत्रेशचन्द्रचट्टोपाध्यायमहाभागा नवमे निखिलभारतीयप्राच्यविद्यासमारोहावसरे वेदविभागस्याध्यक्षपदमलङ्कुर्वन्तोऽङ्गीकृतवन्तः, किन्तु शृङ्खलासन्धिविषये तेषां तत्र वैमत्यम्। तैर्हि तत्रैवं प्रत्यपादि यद् वैदिकर्षीणां स्वमन्त्रशक्तौ दृढविश्वास आसीत्। कालान्तरे एते मन्त्रा एकस्या महाशक्तेः पदमप्राप्नुवन्। यदा दार्शनिकीं विचारसन्ततिं संसरन्तो जना एकं सृष्टिकर्तृत्वरूपं महत्तत्त्वं प्रतिपादितवन्तः, क्रियाविधिज्ञाः स्वीयं ब्रह्मतत्त्वं तेन महत्तत्त्वेन समीकृतवन्तः। इत्थम् 'शक्तिः' न त्वभिचारो यातुः पवित्रता वा प्रार्थनायाः प्राचीनेऽभिप्राये उपनिषदां सृष्टिकर्तृत्वरूपेऽर्थे च शृङ्खलासन्धिः।

'ब्रह्मन्'शब्दो वृद्ध्यर्थकबृहिधातोः 'बृंहति, वर्धते' इति वार्थमादाय निष्पन्नः। एवं 'ब्रह्मन्'शब्दो वृद्धिं देवस्य प्रशंसनं प्रार्थनञ्च द्योतयति। प्रार्थनाभिप्रायक एव 'ब्रह्मन्'शब्दः क्रमशः पूर्णब्रह्मवाचकः समजनि। विवेचनेनानेनैतत्स्पष्टं प्रतीयते यदाद्युदात्तो 'ब्रह्मन्'शब्दो यदा ब्रह्मा इत्यन्तोदात्तो जातस्तदा तस्यार्थ उद्गाता पुरोधा इति संवृत्तः, न तु यातुविदिति। ब्रह्मवेद इत्यर्थस्तु पश्चात्कालिकोऽथर्वसम्बद्धश्च। गोपथब्राह्मणे वैताने सूत्रे च विशेषोक्तावपि नायं वेदो वस्तुतः पुरोधसो ब्रह्मणः कृत्यैः कर्तव्यैश्च संवादं भजते। 'होता अध्वर्युश्चोद्गाता' इत्येते त्रयः पुरोधसः स्वीयानि कृत्यानि त्रिषु वेदेष्वेकस्य साहाय्येन सम्पादयन्ति, किन्तु ब्रह्मा त्रयाणामपि वेदानां माध्यमेन स्वीयं कृत्यं समपादयत्, तथा त्रयाणां विषये सर्वं व्यजानाच्च। तस्य स्वीयो विशेषः कोऽपि वेदो नाभूत्। तथा चोक्तमृग्वेदे—"ब्रह्मा त्वो वदति जातविद्याम्" (१०-७१-११)।

सायणाचार्यस्याथर्वभाष्यभूमिकायामप्यैतरेयब्राह्मणस्यायमंशो द्रष्टव्यः—

"यद् ऋचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति। अथ केन ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयात्" इति।

ऋग्वेदेन होता करोति, सामवेदेनोद्गाता, यजुर्वेदेनाध्वर्युः, सर्वैर्ब्रह्मा इति।

अथर्ववेदोऽभिचारमन्त्राणां यातुकर्मप्रयुक्तानाञ्च मन्त्राणामेव वेद इति कथनं नैव न्याय्यम्। अत्र खलु वर्तते पर्याप्तमध्यात्मं विश्वोत्पत्त्यादिविषयकञ्च वर्णनम्। यत्तूच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यदेतत्सर्वं त्वस्य वेदस्य गौणत्वेनाङ्गभूतमिति तदपि न साम्प्रतम्। इतिहासस्य विश्रुतः पाश्चात्यो विपश्चिद् विण्टरनित्जमहोदयः कथयति—

[1]"बहवो नितान्तं गभीराः परमार्थतो दार्शनिकाश्च विचारधाराः प्रसङ्गात् प्रस्फुटीभवन्ति वेदस्यास्य गूढेषु मन्त्रभागेषु"। इयमथर्वसंहिता सर्वप्रकारकेषु विषयेषु वस्तुषु च जगत्सृष्टिसम्बन्धिसामर्थ्यं संक्रामयति।

ब्लूमफील्डमहोदयवचनानुसारं 'सव'सूक्तेषु दक्षिणात्वेन समर्पितः प्रत्येकं पशुर्युगपदेव यज्ञियः पशुर्वैश्वदेवोऽद्वैतश्च[2]।

अस्योदाहरणानि ४,११, १४; ६,४, ५, ७ इत्यादि, तथा ४.३४, ३५; ११, १; १२.३, इत्यत्रापि द्रष्टव्यानि। ब्रह्मौदनं सर्गसिद्धान्तः, (११.७) ब्रह्मौदनोच्छिष्टं जीवानामुत्पादकः, वेदाः, यज्ञाः, प्राणः, अपानः, देवाः, पितरः सर्वमेतत्तत्रोपपादितम्। १०.१० इत्यत्र 'वशेदं सर्वमभवद् देवा मनुष्या असुराः पितर ऋषयः। वशा गौः सर्वेषां वस्तूनां जननी परमा शक्तिश्च समुपवर्णिता।

१०-७-८ इत्यत्र स्कम्भस्य सर्वाधारस्यात्मनोऽतीव माहात्म्यमुपवर्णितं विद्यते। तद्यथा— "स्कम्भ इदं विश्वं भुवनमाविवेश, स्कम्भे सर्वं प्रतिष्ठितम्। स्कम्भः सर्वाणि वस्तूनि सन्धारयति"। एवमेव १०-८-४४ इत्यत्र ब्रह्मण आत्मनश्च ज्ञानमौपनिषद्या पद्धत्योपक्रान्तं मनुष्यजीवनस्य चरमलक्ष्यत्वेन चैतयोः परिगणनं कृतम्—"यो ह्यात्मानं विजानाति सोऽभयो विमुक्तश्च भवति"। त्रयोदशं काण्डं तु समग्रमेव रोहितस्य सूर्यस्य प्रशंसनपरम्। एवमेवैकादशे काण्डे चतुर्थे सूक्ते प्राणस्य माहात्म्यमुपदर्शितम्। यत्र प्राणस्य ब्रह्मरूपत्वं मूर्तत्वञ्चोपपादितम्— "प्राणाय नमो यस्य सर्वमिदं वशे, यो भूतः सर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितम्"। अत्रैवात्मनोऽपि भावना समुपस्थापिता विलोक्यते। पञ्चदशे काण्डे व्रात्यस्य विश्वोत्पत्तिशक्तिसंयुतत्वम्, तथा १९.५३, ५४ इत्यत्र कालो विश्वस्य सर्वातिशायिनी शक्तिरित्युपपादयन् कालः सर्वेषां प्रभुरिति प्रदर्शितम्—

काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्।
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापते॥

(१९.५.८)

१. ए हिस्ट्री ऑफ इण्डियन लिटरेचर, वाल्युम १, पृ० १५०।

२. अथर्ववेद, १८९९, पृ० ९०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

अध्यात्मस्य जगत्सर्गस्य चोपरिनिर्दिष्टैरसंख्यातैः प्रसङ्गैः सह पुंसवन-जातकर्म-नामकरण-गोदान-उपनयन-विवाहादि[१]सम्बन्धिनोऽपि मन्त्रास्तत्र बहुत्र समुपलभ्यन्ते। यथैवान्येषु वेदेषु संस्कारादिसम्बन्धिनो मन्त्रास्तथैवात्रापि वर्तन्ते।

५,१२ तथा ५,२७ इति द्वे 'आप्रीसूक्ते' पशुबन्धकर्मणि वैताने सूत्रे (१०.११) प्रयुक्ते विद्येते। ६,४७ तथा ४८, वैतानसूत्रस्य २१,७ इत्यत्र त्रिसवनीये कर्मणि सामान्येऽग्निष्टोमे प्रयुक्ते। ७,७३ इत्यत्राश्विने उष्णं दुग्धं प्रयच्छतः पुरुषस्य प्रार्थना अश्विनं प्रति। ७,९७ इत्यत्र यजुषो मन्त्रा विधयश्चाग्निमिन्द्रादिकञ्चोद्दिश्योल्लिखिताः। ७.२७ इत्येको मन्त्र इडायाः प्रार्थनापरः—

इडैवास्माँ अनुवस्तां व्रतेन यस्याः पदे पुनन्ते देवयन्तः।
घृतपदी शक्वरी सोमपृष्ठोपयज्ञमस्थित वैश्वदेवी॥

एवमेवाष्टाविंशतितमे मन्त्रे यज्ञियास्त्रं द्रुघणं परशुञ्चोद्दिश्योक्तम्—

वेदः स्वस्तिर्द्रुघणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्ति।
हविष्कृतो यज्ञिया यज्ञकामास्त देवास्ते यज्ञमिमं जुषन्ताम्॥

सप्तमकाण्डस्य त्रिंशो मन्त्रोऽञ्जनकार्यार्थं प्रयुक्तः, तथा सप्तमकाण्डस्याष्टनवति-संख्याको मन्त्रो बर्हिषोऽञ्जनार्थञ्च प्रयुक्तः। ७,९९ मन्त्रो वेदिनिर्माणार्थम्, ७,३३ प्रोक्षणार्थं तथा ७,७१ पर्यग्निकार्याद्यर्थं प्रयुक्तः।

एतदतिरिक्तं तत्र बहवो मन्त्राः केवलं प्रार्थनापरा अपि विद्यन्ते, यथा ११, ७, ८, ३१; २;५, ६; ३.१६ इत्यादि। सर्वेऽप्येते मन्त्रा विभिन्नेषु संस्कारेषु विभिन्नैरुद्देश्यैः कौशिकसूत्रे प्रयुक्ता दृश्यन्ते। तत्र सप्तमकाण्डस्थस्त्र्यशीतितमो (७-८३) मन्त्रो विशेषतो विलोकनीयः; यो हि मन्त्रो नरस्य कुष्ठरोगाक्रान्तस्य कुष्ठरोगमोचनार्थं परम्परया प्रयुज्यते, किन्तु तत्र मन्त्रभागे कुत्रापि कुष्ठस्य चर्चा न विद्यते; तत्र साधारणतया देवो वरुणः प्रार्थितः प्रार्थयितारं पापाद् बन्धनाच्च मोचनार्थम्। तत्र ऋग्विधानेऽप्येवं प्रयोगः—ऋग्वेदिनां संस्कारविधौ व्यक्तिगत-मुद्देश्यं पूरयितुं प्रयुक्ता ऋचो मन्त्राश्चैवंविधा दृश्यन्ते यत्र मूलतो मन्त्रभागे तेषामुद्देश्यानां नास्ति चर्चा।

तत्रैवंविधा अपि ऋचः समुपलभ्यन्ते, याभिर्विशेषोद्देश्यपूर्त्यर्थं हविः प्रदीयते। उदाहर-णार्थम् १,१५;२,२६ तथा १९.१ ऋचो विलोकनीयाः, याः खलु सांश्राय्यहविषा सम्बद्धाः,

---

१. ३, २३; ८'२; २; २८; ११, ५, ३; का० १४ इत्यादि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यैर्दत्ताभिर्हविर्भिः समग्राः सम्पदो वर्धन्ते। ६,३६ यशोहविषा सम्बद्धा येन हविःप्रदानेन यशो वर्धते। ६,४० सप्तर्षीणां हविः; ६,६४ समानं हविः, येन साम्मनस्यं सञ्जायते। ६.६५, ६.६६ नैर्हस्त्यं हविः, येन हविःप्रदानेन शत्रोर्नैर्हस्त्यं सञ्जायते। ६.७५ नैर्बाध्यं हविः, येन सपत्नक्षयः सञ्जायत इत्यादि।

यातुः

आङ्गलभाषायां मैजिकशब्देन व्यवह्रियते, तत्र पाश्चात्यविदुषां मतमुद्दिश्य किञ्चिद् विचार्यते।

अथर्ववेदो यातुकर्मणां सर्वातिशायी वेदोऽस्ति न वेति विचारणात् पूर्वं 'यातुकर्म' इत्यस्य कः स्पष्टार्थ इति विवेचनमावश्यकम्। आङ्गलभाषायामयं शब्दः 'मैजिक'इति शब्देन व्यवह्रियते। तत्र पाश्चात्यविदुषां मतमुद्दिश्य किञ्चिद् विचार्यते।

मैजिकशब्दो मूलतो विदेशीयः। Magica इति ग्रीकभाषायाः, Magia इति लातीनभाषायाः शब्दोऽस्य निष्पत्तेर्मूलम्। अस्य शब्दस्य मूलार्थो धर्मः, ज्ञानम्, 'मागी' (Magi) इत्याख्यया प्रसिद्धानां पारसीकानामथवा जरथुस्त्र (ZOROASTER) मतावलम्बिनां पुरोधसां रहस्यान्विताः क्रियाश्च सन्ति। 'मागी'संज्ञकाः पारसीका एव जरथुस्त्राणां पुरोहितत्वेन पाश्चात्यैर्विज्ञाता इति एल्० एच० ग्रे-महाशयेन उल्लिखितम् (ERE, vol. 8, पृ. २४३) भविष्यपुराणे बृहत्संहितायाञ्च वर्णिता मगाः संभवतः पारसीकदेशात् समागताः, इमे 'मागी'वाच्या अभूवन्निति (ERE, vol. 8, पृ. २४५)।

मरे Murray महाशयस्य New English Dictionary नवीनाङ्गलकोषे 'मैजिक'शब्दस्यार्थोऽधोलिखितरूपेण प्रदर्शितः[१]—

घटनाचक्रं प्रभावयितुं तथापूर्वमिव कञ्चन पदार्थं दृग्गोचरीकर्तुं सा छद्मकला। या हि क्रियाविधिनाऽमूर्त्तानां जीवानां हस्तक्षेपेण साफल्यं भजते, अथवा प्रकृतिं निगृह्य किञ्चिद् रहस्यमुद्भावयति।

सर जेम्स जार्ज फ्रेजर Sir James George Frazer महाशयानुसारं 'मैजिक'-शब्दार्थः—साधर्म्यचमत्कारः, यो द्वयोः सिद्धान्तयोरुपर्याधृतः। प्रथमस्तावत् समानः समानमुत्पादयति, अथवा कारणगुणाः कार्यमाश्रयन्त इति; द्वितीयस्तावत्—प्रथमं परस्परं संगतानां पदार्थानां दूरत्वेन जातेऽपि विच्छेदे परस्परं प्रतिक्रिया भवत्येवेति[२]।

१. प्रिमिटिव रिलिजन, रॉबर्ट० एच० लोवी०, अध्याय ६, पृ० १३६, संस्करण १९२५।

२. गोल्डेन बाउ, एब्रिज्ड एडिशन, १९२३, पृ० ११।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: Mi

फ्रेजरमहाशयानुसारमिमौ द्वौ सिद्धान्तौ भावानां संसर्गस्य द्वौ भ्रमात्मकप्रयोगावेव, न किञ्चिदन्यत्। अनयोः पूर्वस्मादर्थात् समानात् समानोत्पत्तिरिति सिद्धान्ताद् यातुधानः परिकल्पयति, यत् स कमपि प्रभावं कार्यं वा समुत्पादयितुं समर्थो भविष्यति, केवलमनुकरणमात्रेण द्वितीयस्मात् सः परिकल्पयति, यत् स यत् किमपि यं कञ्चन भौतिकं (मूर्तम्) पदार्थमाश्रित्य करोति तत्सर्वं तन्मूर्त्तं व्यक्तिं वा तद्रूपमेव प्रभावयिष्यति, येन सह पूर्वं तत्संसर्गः शरीराङ्गत्वेनाशरीराङ्गत्वेन वासीत्। साधर्म्यं समानताञ्चाश्रित्य स्थितः 'मैजिकः' होम्योपैथिक इत्याख्ययाभिहितः, तथा सान्निध्यं संसर्गं वाश्रित्य स्थितो मैजिकः 'कन्टेजस्' (संसर्गजः) इत्यभिहितः। फ्रेजरमहोदयः कथयति यद् होम्योपैथिकमैजिके इयं तावद् भ्रमात्मिका कल्पना यत् समाने द्वे वस्तुनी तद्रूपे एव भवतः। 'कन्टेजस्' अर्थात् संसर्गिमैजिके इयं तावद् भ्रमात्मिका कल्पना यत् कदाप्येकस्मिन् काले संयुक्तः पदार्थः सदा संयुक्त एव तिष्ठति[1]।

'होम्योपैथिक' तथा 'कण्टेजस्' इमे द्वे अपि यातुकर्मणी (मैजिक) "संवेदनात्मकं यातुकर्म" (सिम्पैथेटिक् मैजिक्) इति नाम्ना सौविध्येन सहैव व्यवहर्तुं शक्येते। यतो हि द्वयोरप्येतयोरयमन्तर्भूतः सिद्धान्तो यद् विच्छेदेऽपि समाने द्वे वस्तुनी परस्परं प्रतिक्रियामनुभवतः। एकमपरस्य प्रभावोऽदृश्यसंवेदनतत्त्वेन संभवति। आधुनिकैर्वैज्ञानिकैरपि द्वयोर्मूर्तयोः पदार्थयोः परस्परं सम्बन्धः प्रभावश्च 'ईथर'शब्देन वाच्यमाकाशसिद्धान्तमङ्गीकृत्य क्रियते, येन दूरस्थयोरपि द्वयोर्मूर्तयोः परार्थयोर्मध्ये शून्यत्वेन प्रतीतेऽपि स्थानेऽदृश्यस्य पदार्थस्य महिम्ना सम्बन्धः सञ्जायते[2]।

फ्रेजरमहोदयस्य 'गोल्डेन बाउ' नामकात् पुस्तकादत्र द्वयोरपि यातुकर्मणोरेकैकमुदाहरणं प्रासङ्गिकमेव स्यात्। तथाहि—उत्तरी-अमेरिकास्थानस्थो भारतीयो यदा स्वशत्रुमुत्पीडयितुं तस्याकृतिं प्रतिकृतिं वा भूमौ वालुकायां भस्मनि वा समुल्लिखति, अथवा शत्रुसमानां काञ्चनाकृतिं मूर्तं पदार्थं वा गृह्णाति, तथा तत्र तीक्ष्णेन दण्डेन तोदयति, तदायम् "समानेन समान उत्पद्यते" इति होम्योपैथिकमैजिकस्योदाहरणमुपस्थापयति। ईदृग्विधं यातुकर्म सुखप्रसवार्थम्, सन्तत्यवाप्त्यर्थम्, भोजनावाप्त्यर्थम्, रोगानपाकर्तुं सङ्ग्रामे विजयाद्यर्थञ्च क्रियते। तथा संसर्गियातुकर्मणः (कंटेजस् मैजिक) उदाहरणं मूषिकानां बिले पुनर्जायमाना मे दन्ताः पूर्ववत् स्निग्धाः

१. तस्मिन्नेव ग्रन्थे, पृ० १२।

२. तस्मिन्नेव ग्रन्थे, पृ० १२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

सुदृढाश्च भवेयुरिति बुद्ध्या भग्नानां दन्तनां प्रक्षेपः। इत्थमेव संवेदनात्मकः सम्बन्धः (सिम्पैथेटिक् कनेक्शन्) मनुष्यस्य तथा तस्य पादचिह्नस्य वेषस्य, घातकास्त्रस्य, रक्तस्य, स्वेदस्य, केशस्य, नखस्य च मध्ये तिष्ठति।

दृष्टान्तैरेभिरिदं स्पष्टं यत् संवेदनात्मकं यातुकर्म भावनामिमामुपजीव्य प्रचलति यत् प्रवृत्तावेकं घटनाचक्रमपरमनिवार्यरूपेणावश्यकरूपेण चानुसरति, तत्राध्यात्मिकस्य वैयक्तिकस्य वा कस्यचन माध्यमिकस्य नापेक्षा भवति। यातुधानः कदापि संशयतुलां नाधिरोहति, यत् सदृशेन कारणेन सदृशस्य कार्यस्योत्पत्तिर्न भविष्यतीति। सः सर्वात्मना विश्वसिति यदन्यः कश्चन यातुधानो यदि प्रबलतमेन मन्त्रादिना विघ्नं नोपस्थापयिष्यति चेत्तर्ह्यवश्यं सविधि सम्पादितं समुचितैर्मन्त्रोच्चारणैश्च संयुक्तं तस्य यातुकर्म वाञ्छितं पूरयिष्यति। यद्यपि स महाशक्तीनां पुरस्ताद्दिनतो न भवति; तथापि तस्य विश्वासानुरूपं महती तस्य शक्तिः स्वैरिणी सीमानमतिक्रान्ता च नैव भवति[१]। इत्थं मैजिकः 'यातुकर्म'धर्मेण सह संवादं नैव भजते, यतो हि धर्मः खलु तासामलौकिकशक्तीनामाराधनं प्रसादनं च याः प्रकृतेः क्रियमाणानि, मानवं जीवनञ्च नियन्तुं निर्देष्टुञ्च समर्थाः[२]।

फ्रेजरमहोदयस्य सिद्धान्तमालोचयन् मैरेट्महाशयः कथयति—'मैजिकः' न केवलं विचाराणां भ्रमात्मकप्रयोगः; अपि तु तस्य भावात्मकोऽपि पक्षः सम्यग्ग्राह्यो विचारणीयश्च। रागक्रोधादयोऽस्माकमुग्रा भावा मनोविकाराश्च विशेषतो भ्रामका भवितुमर्हन्ति। यथार्थस्य वस्तुनोऽभावे तस्य प्रतिकृतौ छायादिषु वा कश्चन सम्प्रयोगो मनोवैज्ञानिकया दृष्ट्या मैजिकस्योपक्रमणिकामात्रम्। समुन्नते 'मैजिके' तु प्रयोक्ता न्यूनातिरिक्तेन रूपेण सचेतनो भवति यत् सः कञ्चन प्रतीकमाश्रित्य स्वीयं प्रयोगं समाचरति, किन्तु मनसो भावानां तोषार्थं सः विश्वसिति यद् यद्यप्ययं मम प्रयोगः प्रतीकमाश्रित्य प्रवृत्तः, तथापि मदिच्छानुरूपं फलं यथार्थं पदार्थं प्रति सञ्चरिष्यतीति[३]। पुनरग्रे स्वीयं विचारं स्पष्टीकुर्वन् सः कथयति–मन्त्रो ह्यभिलषितं फलं प्रतीकाद् यथार्थं पदार्थं प्रति नयति स्वकीयेन दूरवेधिना प्रभावेण[४]। तत्र "अवश्यमिदम्भावि" इत्युच्चारणेन मन्त्रसंस्कारमहिम्ना यातुधानो मन्त्रप्रयोक्ता स्वीयमभिलाषं पूरयति।

---

१. तस्मिन्नेव ग्रन्थे, पृ० ४९।

२. तस्मिन्नेव ग्रन्थे, पृ० ५०।

३. दि थ्रेशोल्ड ऑफ रिलिजिन, द्वि० संस्करण, १९१४, पृ० २९।

४. स एव ग्रन्थः, पृ० ३०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

ई० एस्० हार्टलैण्डमहाशयानुसारम् 'मैजिकः' येन केनापि साधनेन सञ्चितायाः शक्तेर्भावनामभिव्यनक्ति। यां शक्तिं यातुधानः स्वकीयामेव सम्मनुते, न त्वन्यस्य कस्याप्युच्चैरधिष्ठातुः। उच्चाधिष्ठात् साहाय्यन्तु केवलं निवेदनेनात्मसमर्पणेन च प्राप्यते[१]। यदि शक्तिलाभार्थं प्रार्थना यज्ञादयश्च क्रियन्ते, तर्हि ताः प्रार्थनास्ते च यागादयो मैजिकस्याङ्गभूताः स्वीक्रियन्ते।

ई० ओ० जेम्समतानुसारं मैजिको लक्ष्यविशेषस्य पूर्तये स्वभावतः शक्तिसम्पन्नानां मन्त्राणामुच्चारः संस्कारक्रिया च। तत्र भूतप्रेतादयो देवा वा पृष्ठभूमौ भवन्तु, न वा भवन्तु; किन्तु 'मैजिक'प्रयोगे मन्त्राणां ज्ञानं मन्त्रविधिज्ञानञ्चावश्यकम्। यथा कस्यापि मनोगतस्य भावस्य चेष्टादिभिरभिनयः क्रियते, तथैव मैजिकार्थं शक्तिसम्पन्नानां मन्त्राणां प्रयोगोऽपि[२]।

'मैजिक'विषये ब्री० मालिनोव्स्की स्वीयं विचारमित्थं प्रकटयति—सर्वथा मनुष्य एव सन्निहिता विशेषा काचिच्छक्तिः, या हि 'मैजिक'कलया, 'मैजिक'प्रयोक्तुर्मुखादुच्चारितेन शब्देन, विधिप्रयुक्तेन क्रियया च प्रकाशमुपयाति[३]।

डब्लू० एच्० रिवर्समहोदयस्तु वर्णयति—'मैजिकः' प्रयोगाणां वर्गविशेषः, यत्र मनुष्यस्ताः क्रियाः प्रयुङ्क्ते याः स्वकार्यसिद्धये शक्तये च प्रयोक्तुः प्रभावमथवा क्रियास्तथा तासु प्रयुक्तपदार्थानां गुणानाश्रयन्ति[४]।

"यद् वयं 'मैजिकम्' वदामस्तत् प्रथमतस्तु साधारणतो मूर्तरूपेण चिन्तितायामपि कस्याञ्चनादृश्यालौकिकशक्तौ विश्वासः, अपरतस्त्वीदृश्याः शक्तेः प्रयोगार्थं काचन विशेषा कला योग्यता वा, यया हि मनुष्या अलौकिकाश्च जीवा वशीभवन्ति"—इत्थं विषयममुं आर०-कार्स्टेनमहोदयः प्रतिपादयति। अयं महाशयः फ्रेजरमहोदयानाम् 'भावसाहचर्य'सिद्धान्तं नाङ्गीकरोति। तत्र युक्तीश्च प्रदर्शयति यत् फ्रेजरः प्रतीकस्य यथार्थस्य चाथवा पूर्णस्य तस्याङ्गस्य च मध्ये परिकल्पितं रहस्यात्मकं सम्बन्धं याथार्थ्येन स्पष्टीकर्तुमसमर्थः। इत्थं फ्रेजरमहाशयस्य सिद्धान्तं खण्डयन् कार्स्टेन्महाशयो मनुते यद् यातुप्रयोगाणामाधारश्चेतनाचेतनेषु प्रभविष्यमाणा काचनाध्यात्मशक्तिः।

---

१. रिचुअल एण्ड बिलीफ, १९१४, पृ० ८६।

२. बिगनिंग्स ऑफ रिलिजन।

३. मैजिक, साइन्स एण्ड रिलिजन, १९४८, पृ० ५६-५७।

४. मेडिसिन, मैजिक एण्ड रिलिजन, पृ० ४।

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

ई० रायस्टन्पाइकमहाशयानुसारं मैजिकः—कलाविशेषः, काल्पनिक कलाविशेषो वा; यत्र मूर्तानां पदार्थानां विशेषविधीनां मन्त्राणाञ्च प्रयोगेऽलौकिकमद्भुतञ्च फलं प्राय उपकर्तृणामनुपकर्तृणां वाऽपार्थिवजीवानां साहाय्येन प्राप्यते ।

किन्तु बहूनां प्रायोगिकमानवशास्त्रज्ञानां तथा यैरादिवासिनां मध्ये बहुवर्षमध्युष्य तेषां नैकविधं यातुकर्म पक्षपातरहितेन भावेन विलोकितमधीतं परीक्षितं च तेषामाख्याभिरिदं स्पष्टं यन्मैजिकः 'काल्पनिकी कला' इति कथनं नैव युक्तियुक्तम् ।

'रिकवरिंग दि ऐंशिएंट मैजिक'नाम्नि पुस्तके 'मैक्स फ्रीडम लाँग'महाशयो यातुकर्मणां स्वयं विलोकितानि प्रामाणिकैरन्यैश्च विलोकितानि बहूनि प्रदर्शनानि वर्णयन् मैजिकविषये वदति—"प्रयोगाणां सा सरणिर्यया ह्याधुनिकानां वैज्ञानिकनियमानां सर्वथा प्रतिकूलमेव प्रभावः परिदृश्यते", "प्रयोगाणां सः समूहो यत्राभौतिकानां साधनानामुपयोगः क्रियते", अथवा "यत्राभौतिकैः साधनैः भौतिकं फलमवाप्तुं यत्नः क्रियते ।" 'फिजी'द्वीपेऽग्निसम्बन्धिषु यातुकर्मसु कुशला यातुविदो भृशं संतप्तानामङ्गाराणां प्रस्तराणाञ्चोपरि न केवलं चलन्ति; अपि तु नृत्यन्ति । प्रयोगकाले ते हरितपल्लवानां मालाभिः स्वशिरांस्याच्छादयन्ति, हस्तयोर्हरितपल्लवांश्च धारयन्ति । इदानीं ते पादयोः कस्यापि वस्तुनो लेपं नैव कुर्वन्ति, नैव च किमप्युपानहादि धारयन्ति[१] । स एकं यातुविदं तत्र बुद्बुदायमानं वाष्पायमाणञ्च सन्तप्तं जलं पिबन्तमपश्यत् । प्रयोगात् पूर्वमनन्तरञ्चैतेषामग्नियातुधानानां सम्यक् परीक्षणमपि कृतम्, किन्तु तत्र कस्यापि वस्तुनो लेपस्य लेशमात्रमपि दग्धस्य वा लक्षणं नावाप्तम्[२] ।

स्वकीयेन वैज्ञानिकेनानुसन्धानेन मैक्सफ्रीडमलांगमहोदयः स्थिरीचकार—

(१) 'मैजिकः' यातुकर्म न काल्पनिकम्, किन्तु सत्यम् ।

(२) मनोविज्ञानमस्याधारः ।

(३) आधुनिकवैज्ञानिकानां भौतिकस्य जगतः परं दिवि भूमौ च भौतिकातिशायीनि तत्त्वानि सन्ति ।

---

१. स एव ग्रन्थः, पृ० २२ ।

२. स एव ग्रन्थः, पृ० २५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

केषाञ्चन यातुप्रयोगाणां यथार्थतां निरीक्ष्य अयं महाशयोऽन्येषामपि यातुप्रयोगाणां सत्यतां यथार्थताञ्च सिद्धान्तयति। सः कथयति यद् यदि नाम 'मैजिकः' कस्यचन प्रयोगस्याङ्गभूतः सिद्ध्यति, तर्हि नूनमयमपरस्य तत्सदृशस्य तत्सम्बद्धस्य वा प्रयोगस्याङ्गभूतः सिद्ध्यति[1]। मैजिकविषये यद्यपि सर्वेषामियं साधारणी धारणा यत् कर्मेदं हस्तलाघवमात्रम्, किन्तु केषुचित् प्रयोगेषु सत्यस्यापि मैजिकस्य प्रयोगः परिदृश्यते[2]। एतत्तुल्यमेव सः काष्ठोपकरणादीनां स्फुरणम्, भूतप्रेतादीनां सत्त्वम्, पशूनां माध्यमेन कस्यापि वस्तुनो ज्ञानम्, सम्मोहनादिकञ्च साधयति। तस्य मतेऽमेरिकानगरे रोगाणां मानसिकस्याध्यात्मिकस्य चोपचारस्य नूतनः प्रयोगो न धर्मो नाप्यध्यात्मविद्या, किन्तु मैजिक एव।

यातुमुद्दिश्योपर्युल्लिखितानां वादानां विचाराणाञ्च चिन्तनेनेदं स्पष्टं यदतीन्द्रियाणां भूतानां सत्तायां तथा तैः सहास्मदादीनां सम्बन्धविषये विपश्चितां वैमत्ये सत्यपि यातुरप्येको विषय इत्यत्रास्ति समेषामैकमत्यम्। सर्वेऽप्येवमामनन्ति यत् 'मैजिके' एकं नियामकं बाधकञ्च तत्त्वमस्ति। यातुप्रयोक्ता कञ्चनावस्थाविशेषं परिलक्ष्य स्वकीयेन मन्त्राद्युच्चारणेन कृत्यविशेषस्य प्रयोगेण च स्वीयमभिलषितं साधयत्येव, स्वीयमुद्देश्यं पूरयितुं सफलयितुञ्च सः सर्वथा स्वतन्त्र एव तिष्ठति। सः कञ्चन शक्तिविशेषं प्रभावविशेषं वा भीषयति तर्जयति वञ्चयति च। एतदतिरिक्तं यातुर्यद्यपि प्रायोऽतिमानुषं व्यवहरति; तथापि यदा स केनापि भूतप्रेतादिना देवताभिर्वा व्यवहरति, तदापि तस्योद्देश्यं तथैवापरिवर्तितं तिष्ठति, यथातिमानुषीभिः शक्तिभिर्न भवति। तस्यैतानुद्दिश्य श्रद्धेयो हेयश्च व्यवहारः, किन्तूदासीनो नियामकश्च। यातुविषये यद्यपि समेऽपि विपश्चितः फ्रेजरमहाशयस्य विचारसंरण्या सर्वथा संवादं न भजन्ते; तथापि विषयमेतमुद्दिश्य प्रवर्तिता उत्तरोत्तरा विचाराः फ्रेजरमहाशयस्य विचारधाराभिः सातिशयं प्रभावितास्तिष्ठन्ति, धर्मस्य यातोश्च विषये वर्तमानं भेदमनेके मानवजातिशास्त्रज्ञाः फ्रेजरमहाशयानुरूपमङ्गीकुर्वन्ति।

धर्मः

यतः प्रभृत्येव महान्तो विपश्चितो धर्मस्य विषये दत्तावधानाः सञ्जातास्ततः प्रभृत्येव धर्मश्चिन्तनस्यानुसन्धानस्य च विषयो जातः। भारतवर्ष-ईरान-मिस्र-असीरियादेशानां प्राचीनग्रन्थराशीनामध्ययनेन तुलनात्मकस्य धर्मस्य नवीनं विज्ञानं विचाराय समुपस्थितम्।

१. स एव ग्रन्थः, पृ० २१।

२. स एव ग्रन्थः, पृ० २४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

धर्मस्य किं मूलम् ? आदिवासिनां को धर्मः ? इति सविशेषं विचारविषयः सञ्जातः। जगतो विभिन्नानामादिवासिनां विचाराणाम्, व्यवहाराणाम्, अन्धविश्वासानाम्, संस्काराणाञ्च विषये समुपलब्धो नृवंशविद्याविषयिण्यो मानवजातिशास्त्रविषयिण्यश्च मूल्यवत्यः सामग्र्यो धर्मविज्ञानस्य विषयं स्फीतं चक्रुः। एताः सामग्र्य एवंविधा विपुला विभिन्नाश्च सन्ति, तथा जीवनस्य समग्राभिः समस्याभिरित्थं व्याप्रृताः सन्ति, यद्विद्वांस एतद्विषयके व्याख्याने नैकं मतमङ्गीकर्तुमर्हाः। विभिन्नविदुषां विभिन्नं प्रकरणमुद्दिश्य व्यक्तानां विशेषाणां विचाराणामालम्बनेन यद्यपि बहवो विभिन्नाः सम्प्रदायाः सम्प्रवृत्ताः, किन्तु का प्रकृतिर्धर्मस्य किञ्च मूलं धर्मस्येत्यस्मिन् विषये न कोऽप्यद्वितीयः सर्वसम्मतश्च सिद्धान्तः स्थिरीकृतः सर्वैः।

ई०ऐडम्सन्हायवेलमहाशयस्याशयानुसारं मानवस्य सामाजिकजीवनविकासस्य सिद्धान्तेषु नैकोऽपि व्याख्यानाय तथा जटिलः, यथा धर्मः। अयं बहून् प्रस्तावान् समुपस्थापयति। अत्र संस्कृतेर्विविधा विचारधारा विमिश्रिताः। तथायमित्थं विपरिवर्तनशीलो येनास्य धर्मस्येदृशं व्याख्यानं लक्षणं वा सर्वथा दुःशकं यत्र समग्रस्यापि धर्मविषयस्य समावेशः स्यात्, तथा सोऽध्ययनाय सङ्क्षिप्तोऽपि भवेत्।[१]

श्रीएण्ड्रिउ-लैंगमहाशयो लिखति—सर्वथा सन्तोषजनकं धर्मस्य लक्षणं भवितुं नार्हति, स्वीयमाशयं स्पष्टैः शब्दैः प्रकटीकृत्य तत्र दृढमाग्रहिलो भूत्वा यदि नाम कश्चन यत्किमपि लक्षणं धर्मस्य कुर्यात्, तत्रापि विवादावसरो भविष्यत्येव।[२]

यद्यप्यन्येऽपि विद्वांस एवमेवामनन्ति; तथापि धर्मं वर्णयितुं प्रयत्नाः सञ्जाताः। ये सर्वेऽपि प्रायो नैव विफलाः, तेष्वेकस्यात्रोल्लेखः कर्तुं शक्यते, अथवा तस्यैकस्य विपश्चितो यो हि धर्मशब्दं व्याख्यानाय वर्णनातीतं मनुते।

'दि वेराइटीज़ ऑफ रिलिजस एक्सपीरिएंस'नाम्नि स्वकीये ग्रन्थे मनोवैज्ञानिको विलियम्‌जेम्समहाशयो धर्ममुद्दिश्योल्लिखति—

"ततोऽस्ति धर्मः—यथाहं स्वेच्छया भवन्तमङ्गीकारयितुं वाञ्छामि केनापि दिव्येन सम्बद्धमात्मानं मन्यमानाया एकस्या व्यक्तेरेकान्तेऽनूभूता भावाः, अनुभवाः चेष्टाश्च" इति।

---

१. मैन इन दि प्रिमिटिव वर्ल्ड, १९४९, पृ० ४०६।

२. मिथ, रिचुअल एण्ड रिलिजन, लन्दन, १८९९, पृ० १।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

अत्र दिव्यशब्दस्यार्थो यद्यपार्थिवोऽप्राकृतश्च कश्चन पदार्थः स्वीक्रियेत चेत्, तर्हि मन्ये सर्वेषां धर्माणां कृते इदमेकं निर्वाहयोग्यं श्रेष्ठं धर्मलक्षणं स्यादिति ।

इत्थं यातोर्धर्मस्य च विषये पाश्चात्त्यविदुषां विचाराणामुल्लेखानन्तरं धर्मस्य विषये भारतीयानां विचारविज्ञानमावश्यकम् । यद्यपि धर्मशब्द आङ्गल'रिलिजन'शब्दस्य प्रायः पर्यायत्वेनोररीकृतः, तथापि 'रिलिजन'शब्दो धर्मशब्दादनुभूतं व्यापकमर्थं व्याकर्तुं नालम् । 'रिलिजन'शब्दार्थापेक्षया धर्मशब्दार्थः स्फीतो व्यापकश्च । यतो हि 'रिलिजन'शब्दो मनुष्यस्याप्राकृतेन केनापि शक्तिविशेषेण सम्बन्धमात्रमभिव्यनक्ति, किन्तु धर्मशब्दार्थो नाम विरमति, तत्रान्येऽप्यर्था अन्तर्भूताः । यथा जगतो नियता व्यवस्था, आचारः, रीतिः, विधिः, सदाचारः, कर्तव्यम्, गुणः, न्याय इत्यादयः सर्वेऽप्येतेऽर्था अत्र यथाप्रसङ्गं संयोज्या भवन्ति । धर्मो हि भारतीयसंस्कृतेः प्राणभूतः । भारते समग्रं जीवनं धर्मेणोच्छ्वसितं प्रेरितश्च भवति । 'इथिक्स-रिलिजन'-शब्दवाच्यस्य धर्मस्य नीतेश्चात्र समावेशः । धारणार्थकधृञ् धातोः "अर्तिस्तुसुहुसृधृक्षिक्षुभायावा-पदियक्षिनीभ्यो मन्" (१४५) इत्युणादिसूत्रेण 'मन्'प्रत्यये कृते निष्पन्नो धर्मशब्दः 'यो धारयति सः धर्मः' इत्यर्थमभिव्यनक्ति । धर्मशब्दस्यायमेवार्थः कर्णपर्वणि ६९ अध्याये ५८ श्लोके समुपवर्णितः—

धारणाद् धर्ममित्याहुर्धर्मो धारयति प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥

जैमिनिस्तावन्मीमांसासूत्रे "चोदनालक्षणोऽर्थो धर्मः" इत्येवं सूत्रितवान् । तथा च वेदादिभिः प्रेरितोऽर्थो धर्म इत्युच्यते । जैमिनेः सूत्रस्यास्य व्याख्यानावसरे शाबरभाष्ये उक्तम्—"चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुम्, नान्यत् किञ्चनेन्द्रियम्" (शाबरभाष्यम्, १-१-२) । विषयमिमं विशदं विवेचयता भाष्यकारेणोक्तम्—"यो हि यागादिकं समाचरति, यश्च शुद्धिकर्म प्रायश्चित्तादि, उभावपि समानरूपेण धर्मकर्तारावुच्येते । धर्मः पुरुषस्य महते श्रेयसे भवति । यज्ञश्च पुरुषस्य महतेऽभ्युदयाय जायते । अतो यज्ञार्थं कर्म धर्मपदेनोच्यते" इति ।

वैशेषिकसूत्रानुसारं यैः कर्मभिः पुरुष इह लोके परत्र च सुखं विन्दति, मोक्षञ्च लभते, स धर्मः । तथा च सूत्रम्—"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" (वै० सू०१.१.२) । यद्यपि लक्ष्यसिद्धये महाशक्तौ शक्तिषु वा विश्वासस्तत्प्रसादश्चापेक्षितः, तथाप्येतत्सर्वं नास्ति धर्मस्यावश्यकमङ्गजातम् । यैर्विश्वासैरभ्यासैश्च जनः पार्थिवं सुखं लभते, अथ च ये विश्वासा अभ्यासाश्चाध्यात्मसुखे परमानन्दप्राप्तौ च बाधका नैव भवन्ति, त एव धर्मपदार्थान्तर्भूता भवन्ति । धर्मो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

भौतिकमाध्यात्मिकञ्च जीवनं नोपेक्षते, किन्तु तयोर्मध्ये सामञ्जस्यं स्थापयति। धर्मनियमानां पालनेन पुरुष आधिदैविकाधिभौतिकाध्यात्मिकैर्दुःखैर्मुक्तः सञ्जायते। धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मस्य प्रथमं स्थानम्।

वेदेषु यातुः

जगति यत्किञ्चिदप्यलौकिकमतिमानुषञ्च वर्तते, तेन सह व्यवहर्तुं यातुर्धर्मश्चेत्येतौ द्वौ पृथक् पृथग् हेतुभूतौ। यतो ह्येतौ द्वावपि मनुष्यस्य हृदि बद्धमूलावत एवैतौ संस्कृतेर्विश्वमान्ये स्वरूपे। श्रुतयो हि प्राचीनस्यास्य भारतवर्षस्यार्याणां विश्वासानां व्यवहाराणां कृत्यानाञ्च विषये ज्ञानस्य सर्वतः श्रेष्ठा निधयः सन्ति। अतोऽत्र वयं किञ्चिच्चिन्तयामो यद् यातोर्धर्मेण सह तस्य सम्बन्धविषये च वेदेषु किञ्चिद् विद्यते न वा?

वेदेष्वपि यातुचर्चा इति विचारमात्रेणैव केचन क्षुभ्यन्ति। तेषामयं विश्वासो यद् भूतैः प्रेतैः पिशाचै राक्षसादिभिश्च मानवीयः सम्बन्धो यातुरिति। तैरेवं विचार्यते यदर्हतमासु श्रुतिषु दुष्टात्मनामेतेषां पूजनाद्यर्थं स्थानं भवितुं नार्हति, किन्तु यातुकर्मणि दुष्टात्मनां भूतप्रेतादीनां पूजनमेव नावश्यकं कर्मजातम्। वेदेषु बहुत्र यातोर्यातुधानानाञ्च विषये प्रमाणानि समुपलभ्यन्ते।

वेदेषु यातुशब्द इन्द्रजालार्थको मायावाचकश्च, तथा यातुधानशब्द ऐन्द्रजालिकस्य मायाविनश्चार्थे समुपलभ्यते। गमनार्थकादाक्रमणार्थकाच्च 'या'धातोर्यातुशब्दो निष्पन्नः। अवेस्ताग्रन्थे 'यातु'शब्दो यातुकर्तुरैन्द्रजालिकस्य वाचकः, किन्तु भारतीयासु भाषासु 'जादू' इति शब्दो यातुशब्दार्थरूपेण व्यवह्रियते।

अथर्वसंहितायाम् १, १६, २ इत्यत्र समागतस्य "यातुचातनम्" इति पदस्यानुवादः डब्लू० डी० ह्विटनीमहाशयेन (डेमन्) दानवार्थे कृतः। एवमृग्वेदसंहितायाम् ७, १०४, १५ इत्यत्र समागतो यातुधानशब्दो यथैन्द्रजालिकार्थे प्रयुक्तस्तथैवाथर्वसंहितायामपि १, ७ तथा १, ८ काण्डेऽयं शब्दः प्रयुक्तः। अत एवाथर्वसंहितायाम् १, ८, ३ इत्यत्र प्रार्थितं विद्यते यद् बृहस्पतिर्यातुधानवंशोच्छेदं विदधात्विति। पुनश्च, 'यातुधान' इति 'रक्षस्' इति च शब्दः सहैवैकस्मिन् मन्त्रे प्रयुक्तौ दृश्येते—

"अपसेधन् रक्षसो यातुधानानस्थाद् देवः प्रतिदोषं गृणानः।"

(ऋ० सं० १. ३५. १०)

इत्थं यातुधानरक्षस्शब्दयोः सह प्रयोगेणानयोर्भिन्नार्थकत्वं प्रतीयते। तथा च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

यातुधानशब्द ऐन्द्रजालिकस्य मायाविनो यातुकर्तुरर्थे, रक्षस्शब्दश्च दानवरूपेऽर्थे प्रयुक्तः। ऋग्वेदसंहितायाम् ७, १०४, १५ इत्यत्र बृहस्पतिर्वदति—

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य।
अधा स वीरैर्दशभिर्वियूयायो मा मोघं यातुधानेत्याह॥

यद्यहं यातुधानोऽस्मि तर्हि साम्प्रतमेव मम मृत्युर्भवेदिति। अत्र प्रयुक्तो यातुधानशब्दो विस्पष्टं मायाविन ऐन्द्रजालिकस्य यातुकर्तुरर्थे प्रयुक्तः। बृहस्पतेरियमुक्तिर्विश्वामित्रेण वशिष्ठं प्रति कृतस्याक्षेपस्य निराकरणप्रसङ्गे ऋग्वेदसंहितायाम् ३, ५३, २१–२२ इत्यत्रोल्लिखिता विद्यते।

वशिष्ठविश्वामित्रयोः कलहं कलयन्तीयमाख्यायिका परम्परातोऽनुसृता बृहद्देवतायाम् ४–११२–१२० इत्यत्र ४७ पृष्ठे, तथा ऋग्वेदसंहितायाः कात्यायनसर्वानुक्रमसूत्रे १६ पृष्ठे समुपलभ्यते (मैकडानलसम्पादितं संस्करणम्)। तथाहि राज्ञः सुदासस्य यज्ञे शक्तिरित्याख्यो वशिष्ठपुत्रो विश्वामित्रं प्रति यातुप्रयोगं चकार। ततो विश्वामित्रो जमदग्निना प्रदत्तया ससर्पर्या वाचा शक्तेस्तत्प्रयोगं वितथं व्यदधात्, शक्तिं शशाप च। विश्वामित्रो जमदग्निं प्रति स्वीयमाभारं प्रकटयन् वक्ति—

ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता।
आसूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम्॥
ससर्परीरभरत्तूयमेभ्योऽधिश्रवः पाञ्चजन्यासु कृष्टिषु।
सा पक्ष्या नव्यमायुर्दधाना यां मे पलस्ति जमदग्नयो ददुः॥
(ऋ० सं० ३. ५३. १५–१६)

एवमग्रे २१–२२ मन्त्रयोः (बृहद्देवतानुसारम् २१–२४ मन्त्रेषु) शक्तिमथवा वशिष्ठं प्रति शापोक्तिर्विलोकनीया। निरुक्ते ४।१४ इत्यत्र दुर्गाचार्यस्य व्याख्यानमप्यत्र द्रष्टव्यम्।

कृत्या

अथर्वसंहितायां कृत्याशब्दो बहुत्र समुपलभ्यते। अयं कृत्याशब्दः करणार्थकात् 'कृ'-धातोर्निष्पन्नः प्राधान्येन यत् किमपि 'कृत्यं व्यापारम्' द्योतयति, तथा गौणत्वेन यातुनाऽपि सम्बद्धः। लिथुआनियन्भाषाया यातुवाच्येन 'केरास'(Keras)शब्देन तथा "चक्षुषा सम्मोहनम्" इत्यर्थकेन 'केरेति' (Kereti) शब्देनायं 'कृत्या'शब्दः साम्यं भजते। एवं प्राचीनस्लावोनियन्भाषाया यातुवाच्येन 'कारु'(Caru)शब्देनाप्यस्य कृत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

शब्दस्य साम्यं परिलक्ष्यते। सर्वेष्वेतेषु रूपेषु मूलभूतस्य 'कृ'धातोः सम्बन्धः स्पष्टः। अथर्वसंहितायाम् १०-१-१ स्थले यादृग्वर्णनं समुपलभ्यते, तेन 'कृत्या'शब्दस्यार्थो हस्ताभ्यां निर्मिता काचित् कृतिरिति प्रतीयते, या महता कौशलेन विनिर्मिता विवाहार्थं वधूरिवोपवर्णिता तत्र। एवं द्वितीयमन्त्रेण ज्ञायते यत् कृत्या शिरसा नासिकया कर्णाभ्याञ्च संयुक्ता भवति। अस्या निक्षेपः कुशेषु, क्षेत्रे, श्मशानभूमौ, गृहवह्नौ च कर्तुं शक्यते।

यां ते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः।
अग्नौ वा त्वा गार्हपत्येऽभिचेरुः पाकं सन्तं धीरतरा अनागसम्॥

(अ० वे० सं० १०. १. १८.)

पुनः पञ्चमे काण्डे एकत्रिंशत्तमे सूक्ते यद् वर्णनमुपलभ्यते तेन ज्ञायते कृत्याया निक्षेपः स्थापनञ्च मृत्तिकाया आमपात्रे, मिश्रधान्ये, आमे मांसे, मनुष्येषु, अविषु, चलेषु पदार्थेषु, सभामण्डपे, अक्षेषु, सेनायाम्, शरेषु, दुन्दुभौ, कूपे, मनुष्यास्थिषु, चिताग्नौ च भवति स्म।

वर्णनैरेभिरित्थं प्रतीयते यत् 'कृत्या' एकं यातुकृत्यम्, यत्र शक्तिसम्पन्नस्य कस्यापि माध्यमस्य प्रयोगः क्रियते, तथा तस्या न्यासः स्थापनं वा शत्रूणां क्षयार्थं पीडार्थं वा मर्मस्थलेषु क्रियते स्म। कृत्यायाः प्रयोगः शूद्रैः, राजभिः, स्त्रीभिः, ब्राह्मणैर्देवैश्चापि क्रियते स्म। तथा च मन्त्रः—

शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता।
जाया पत्या नुत्तेव कर्तारं बन्ध्वृच्छतु॥

(१०-१-३ अथर्वसं०)

अन्यैः प्रयुक्तां कृत्यां दूषयितुं वारयितुं वाऽथर्वसंहितायाम्—प्रत्यभिचरणप्रतिहरणप्रतिसारप्रत्यञ्चप्रतीचीनशब्दानां प्रयोगो निम्नाङ्कितेषु मन्त्रेषु दृश्यते—

२।११।२, ५।१४।८, ८।५।१४, १०।१।६ एतेषां प्रयोगो यानुद्दिश्य क्रियते तेषां कृते कृत्याकृत्-वलगिन्-मूलिन्-शपथेय्यशब्दानां प्रयोगो विहितः—

कृत्याकृतं वलगिनं मूलिनं शपथेय्यम्।
इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया॥

(अथर्वसं० ५-३१-१२)

"गुताभिशापस्वरूपाया वलगाया भूमौ निखननं शत्रुसन्तापार्थं क्रियते स्म"—ईदृशाः सन्दर्भा वाजसनेयसंहितायाम् ५,२३, इत्यत्र, तैत्तिरीयसंहितायाम् १-३-२ इत्यत्र, तथाथर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

संहितायाम् १०-१-१८ इत्यत्रोपलभ्यन्ते। अथर्वसंहितायामन्येषु चापि वेदेषु वनस्पतिमूलानां कृत्यादि यातुकर्मणि प्रयोगः समुपलभ्यते। प्रयोगोऽयं मूलक्रिययाख्यया प्रसिद्धो धर्मशास्त्रेषु निषिद्धश्च। तथा चात्र भवन्ति सन्दर्भाः—

इयं वीरुन्मधुजाता मधुना त्वा खनामसि।
(अथर्व० सं० १-३३)

इमां खनाम्योषधिं वीरुधं बलवत्तमाम्।
यया सपत्नीं बाधते यया संविन्दते पतिम्॥ इत्यादि।
(ऋग्वेद० १०।१४५)

मनुस्मृतौ नवमाध्याये २९० श्लोके मूलक्रियानिरोधार्थमुल्लेखः—

अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः।
मूलकर्मणि चानाप्तैः कृत्यासु विविधासु च॥

अथर्वसंहितायाम् २-७-५; ४-९-६ इत्यादिस्थलेषु 'दुर्हार्देन चक्षुषा' विलोकनस्यापि प्रसङ्गा दृश्यन्ते।

वेदेषूपवर्णितो यातुः संसारस्य विभिन्नवर्गीयजनानां यातुना प्रायो वैषम्यं न भजते। वैदिककालिकस्य गृहस्थस्य जीवनं यातुप्रयोगैः सर्वथा सुखमयं प्रतीयते। उभयोः साधर्म्य-मूलकस्य सांसर्गिकस्य च यातोः प्रयोगस्तत्र वेदेषु समुपलभ्यते। एतदर्थं निम्नाङ्किताः सन्दर्भा द्रष्टव्याः सन्ति—ऋग्वेदसंहिता १-५० इत्यादि, ऐतरेयब्राह्मणम् २-१; ३-२२, ७; ७-३१ इत्यादि, तैत्तिरीयसंहिता १-१-२ अ-व; ५-१-६-४ इत्यादि, शुक्लयजुर्वेदः १-२५-२६ इत्यादि।

सर्वेष्वेतेषु कृत्येषु प्रतीकात्मकता प्राचुर्येणोपलभ्यते। साध्यं सिद्धत्वेन परिकल्प्य तदनु-करणेनाभिलषितं फलं प्राप्यते स्म। अशुभानां दुष्प्रभावाणां च संवरणे[1] तथा हितकरपदार्थानां शक्तीनां वाकर्षणे[2] फ्रेजरमहाशयस्य साधर्म्यनियमस्य सांसर्गिकनियमस्य च प्रक्रिया द्रष्टुमर्हा। ईदृशानां यातुनिदर्शनानां विस्तृतं विवरणमग्रिमेष्वध्यायेषु प्रतिवेदमुद्धृत्य लिखितम्।

---

१. उदाहरणतया श० प० ब्रा० १.२.४.७ इत्यत्र अध्वर्युर्विशेषेण विधिना एकं काष्ठमयं खड्गं शितधारं कृत्वा तस्य स्पर्शं स्वकीयेनाङ्गेन वारयति।

२. तै० ब्रा० १.३.७.७ इत्यत्र वाजपेययज्ञकर्ता यूपसोपानादवतीर्य अजाचर्मोपरि समागच्छति, येन तस्य वंशवृद्धिरैश्वर्याभिवृद्धिश्च स्यादिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

शब्दस्य साम्यं परिलक्ष्यते। सर्वेष्वेतेषु रूपेषु मूलभूतस्य 'कृ'धातोः सम्बन्धः स्पष्टः। अथर्वसंहितायाम् १०–१–१ स्थले यादृग्वर्णनं समुपलभ्यते, तेन 'कृत्या'शब्दस्यार्थो हस्ताभ्यां निर्मिता काचित् कृतिरिति प्रतीयते, या महता कौशलेन विनिर्मिता विवाहार्थं वधूरिवोपवर्णिता तत्र। एवं द्वितीयमन्त्रेण ज्ञायते यत् कृत्या शिरसा नासिकया कर्णाभ्याञ्च संयुक्ता भवति। अस्या निक्षेपः कुशेषु, क्षेत्रे, श्मशानभूमौ, गृहवह्नौ च कर्तुं शक्यते।

यां ते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः।
अग्नौ वा त्वा गार्हपत्येऽभिचेरुः पाकं सन्तं धीरतरा अनागसम्॥

(अ० वे० सं० १०. १. १८.)

पुनः पञ्चमे काण्डे एकत्रिंशत्तमे सूक्ते यद् वर्णनमुपलभ्यते तेन ज्ञायते कृत्याया निक्षेपः स्थापनञ्च मृत्तिकाया आमपात्रे, मिश्रधान्ये, आमे मांसे, मनुष्येषु, अविषु, चलेषु पदार्थेषु, सभामण्डपे, अक्षेषु, सेनायाम्, शरेषु, दुन्दुभौ, कूपे, मनुष्यास्थिषु, चिताग्नौ च भवति स्म।

वर्णनैरेभिरित्थं प्रतीयते यत् 'कृत्या' एकं यातुकृत्यम्, यत्र शक्तिसम्पन्नस्य कस्यापि माध्यमस्य प्रयोगः क्रियते, तथा तस्या न्यासः स्थापनं वा शत्रूणां क्षयार्थं पीडार्थं वा मर्मस्थलेषु क्रियते स्म। कृत्यायाः प्रयोगः शूद्रैः, राजभिः, स्त्रीभिः, ब्राह्मणैर्वैश्चापि क्रियते स्म। तथा च मन्त्रः—

शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता।
जाया पत्या नुत्तेव कर्तारं बन्ध्वृच्छतु॥

(१०–१–३ अथर्वसं०)

अन्यैः प्रयुक्तां कृत्यां दूषयितुं वारयितुं वाऽथर्वसंहितायाम्—प्रत्यभिचरणप्रतिहरणप्रतिसारप्रत्यञ्चप्रतीचीनशब्दानां प्रयोगो निम्नाङ्कितेषु मन्त्रेषु दृश्यते—

२।११।२, ५।१४।८, ८।५।१४, १०।१।६ एतेषां प्रयोगो यानुद्दिश्य क्रियते तेषां कृते कृत्याकृत्-वलगिन्-मूलिन्-शपथेय्यशब्दानां प्रयोगो विहितः—

कृत्याकृतं वलगिनं मूलिनं शपथेय्यम्।
इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया॥

(अथर्वसं० ५–३१–१२)

"गुप्ताभिशापस्वरूपाया वलगाया भूमौ निखननं शत्रुसन्तापार्थं क्रियते स्म"—ईदृशाः सन्दर्भा वाजसनेयसंहितायाम् ५,२३, इत्यत्र, तैत्तिरीयसंहितायाम् १-३-२ इत्यत्र, तथाथर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

संहितायाम् १०-१-१८ इत्यत्रोपलभ्यन्ते। अथर्वसंहितायामन्येषु चापि वेदेषु वनस्पतिमूलानां कृत्यादि यातुकर्मणि प्रयोगः समुपलभ्यते। प्रयोगोऽयं मूलक्रियाख्यया प्रसिद्धो धर्मशास्त्रेषु निषिद्धश्च। तथा चात्र भवन्ति सन्दर्भाः—

इयं वीरुन्मधुजाता मधुना त्वा खनामसि।

(अथर्व० सं० १-३३)

इमां खनाम्योषधिं वीरुधं बलवत्तमाम्।

यया सपत्नीं बाधते यया संविन्दते पतिम्॥ इत्यादि।

(ऋग्वेद० १०।१४५)

मनुस्मृतौ नवमाध्याये २९० श्लोके मूलक्रियानिरोधार्थमुल्लेखः—

अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः।

मूलकर्मणि चानाप्तैः कृत्यासु विविधासु च॥

अथर्वसंहितायाम् २-७-५; ४-९-६ इत्यादिस्थलेषु 'दुर्हार्देन चक्षुषा' विलोकनस्यापि प्रसङ्गा दृश्यन्ते।

वेदेषूपवर्णितो यातुः संसारस्य विभिन्नवर्गीयजनानां यातुना प्रायो वैषम्यं न भजते। वैदिककालिकस्य गृहस्थस्य जीवनं यातुप्रयोगैः सर्वथा सुखमयं प्रतीयते। उभयोः साधर्म्यमूलकस्य सांसर्गिकस्य च यातोः प्रयोगस्तत्र वेदेषु समुपलभ्यते। एतदर्थं निम्नाङ्किताः सन्दर्भा द्रष्टव्याः सन्ति—ऋग्वेदसंहिता १-५० इत्यादि, ऐतरेयब्राह्मणम् २-१; ३-२२, ७; ७-३१ इत्यादि, तैत्तिरीयसंहिता १-१-२ अ-त्र; ५-१-९-४ इत्यादि, शुक्लयजुर्वेदः १-२५-२६ इत्यादि।

सर्वेष्वेतेषु कृत्येषु प्रतीकात्मकता प्राचुर्येणोपलभ्यते। साध्यं सिद्धत्वेन परिकल्प्य तदनुकरणेनाभिलषितं फलं प्राप्यते स्म। अशुभानां दुष्प्रभावाणां च संवरणे[1] तथा हितकरपदार्थानां शक्तीनां वाकर्षणे[2] फ्रेजरमहाशयस्य साधर्म्यनियमस्य सांसर्गिकनियमस्य च प्रक्रिया द्रष्टुमर्हा। ईदृशानां यातुनिदर्शनानां विस्तृतं विवरणमग्रिमेष्वध्यायेषु प्रतिवेदमुद्धृत्य लिखितम्।

---

१. उदाहरणतया श० प० ब्रा० १.२.४.७ इत्यत्र अध्वर्युर्विशेषेण विधिना एकं काष्ठमयं खड्गं शितधारं कृत्वा तस्य स्पर्शं स्वकीयेनाङ्गेन वारयति।

२. तै० ब्रा० १.३.७.७ इत्यत्र वाजपेययशकर्ता यूपसोपानादवतीर्य अजाचर्मोपरि समागच्छति, येन तस्य वंशवृद्धिरैश्वर्याभिवृद्धिश्च स्यादिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यतो ह्यन्येष्वपि वेदेषु समानान्येवोदाहरणानि यातोः समुपलभ्यन्ते, अतो नायमथर्ववेदो यातुकृत्यानां प्रायः प्रचुरेण प्रसङ्गेनान्येभ्यो वेदेभ्यो विभिन्नो विशिष्टो वेति प्रदर्शयितुमेव ममास्मिन् प्रबन्धे प्रयासः। यद्यपि फ्रेजरमहाशयस्य धर्मस्य यातोश्च विषये विशेषः परिच्छेदो कैश्चिद् विपश्चिद्भिर्विविच्यालोचितः, तथापि धर्मस्येतिहासलेखकैर्मानवजातिशास्त्रविद्भिश्च स विशेषः सामान्यरूपेण सम्मानितः स्वीकृतश्च। प्रबन्धेऽस्मिन् मयापि विश्लेषणार्थं स एव सामान्यपक्षोऽङ्गीकृतः। वैदिकानि प्रमाणानि, भारतीयां परम्पराम्, युक्तिं तर्कञ्चाश्रित्य मामकीना विचारास्तु प्रबन्धस्यास्यान्तिमेऽध्याये विदुषां विचाराय सप्रश्रयं प्रस्तुताः।

अथर्वसंहिताया विषयाः

अथर्वसंहिताया मन्त्राणामनुक्रमणिकार्थं कौशिकसूत्रे गणपद्धतिः स्वीकृता, [1]ब्लूमफील्डमहाशयस्त्वेता ऋचश्चतुर्दशसु विभागेषु विभक्तवान्। तस्य विश्लेषस्य सङ्क्षिप्तः क्रमोऽत्र मया प्रस्तूयते—

(१) भूतावेशपरिहारार्थं व्याधीनां विनाशार्थञ्च प्रयोगा भैषज्यप्रकरणान्तर्भूताः। अथर्वसंहिताया इमे मन्त्राः प्रयोगाश्च भारतवर्षस्य प्राचीनामोषधिपद्धतिं पूर्णतः प्रस्तुवन्ति। ऋग्वेदसंहितायाः १०,१३७,१६१,१६३ प्रकरणेष्वप्येतत्समाना एव प्रयोगा मन्त्राश्चोपलभ्यन्ते। भूतावेशस्य रोगाणाञ्च हेतुषु तत्र नास्त्यन्तरम्। व्याधीनां चिकित्सार्थं द्वयोरपि साधर्म्य–संसर्गसिद्धान्तयोः सम्प्रयोगः परिदृश्यते। येषु प्रतीकात्मकाः प्रयोगाः, जलप्रयोगाः, ओषधिप्रयोगा रक्षाकरण्डप्रयोगाश्च सन्ति। प्रथमप्रयोगस्योदाहरणम् १,२२ इत्यादिषु, द्वितीयस्य च १,२३,२४ इत्यादिषूपलभ्यते। प्रथमे तावत् पाण्डुरोगस्य नाशाय तस्य हरितवर्णेषु जन्तुषु सूर्ये च समावेशः स्यात्, तथा लोहितवर्णस्य वृषस्य रक्तिम्नो रोगाक्रान्ते जने समावेशः स्यात्।

अनुसूर्यमुदयतां हृद्द्योतो हरिमा च ते।
गो रोहितस्य वर्णेन तेन त्वा परिदध्मसि॥
परि त्वा रोहितैर्वर्णैर्दीर्घायुत्वाय दध्मसि।
यथायमरपा असदथो अहरितो भुवत्॥
या रोहिणीर्देवत्या गावो या उत रोहिणीः।
रूपं रूपो वयावयस्ताभिष्ट्वा परिदध्मसि॥

१. दि अथर्ववेद, ब्लूमफील्ड, ग्रन्डरिस, भाग ३, पृ० ५७–१०१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

शुकेषु ते हरिमाणं रोपणाकासु दध्मसि।
अधो हरिद्रवेषु ते हरिमाणं नि दध्मसि॥

ओषधिप्रयोगस्तु निम्नाङ्किते मन्त्रे श्वेतकुष्ठनाशार्थं प्रदर्शितः—

नक्तं जातास्योषधे रामे कृष्णे असिक्नि च।
इदं रजनि रजय किलासं पलितं च यत्॥
किलासं च पलितं च निरितो नाशया पृषत्। इत्यादि।

रोगेषु मुख्यतयाधोलिखिता रोगाश्चिकित्सिताः—

तक्मज्वरः (१,२५; ५-४; ६-२०; ७-११६, १९-३९); जलोदरः (१-१०; ६-२४; ७-८३); आस्रावः (१-२; २-३; ६-४४); क्षेत्रियः (२-८, १०; ३-७); विषम् (५-१३, १६; ६-१२; ७-५६, ८८ इत्यादि); कृमिः (२, ३१, ३२; ५-३३:); उन्मादः (६—१११); व्रणः, अस्थिभङ्गादि च (४-१२; ५-५ इत्यादि)। क्वचिच्च सर्वप्रकारकाणां रोगाणां नाशाय विशिष्टाः पदार्था निर्दिष्टाः सन्ति, यथा जलं वनस्पतयश्च। अस्योदाहरणानि ६-२५, ६-६१ ६-६५, तथा १९-४४ इत्यादिस्थलेषु द्रष्टव्यानि। मन्त्रेष्वेतेषु वर्णवृक्षस्य, अश्वत्थस्य, यवस्य जलस्याञ्जनादेश्चोल्लेखो दृश्यते। एषु भैषज्ययोगेषु सामान्यतो वैदिकानां देवानामाह्वानं प्रार्थना च क्रियते।

(२) आयुष्यप्रयोगाः—दीर्घस्यायुषः स्वास्थ्यस्य च प्राप्तये समुपलब्धा मन्त्रा आयुष्यान्तर्गताः। यतो ह्येते मन्त्रा अन्यत्र बहुषु संस्कारेष्वपि प्रयुक्ता भवन्ति, अतो मन्त्राणामेषां विषय आयुष्या एवेमे मन्त्रा इति दार्ढ्येन वक्तुं न शक्यते। कौशिकसूत्रे इम एव मन्त्राश्चूडाकर्मगोदानोपनयनादिविभिन्नेषु पावनेषु संस्कारेषु प्रयुक्ताः सन्ति। ब्लूमफील्डमहाशयस्याशयानुसारं श्रौते गृह्यसूत्रे च प्राचुर्येणैवंविधा मन्त्राः सूत्राणि च समुपलभ्यन्ते, येषु आयुषः, प्राणस्य, वर्चसः, बलस्य, यशसः, कीर्तेश्च विषये, तथा पशूनामन्येषाञ्च पदार्थानां कृते प्रार्थना वर्तते। अथर्वमन्त्रेष्वपूर्वत्वं मौलिकत्वञ्च स्वल्पमेव; यतो ह्यत्रत्या मन्त्रा अन्यास्वपि संहितासु प्रायशस्तद्रूपा एवोपलभ्यन्ते (अथर्ववेद ग्रुण्डरिस, पृ० ६३-६४)।

२-२८; ३-११-३१; ४-९-१०; ५-३०; ७-५३; ८-१; १९-२६ इत्यादय एवंविधा एव मन्त्राः सन्ति। मन्त्रेष्वेष्वग्निः प्रधानो देवोऽस्ति, स आयुःस्वरूपोऽस्ति। स्वास्थ्यस्य लाभाय मृत्योरपाकरणाय च रक्षासूत्राणामप्यतीव महत्त्वमस्ति। दाक्षायणः सुवर्णस्य रक्षासूत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

शतानीकं प्रत्यवभ्रात् (१.३५)। अञ्जनमणेः प्रयोगः ४-६; १६-४४-४५; मौक्तिकस्य शुक्तेश्च सम्प्रयोगः ४-१० इत्यादौ द्रष्टव्यः।

(३) दैत्यान् यातुधानान् शत्रूँश्चोद्दिश्य विहिताः प्रयोगा आभिचारिकाः कृत्याप्रतिहार-काश्चोच्यन्ते। वर्गेऽस्मिन् ते सर्वे मन्त्रा अन्तर्भूता ये प्रतिद्वन्द्वितां सूचयन्ति। यथा दैत्यैर्ग्रहणम् (वर्ग १); राजकर्माणि (वर्ग ६); स्वसन्तापकं प्रति ब्राह्मणानामभिशापः (वर्ग ७); स्त्रीणां प्रतिद्वन्द्विता (वर्ग ४); तथा महोच्चैः पदस्य प्राप्तिः (वर्ग ५)।

अभिचारमन्त्रेषु देवा देव्यश्चाहूयन्ते, येन ते दैत्यानां शत्रूणाञ्च संहारं समाचरन्तु। (२.१४, ३.६; ५-७-८-२८-२६; ६-२-३४; ७-११०) इत्यादि। एषु प्रयोगेष्वपि रक्षासूत्राणि वनस्पतयश्चाभिलषितं फलं साक्षादिव प्रयच्छन्ति। वर्गस्यास्यान्यानि विशदवर्णनानि वेदेषु 'यातुः' इति शीर्षकेण प्रथमेऽध्याये चतुर्थे विभागे वर्णितानि विद्यन्ते। वनस्पतीनामुल्लेखः—४,१७-१६ अपामार्गः; ६,१५ तालाशः; १०,३ वारणवृक्षः; १०,६ खदिरः; १६,२८-३० दर्भाणामित्यादि द्रष्टव्यः। एवम् १,२६ इत्यत्र अभीवर्तस्य; ३-६ इत्यत्राश्वत्थस्य चोल्लेखः।

(४) स्त्रीणां मोहनादीनि कर्माणि स्त्रीकर्माणि प्रोक्तानि। अत्र स्त्रीणां विवाहात् पूर्वस्य, विवाहकालस्य विवाहादनन्तरस्य च जीवनवृत्तस्य वर्णनादिकं भवति। विषयस्यास्य यादृग्वर्णनमथर्वसंहितायां विद्यते, तादृगन्येषु वेदेषु [1]दुर्लभम्।

ईदृशाः प्रयोगा द्विप्रकारका भवन्ति। एके तावद् विवाहेन गर्भधारणेन तथा शिशु-प्रसवेन सम्बद्धाः, अपरे तावत् सपत्नीनां वशीकरणेनाथवा विनाशेन च सम्बद्धाः, तथा प्रियाणां प्रेयसीनां वा सम्मोहनेन संसक्ताः। प्रसङ्गेऽस्मिन्नेवंविधान्यपि मोहनानि सन्ति, येषां प्रयोगेण पुरुषाणां पुँस्त्वराहित्यम्, स्त्रीणां दुर्भगात्वञ्च सम्पाद्यते (६-१३८, ७-६० तथा १-१४)।

विवाहगर्भधारणादिकृते निम्नाङ्किता द्रष्टव्याः —

३-२३, ६-११, १७, ८१ इत्यादि; २,१४,३,१८,७,३५,११३,११४ तथा १-३४; २-३०; ३-२५; ६-८,६,८६,१०२, १२६, १३०-१३२,१३६; ७-३८।

(५) सौमनस्यानि—सहचित्तत्वम्, सौमनस्यं समितौ स्वायत्तत्वं प्रभावशालित्वादि च प्राप्तुं प्रयुक्ता मन्त्राः सौमनस्यप्रकरणान्तर्गताः सन्ति, किन्त्वेतादृशानां मन्त्राणां चतुर्थ-

१. ऋ० सं० १०-८५, १४५, १५९, १६२, १८३; तै० सं० २-३-९-१; मै० सं० २-३-२; तै० ब्रा० २-३-१०; श० प० ब्रा० १४-९-४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

वर्गीयैः सौमनस्यमन्त्रैः सह नास्त्यधिको भेदः। उदाहरणार्थम्—१-३४ मन्त्रस्य प्रयोगः स्त्री-पुरुषयोः परस्परमनुरागसमृद्धयर्थं सभायां प्रभावञ्चावाप्तुं कर्तुं शक्यते। ऋग्विधाने तु १-२-५; २-३५-२; १,६,३; २१-४ स्थलेषु 'हृद्य-संवनन-वशीकरण'शब्दानां प्रयोग उभयविध(४,५)-मन्त्राणां कृते कृतो विद्यते। एते मन्त्रा एकस्य कुटुम्बस्य सदस्येषु सौमनस्यं विधातुम् (३-३०), क्रोधं शमयितुम्, दुर्भावं कलहञ्च दूरीकर्तुम् (६-४२-४३; ६४,७३,७४; ७,५२), सभायां प्रभावं प्राप्तुम् (७-१२), वादे जयमवाप्तुम् (२-२७), कस्यापीच्छामनुकूलयितुं (६-६४) च प्रयुक्ता भवन्ति। ईदृशा मन्त्रा अन्येष्वपि वेदेषु समुपलभ्यन्ते, यथा ऋग्वेदसंहितायाः १०-१६६,१६१, तैत्तिरीयब्राह्मणस्य २-४-४-४ एफ० एफ०, वाजसनेयसंहितायाः ७-२५, शतपथब्राह्मणस्य ४-२-४-२३ इत्यादिमन्त्रा विलोकनीयाः।

(६) राज्येन सम्बद्धाः क्रियाविधयः "राजकर्माणि" इति शीर्षकेण ब्लूमफील्ड-महाशयस्यानुक्रमणिकायां विद्यन्ते। विभागेऽस्मिन् निम्नाङ्कितानां समावेशोऽस्ति—राज्ञोऽभिषेकः (४-८); राज्ञो निर्वाचनम् (३-४); निर्वासितस्य राज्ञः पुना राज्ये प्रतिष्ठापनम् (३-३); अन्येषां भूपतीनामुपर्याधिपत्यम् (४-२२); राज्यशक्तेर्दृढीकरणम् (३-५); ओजः प्रभावञ्च (६-३८); यशः (६-३६); तथा संग्रामे विजयश्च (१-१६, ३-१, ३-२, ५-२०-२१, ६-६७, ६६, ८-८; ११, ६, १०)।

अथर्ववेद ग्रुण्डरिस् पृ० ७४–इत्यत्र ब्लूमफील्डमहाशयः प्रसङ्गेऽस्मिन्नासाम् ऋचां विषये याथार्थ्येनास्मानवगमयति—

यद्यपि सर्वेऽप्येते विषया ऋग्वेदसंहितायामन्यासु च संहितासु प्रकीर्णाः समुपलभ्यन्ते ; विशेषत ऋग्वेदे १०-१०३, १५२, १७३, १७४ तथा ६-४७-२६ एफ् एफ्, ६-७५) इत्यादौ, किन्त्वथर्वसंहितायामेकस्मिन्नेव स्थले प्राचुर्येणोपलभमाना ईदृशा मन्त्रा मानवानां व्यावहारिकेण जीवनेनाथर्वणस्याधिकं तादात्म्यं द्योतयन्ति, राजन्यानां श्रेयसे श्रौतेषु विधिषु राजसूयवाजपेय-सौत्रामण्यश्वमेधादीनां विशेषविधानमेतेषामुपरि निर्दिष्टानां विषयाणामावश्यकं महत्त्वं प्रकटी-करोति। विशेषाणां वाञ्छानां पूर्तये काम्येष्टीनां प्रयोगश्च राज्यसम्बद्धानां विषयाणां लोकप्रियत्वं बहुव्यावहारिकत्वञ्च दार्ढ्येन द्योतयति। अस्मिन् सन्दर्भे तैत्तिरीयसंहितायाः २, १, १३, २-४-१३, तथा माध्यन्दिनसंहितायाः २-१-१२, २-५-३, ८-६ प्रसङ्गा द्रष्टव्याः।

(७) विप्राणां हिताय प्रार्थना अभिशापाश्च—अथर्ववेदे विप्राणामधिकारा विशेषा-धिकाराश्च परमां काष्ठामधिकृत्य प्रस्तुताः सन्ति। तेषामजेयता, तेषामवध्यता, तेभ्यः पुष्कल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

दक्षिणादानस्य च महत्ता विशेषेणोट्टङ्किता; तेभ्यः पुष्कलदक्षिणादानं तु दानप्रशंसयाऽपि समर्थ्यते। यथा चान्यत्र काव्यादौ ब्राह्मणानां शापस्य तैक्ष्ण्यं समुपवर्णितम्, तथैवात्राथर्वणेऽपि विप्रशापस्यातीव प्रभावशालित्वं संदर्शितम् (ब्लूमफील्ड पृ० ७६)। ५-१८-१६ इत्यत्र ब्राह्मणाभिद्रोहिणामुत्पीडकानाञ्च कृते प्राशस्त्येन शापोल्लेखो विद्यते।

३-३-२६, ६-१३-१ इत्यादौ ब्राह्मणा देवा इत्युल्लिखितम्। दक्षिणादानसम्बन्धिनीषु ऋक्षु यज्ञियः पशुः पशुरप्यस्ति, दिव्यं वस्त्वप्यस्ति (४-११, ९-४, १०-१० इत्यादि)। अस्मिन् वर्गे ये प्रार्थनामन्त्राः सन्ति, तेषु श्रुतस्य शास्त्रस्य धारणार्थं (१-१) प्रायश्चित्त्यर्थञ्च (६-१६) निवेदनमित्यादिरस्ति।

(८) ऐश्वर्यमधिगन्तुं विपदं निवारयितुं च ये मन्त्रास्तेषां कृते "पौष्टिकानि" इति शीर्षकम्। अस्मिन् निम्नलिखितानां पदार्थानां कृते प्रार्थनादिकं वर्तते। ऐश्वर्यावाप्तिः, सन्ततिलाभः, पशुप्राप्तिः, गृहम्, क्षेत्राणि, नद्यः, वर्षा, वार्ता, व्यापारः, द्यूतम्, यात्रा, सर्पभयनिवृत्तिः, बाधाप्रशमनम्, दुरदृष्टम् (१-१३, ३-१२, १३, १५, १६, १७, २४, ४, ३, ३८; ६-५५, ५६, ६२, १०६, १२८; ७, ६, ५०; १०, ४ इत्यादिस्थलसङ्केतः)। मन्त्रेष्वेतादृशेषु काम्यानां वस्तूनां प्राप्त्यै सर्वेभ्यो विपद्भ्यश्च रक्षार्थं प्रार्थनाः सन्ति। देवतानामाह्वानं समृद्ध्ये दुरदृष्टनिवारणाय च कृतं बहु विद्यते। अत्रैव जलार्थमपि मन्त्राः सन्ति।

अत्रेदमेव वक्तव्यं यद् ब्लूमफील्डमहाशयस्य "पौष्टिकानि" इति शीर्षके वर्गे विपन्निवृत्तिपराणां मन्त्राणां परिगणनं नोचितम्; वस्तुतो ह्येतत् शान्तिकर्म।

(९) प्रायश्चित्तानि—प्रकरणेऽस्मिंस्ते मन्त्राः परिगणिताः, येषु कृतस्यावस्य मलिनीकरणात्मकस्य कृत्यस्य विशोधनार्थं प्रार्थनादि वर्तते। पापं संक्रमणशीलो व्याधिः। प्रायश्चित्तमन्त्राः सर्वासु संहितासूपलभ्यन्ते। ऋग्वेदसंहितायाम् ७-८९-५, १०-१६, ३, वाजसनेयसंहितायाम् २०-१४-१६; तैत्तिरीयसंहितायाम् ३-९-८-१; माध्यन्दिनसंहितायाम् ४-१४-१७ इत्यादि।

वर्गेऽस्मिन् यागे समन्नानां त्रुटीनाम्, मानसानां पापानाम्, दुष्कृतीनाम्, पाप्मनाम्, पक्षिणां विवाहादिषु ज्येष्ठस्योत्क्रान्तवर्त्तिनां कनीयसां भ्रातॄणाम्, दुःस्वप्नानाम्, दुराचाराणाञ्च विषये प्रायश्चित्तानि विहितानि ६-११४, ४५, ११५, २६, २७, २९, ११२, ४६; ७-११५।

(१०) सृष्टिक्रमात्मका अध्यात्मसम्बन्धिनश्च मन्त्रा अत्र सन्ति। विषयो ह्येष प्रथमेऽध्याये प्रथमे विभागे पूर्वमेवोपवर्णितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(११) संस्कारसम्बन्धिनस्तथा सामान्यमन्त्राः।

(१२) वैयक्तिकं किञ्चिदुद्दिश्य।

(१३) काण्डः २०।

(१४) कुन्तापमन्त्राः।

मन्त्राणामेतेषां विषयेऽत्र विचारो नावश्यकः, अतोऽत्र विस्तरेण परिचयो न दीयते। ब्लूमफील्डमहाशयैः कृता इमे विभागाः साम्प्रतं सर्वैरपि विद्वद्भिरङ्गीक्रियन्ते, किन्तु यथापूर्वमेवास्याध्यायस्य प्रथमे विभागे समुपस्थापिता भारतीया परम्परा अथर्वसंहिताया मन्त्राणां शान्तिपुष्ट्यभिचारा इति त्रीनेव विभागानङ्गीकरोति। यदा वयं पूर्णामिमां संहितामुद्दिश्य चिन्तयामः, तदैवं प्रतीयते यदलब्धानां वस्तूनां प्राप्तिः, विनाशाद् रक्षणम्, दुर्दैववारणमित्याद्येवास्याः संहिताया विषयाः सन्ति। तत्र तावदलब्धस्य लाभः, लब्धस्य परिरक्षणञ्च योगक्षेम, शंयुः, पुष्टिः, शान्तिरिति पदैर्व्यवह्रियते। अधुनाऽस्मिन् मदीये प्रबन्धे प्रथमं तावदहं सर्वासु संहितासु समुपलब्धानां शान्तिपुष्टिकर्मणां विषये किञ्चिद् विचारमुपस्थापयामि। यतो ह्यभिचारकर्मणां द्विविधा प्रवृत्तिः—आत्मनः श्रेयोऽपरस्य हानिरिति, तथा हानेर्विनाशस्य च हेतूनामुच्छेदोऽत्र विचार्यते। अत एषां मन्त्राणामुद्देश्यं प्रायश्चित्तमन्त्रेभ्यः प्रायो न विरुध्यते। प्रायश्चित्तकृत्यान्यशुभानां कर्मणाम्, दुष्टफलानां दुःस्वप्नादीनाञ्च शमनार्थं (शम्) क्रियन्ते, अतः शान्तिरेव तेषां मूलम्। पुनश्चाभिचारकर्माण्यपि शत्रून् दैत्यांश्च शमयन्ति, येन न स्याद्धानिरशुभो वा पुरुषस्य। अत एतेऽभिचारमन्त्राः शान्तिवर्ग एव मयोपस्थापिता अत्र प्रबन्धे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

द्वितीयोऽध्यायः

ऋग्वेदसंहितायां यातुविषयिका सामग्री

इदं पूर्वमेव प्रतिपादितं यद् ऋग्वेदो यज्ञविषयकभारतीयपरम्परानुसारं होतॄणामृत्विजां तथा तत्सहायकानां वेदोऽस्ति, किन्त्वैतिहासिकदृष्ट्याऽस्य वेदस्य बहूनि सूक्तानि विकसित-यज्ञविधानस्य पूर्णरूपेण नियमबन्धनात् पूर्वकालिकानि सन्ति। ऐतरेयब्राह्मण-आश्वलायन-श्रौतसूत्रसदृशा ग्रन्था अस्य वेदस्य सम्पूर्णसूक्तानां तथा ऋचाम् (क्रियात्मकम्) विनियोगं न प्रतिपादितवन्तः, तथाऽस्य वेदस्य सर्वाणि सूक्तानि येन केनापि देवेन सम्बद्धानि सन्ति।

ऋग्वेदस्य यातुविषयकसामग्रीविषये विचारयन्तो वयमिदमनुभवामो यद् ऋषिपुरोहितानां देवतां प्रत्यात्मसमर्पणस्य तथा कृपाकाङ्क्षित्वस्य भाव आसीत्। यत्र कुत्राप्यात्मयथेष्टताया आत्मविश्वासस्य तथा प्रकृतेर्व्यापारं साक्षादेव स्वशक्तिद्वारा प्रभावयितुं भावा दृष्टिगोचरा भवन्ति। तत्रानुपश्यामो यत्तस्य पृष्ठभूमौ कस्या अपि दिव्यशक्तेः पूर्णविश्वासस्य भावना जागर्ति, या हि वक्तरि ऋषौ वा दृढामिच्छाशक्तिमुत्पादयति।

ऋग्वेदस्य ऋषिपुरोहितो विश्वसिति यद् दिव्यशक्तयः प्रार्थनामुत्तरयन्ति, तथा प्रार्थनया तासामनुग्रहः प्राप्तुं शक्यते। अयं विश्वासस्तेषु दृढामिच्छाशक्तिमुत्पादयति, तथा ते स्वं यत्किमपि कार्यं कर्तुं सम्पादयितुं पर्याप्तरूपेण सामर्थ्यमनुभवन्ति। इदं तथ्यमनुभवन्नेव ऋषिर्वामदेव ऋग्वेदस्य ४,४,११ मन्त्रे कथयति—"महो रुजामि बन्धुतावचोभिः तन्मा पितुर्गोतमादन्वियाय"। यानि सूक्तानि पाश्चात्यविद्वद्भिर्यातुविषयकाणि प्रोक्तानि, तान्यपि दिव्यशक्तीः प्रत्यादरभावं प्रदर्शयन्ति। ऋग्वेदस्य साम्प्रतिकमध्ययनमिदं स्पष्टयिष्यति यदस्मिन् वेदेऽपि तादृश्यः सामग्र्यः सन्ति, याः शान्तिपुष्ट्यभिचारनामभिर्व्यवह्रियन्ते, तथा या अथर्ववेदस्यैव प्रमुखसामग्र्योऽव-बुध्यन्ते स्म।

१—पुष्टिविषयका मन्त्राः

(अ) रोगेभ्यो मुक्तिस्तथा स्वास्थ्यलाभः (भैषज्यानि)।

ऋग्वेदसं० १,५० सूर्यमभिलक्ष्य प्रशंसा। यत्र स "विद्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः पश्यन् जन्मानि सूर्य" (मन्त्र ७) कथितः। अन्त्यास्त्रयो मन्त्रा रोगहारकाः सन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

एकादशे मन्त्रे सूर्यो हृद्रोगं पाण्डुरोगं च शरीराद् दूरीकर्तुं प्रार्थ्यते। द्वादशे मन्त्रे ऋषिः कथयति यत् स पीतिमां शुकेषु, सारिकासु, हारिद्रवृक्षेषु च स्थापयति। अन्त्ये मन्त्रे स कथयति यद् आदित्यदेवस्तच्छत्रुं (रोगं) तस्य वशे करोति, तथा प्रार्थयते यत् स शत्रुभ्यो रक्षतु।

यातुविषयकक्रियासु रोगं दूरीकर्तुं तं चेतनेऽचेतने वा पदार्थे स्थानान्तरणप्रवृत्तिर्विश्वव्यापिन्यस्ति। अत्र ऋषयो न केवलं देवतासु, अपि तु स्वक्रियायाः शक्तावपि विश्वसन्ति।

१-१९१, अत्र ऋषिः सर्पाणां पितुः, मातुः, भ्रातुः, दुहितुर्विषये[1] कथयति, तथा सूर्यमदृश्यसर्पाणां विनाशकरूपेण[2] प्रस्तौति। सायणः १०-१६ मन्त्रम् "विषनिर्हरण्युपनिषद्" इति नाम्ना व्यवहरति। स कथयति यदियमुपनिषद् ऋषिरगस्त्यो विषाक्रान्तः सन् सविषकीटानां विनाशकरूपेणोदचारयत्।

१०, १६ मन्त्रो वक्तुर्दृढामिच्छां व्यनक्ति, यथा—"सूर्ये विषमा सजामि", "दृतिं सुरावतो गृहे सो चिन्नु न मराति नो वयं मरामारे अस्य योजनम्" (मन्त्रः १०)। शकुन्तिकापक्षी तथा अग्नेः सप्तजिह्वानां प्रत्येकं त्रयो वर्णा विषस्य भक्षणं कुर्वन्ति, तथा विषनाशिन्यः ९९ नद्यस्तथा ९१ मयूर्यो विषं नाशयन्ति।

१५ मन्त्रे ऋषिः कुसुम्भकम् "इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना" इत्यादिशब्दैर्भर्त्सयति। यदि स विषस्य चिकित्सां न करिष्यति, तदा स तं पाषाणखण्डैर्मर्दयिष्यति[3]। तदा भयभीतः स कुसुम्भकः समागत्योद्घोषयति यद् विषः प्रभावहीनः समजायत[4]। १०, १३ मन्त्रे "सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार" इत्यावृत्तिरिदमभिव्यञ्जयति यद् वक्तुः शक्तिर्भगवति सूर्ये तस्य निष्ठया पोषिताऽस्ति। अस्य सूक्तस्य कतिपयमन्त्राणां भावोऽस्पष्टः।

७, ५० अयं विविधप्रकारकविषापनोदनार्थम्। प्रथमे मन्त्रे द्वौ भिन्नौ ध्वनी स्तः। ऋषिर्विषात् त्रातुं मित्रं तथा वरुणं संस्तौति, तथा तत्कालमेवेदं वक्ति—

---

१. मन्त्रः ६।

२. मन्त्राः ६–८।

३. "इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना" इत्यादिः।

४. वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

"अजकावं दुर्दशीकं तिरोदधे मा मा पद्येन रपसा विदत्त्सरुः"। अन्येषु त्रिपु मन्त्रेषु पुनर्विश्वेदेवास्तथा नदीविषनिवारणार्थाय तथा ऋषिं रोगरहितं कर्तुं प्रार्थ्यन्ते। १०–९७ परम्परात इदं सूक्तं ज्वरचिकित्सार्थं प्रयुज्यते। ऋषिरोषधिं गृहीत्वा एकं रोगार्तमुपचर्तुं कृपाप्राप्तये सहस्रशक्तिभिः सम्पन्नान्योषधिमूलानि (मन्त्रः २) प्रशंसते। तानि 'माता' इति शब्देन (मन्त्रः ४) तथा सोमेन, अश्वेन, पोषणेन तथा शक्तिदायिसामर्थ्येन सम्पन्ना देव्य इति शब्दैः सम्बोधयति (मन्त्रः ७)। येन तस्य प्रशंसां श्रुत्वा सर्वा ओषधयः स्वां स्वां शक्तिम् ऋषि-करनिहितौषध्यां तामधिकशक्तियुक्तां कर्तुं समर्पयन्तु (मन्त्रः २१)। स शपथपरिणामाद् वरुण-यमयोः पाशाभ्यां देवताः प्रति कृतापराधेभ्यो मुक्तये प्रार्थयते (मन्त्रः १६) ओषधीनां कथनेन "यं जीवमश्नवामहै न स रिष्यति पुरुषः" (मन्त्रः १७) इत्यनेन प्रोत्साहितो भूत्वा ऋषिराचष्टे–हस्ते ओषधिग्रहणेन रोगा दूरीभवन्ति। स आदेशात्मकस्वरे रोगान् दूरे गन्तुं कथयति (मन्त्रः १३)। स स्वत एव नष्टौषधिभ्यो रोगिणः पशूंश्च रक्षयितुम् (मन्त्रः २०) तथा तेषां हानिप्रदेच्छुकान् दमयितुं प्रार्थयते (मन्त्रः २३)।

अनेन सूक्तेनेदं स्पष्टं यद् ऋषयो मन्त्रैः सहौषधीनां प्रयोगेण चिकित्साकार्यं सम्पादयन्ति स्म (मन्त्र ६.२२), विनिमयरूपेण च पशून् वस्त्राणि धनानि च प्राप्नुवन्ति स्म (मन्त्र ४, ८)।

१०–१३७ अयं रोगं दूरीकर्तुं तथा स्वास्थ्यप्राप्तयेऽस्ति। १–३ मन्त्रे देवान् वायुं च पतितं जनमुद्धारयितुं नीरोगयितुं च प्रार्थयते। ४ मन्त्रे देवतानां दूतरूपो वायुः शान्ति-करौषधिभिः सह शान्तिं प्रदातुं स्वागमनमुद्घोषयतीत्यादि। ५, ६ मन्त्रयोः ऋषिर्देवता मरुद्गणान् जलं च रोगापनयनाय प्रार्थयते। ७ मन्त्रे पीडाशान्तये हस्तस्पर्शक्रियां वर्णयति[१]। एवं रोगापनयनाय देवतानां प्रार्थनां कुर्वन् सहैव हस्तस्पर्शक्रियां कुर्वन् मन्त्रानुच्चारयति।

१०, १६१ क्षयरोगापनयनायास्ति। प्रथमे मन्त्रे ऋषिः कथयति यत् स स्वप्रदत्त-हविषः शक्त्या यक्ष्माणं नाशयति। अस्मिन्नेव मन्त्रे स देव्यै सहायतायै अपि प्रार्थयते। तृतीये तथा पञ्चमे मन्त्रे स स्वशक्तेर्गर्वोक्तिपूर्णां प्रशंसां कुर्वन् कथयति यत् स रोगिणो जीवनस्य रक्षा-मकरोत्, तथा स्वयमेव तस्मै नवीकृतयुवावस्थां प्रादात्। किन्तु ३–४ मन्त्रयोरस्मिन् कर्मणि

---

१. हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देवानपि हेतुत्वेनोपन्यस्यति। अत इदं स्पष्टं यद् रोगाणामुन्मूलनम् ऋषेस्तथा देवतानां संयुक्त-प्रयत्नेन जातम्। यद्यप्यस्य सूक्तस्य स्वरूपं विशुद्धं प्रार्थनापरम्; तथाप्यस्योद्देश्यम् ऋग्वेद-सं० १०–९७ इत्यस्य सदृशमस्ति।

१०–१६३ यक्ष्मणो विरुद्धे उद्दिष्टमस्ति। अत्र कस्यापि देवस्य प्रार्थना नास्ति। वक्ता स्वशक्तावेव विश्वसिति। स रोगिणः शरीराद् रोगमापादमस्तकादङ्गप्रत्यङ्गादपनयति।

वर्षा

७–१०३ अत्र मण्डूकानां स्तुतिस्तथा तेषां क्रियाणां स्वभावानां चातीव चित्ताकर्षकं वर्णनमस्ति। अनेन स्पष्टीभवति यद् वैदिकर्षयोऽतीव सावधानतया परितः प्रकृतेर्निरीक्षणं कुर्वन्ति स्म। वर्षारम्भसमये युगपत् 'टर्र-टर्र' ध्वनिं कुर्वतां मण्डूकानां तुलना वेदविषयकान् स्वपाठान् अभ्यस्यद्भिश्छात्रैरक्रियत। यदा वृष्टेर्बिन्दवः शुष्कदृतिवत् स्थिते मण्डूके पतन्ति, तदा आह्लादपूर्णं ध्वनिं कुर्वन् अन्यमण्डूकसमीपं गच्छति, तथा तस्य स्वागतं करोति। अन्ते च विविधानां मण्डूकानां वर्णनमुदारतया उपहाराणां यथा धनगोदीर्घायुःप्रदातॄणां रूपेण कृतमस्ति।

सायणानुसारमस्य सूक्तस्य पाठो वर्षणं वाञ्छद्भिर्जनैः कर्तव्यः। मैक्समूलरस्यानुसार-मिदं पुरोहितेष्वेकं व्यङ्ग्यमस्ति। के० आर० पोद्दारमहोदयः ७, १०३; ३, ५३ इत्यनयोः साम्यस्य तथा सम्पूर्णे ऋग्वेदे मण्डूकानां तथाङ्गिरसानां कृततुलनयेदमभिव्यनक्ति यत् प्रस्तुते सूक्ते देवकल्पितानां मण्डूकानां स्तुतिः, ऋग्वेदसं० ३–५३ अत्रत्यानामाङ्गिरसानां समानानां धनदातॄणां रूपेण कृताऽस्ति, यतो हि वृष्टिः समृद्धिं प्रत्यग्रे सारयति, स इदं सूक्तं वर्षाकालस्या-रम्भे क्रियमाणसहस्रसावनामकानुष्ठानस्य समये लिखितमस्तीति मन्यते।

अस्मिन् सूक्ते देवापिः (स्वभ्रातुः) शन्तनोः कृते वृष्ट्यै पौरोहित्यं करोति। मैकडानलोऽत्र[1] यातुकर्म [2]लक्षयति, यतो हि देवापिरादौ वृष्ट्यै देवान् प्रार्थयितुमिच्छन्नप्यन्ते स्वयमेव स्वयज्ञशक्त्याः प्रभावेण वृष्टिमुत्पादयति। ५–६ मन्त्राभ्यां वृष्टेराकर्षणे देवापेः सफलता वर्णिता। अत्रैव सम्भवतो मैकडानलो भ्रान्तः। इमे मन्त्राः स्वसंदर्भात् पृथक्कृत्यावलोकिता यातु-सम्बन्धिनः प्रतीयन्ते, किन्तु यदा वयमेतेषां मन्त्राणामध्ययनमखिलसूक्तसन्दर्भं मनसि निधाय

१. एन्साइक्लोपीडिया ऑफ रिलिजन एण्ड एथिक्स ८—पृ० ३११–२१।

२. स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

कुर्मः, तदाऽनुभवामो यद् देवापिर्मित्रवरुणादिविविधदेवैः सह बृहस्पतिं पर्जन्यद्वारा वृष्ट्यै तथा स्वस्मै तादृशीं वाणीं मन्त्रं वा प्रदातुं प्रार्थयते, येन वर्षणं भवेत्। द्वितीये मन्त्रे बृहस्पतिः स्पष्टं कथयति यत् स तस्य मुखे एकां दीप्तिमतीं वाणीं स्थापयति। चतुर्थे मन्त्रे वृष्ट्यै इन्द्रो याचितः। सप्तमोऽपि मन्त्र इदमेव स्पष्टयति यद् यदा देवापिर्होतृरूपेण बृहस्पतिं प्रार्थितवान्, तदा बृहस्पतिर्देवतापर्यन्तं प्रापिकां तथा वृष्टिप्रदायिनीं वाणीं प्रादात्। ८, ९, १० मन्त्रेषु हविर्ग्रहणाय वृष्ट्यै चाग्नेर्मार्मिक्यः प्रार्थनाः सन्ति, अन्ते शत्रून्, रोगान्, कष्टान् राक्षसांश्चापसारयितुं वृष्ट्यै च प्रार्थनाः सन्ति। इत्थमिदं सूक्तं स्पष्टयति यद् देवापिर्देवानां माध्यस्थ्येन तथा तेषां साहाय्येन वृष्टेरानयने समर्थो भवति, न तु स्वनियामकशक्त्या।

एवमेवान्यान्यपि बहूनि सूक्तानि भौतिकसुखप्राप्त्यै सन्ति, यानि प्रार्थनापराणि सन्ति तथा नियामकभाषां न प्रयुञ्जते।

कृषिः

४, ५७ अत्र हि क्षेत्रपतिः, शुनः, शुनासीरस्तथा सीता इत्येतेषु कृषेरङ्गभूतेषु चेतनत्वमारोप्य तानुद्दिश्य तथा पूषणम्, इन्द्रम् एवं पर्जन्यमित्येतानुद्दिश्येयं प्रार्थना साधुकृषिफलाय, कल्याणाय, समृद्ध्यै च सम्बोधिता अस्ति। अस्य सूक्तस्य चतुर्थे तथाऽष्टमे मन्त्रे आद्यासु तिसृषु पङ्क्तिषु स्पष्टत एव प्रभावयितुं यत्नः परिलक्ष्यते। अवशिष्टा मन्त्राः प्रार्थनापराः सन्ति।

भयम्, दौर्भाग्यम्, अपशकुनादयः

(क) स्वापनमन्त्रः

७, ५५ अयं गृहस्य सर्वाः पुरुषस्त्रीः स्वापयितुं रिरंसुपुरुषस्य गीयमानो यातुमन्त्रोऽस्ति, येन स शान्त्या निर्मक्षिकं स्वप्रेयस्या सह सम्मिलितुं प्रभवेत्। अस्य सूक्तस्य विषये सायणो द्वे कथे प्रतिपादयति। प्रथमा—वसिष्ठो वरुणस्य गृहे स्वपितुं रात्रावागच्छति, तथाऽस्य सूक्तस्य पाठं बुक्कतः कुक्कुरान् स्वापयितुमकरोत्। द्वितीया—त्रिभिर्दिवसैर्बुभुक्षितो वसिष्ठो वरुणगृहे चोरयितुं प्रविष्टः, तथा रक्षापुरुषान् अस्वापयत्। एतदनुसारमस्य पाठश्चौरैः सन्धिच्छेदकैः कर्तव्यः।

ग्रिफिथमहोदयस्यानुसारमिदं सूक्तं त्रिभिः पृथक् पृथक् खण्डैर्विरचितम्। मन्त्राः—१; २-४ तथा ५-८। प्रथमे मन्त्रेऽमीवहानामकः (रोगनाशकः) वास्तोष्पतिर्गायकं प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

मैत्रीभावं प्रदर्शयितुमामन्त्र्यते । २-४ मन्त्रयोः सारमेयं स्वमन्त्रशक्त्या प्रभावयन् निर्दिशति यत् स इन्द्रस्य भक्तान् प्रति न, अपि तु चौरान् प्रति बुक्कतु[१] । ५, ६, ८ मन्त्रेषु ऋषि-र्मातरं पितरं कुक्कुरम्, इतस्ततः परिभ्रमतः सर्वान् प्राणिनः स्वापयितुं स्वेच्छाशक्तिविषये दृढं विश्वासं प्रकटयन्नादेशात्मके स्वरे ब्रवीति[२] । ७ मन्त्रे इदमभिप्रैति यदृषिर्न सर्वान् प्राणिनः, अपि तु चन्द्रमपि स्वापयिष्यति[३] ।

मृत्युः

१०, ५८ सूक्तं मनस आवर्तनेन सम्बद्धमस्ति[४] । अयं मृत्युतुल्यप्रतीयमानायां मूर्च्छायामासज्यमानव्यक्तेश्चेतनां प्रत्यावर्तयितुं यातुमन्त्रः प्रतीयते, येन स अस्मिन् जगति वर्तेत । मनो यमस्वर्गपृथ्वीषु चतुर्दिक्षु तथा चेतनाचेतनपदार्थेषु गतमस्ति । अत्र आदेशात्मको ध्वनिरस्ति । अतः परं द्वे सूक्ते १०, ५९ तथा १०, ६० अनेनैव सम्बद्धे स्तः । १०, ५९ (१-४) इदं सूक्तं मृतस्य सुबन्धोर्भ्रातृभिर्मृत्योस्तथा विनाशस्य देव्या

---

१. एषु मन्त्रेषु के० आर०पोद्दारमहोदयानुसारम् (ऋग्वेद में, यश, पृ० २३६) "निषु स्वप" एकोऽनुबन्धोऽस्ति ।

२. "सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः" (मन्त्र ५) इत्यादिः ।

३. सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् । तेना सहस्येना वयं नि जनान्स्वापयामसि ॥
ग्रिफिथमहाशयानुसारेण "सहस्रशृङ्गो वृषभः" इत्यस्य पदस्यार्थः सूर्योऽस्ति, यस्यास्तकालो निद्राविश्रामयोः कालस्यागमनं सूचयति, परमत्र 'तेन' इत्यस्मिन् शब्दे करणकारकः सहार्थे प्रयुक्तोऽस्ति । चन्द्रमा अपि सहस्रशृङ्गः सहस्ररश्मिश्चेति विशेषणाभ्यां सम्बोधितोऽस्ति । उदाहरणार्थम्—वाल्मीकीयरामायणे सुन्दरकाण्डे २, ५४ तथा ५५ स्थलानि विलोकनी-यानि । अत उक्तमन्त्रस्यायं सरलार्थो यत् सहस्रशृङ्गेण चन्द्रमसा सहैव गृहजनाः शाययिष्यन्ते ।

४. बृहद्देवतायाम् ७, ८४–९० इत्यत्रास्य सूक्तस्य विषये निम्नलिखिता कथा वर्तते । शत्रुणा आहतः सुबन्धुः स्वां चेतनां संमोहनेन हृतवान् । इक्ष्वाकुवंशीयो राजा असमातिः किराताकुलिनामकौ द्वौ ब्राह्मणौ स्वपौरोहित्ये नियोजितवान् । इमौ पुरोहितौ कपोतरूपं धारयित्वा गोपायनमाक्रम्य स्वमायायोगाभ्यां सुबन्धुं क्राम्यतः स्म, सुबन्धुर्मूर्च्छितः । इमौ पुरोहितौ सुबन्धोः प्राणान् गृहीत्वा राज्ञः समीपं ययतुः । तदा सुबन्धोस्त्रयो गोपायनभ्रातरः सुबन्धोरात्मानं परावर्तयितुं १०, १७–५८ सूक्तान्यपठन् । इत्थं बृहद्देवतानुसारमिमानि सूक्तानि सुबन्धोरात्मनः (जीवस्य) परावर्तनेन (अथवा मनसः प्रशंसया) सम्बद्धानि सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

नैर्ऋतेर्विषये गीतम्। प्रत्येकं मन्त्रेषु "परातरं सु निर्ऋतिर्जिहीताम्" इत्यस्यावृत्तिः कृता वर्तते। मृत्यो रक्षणार्थं सोमोऽपि प्रार्थितः।

१०, ६० (७०-१२) सप्तममन्त्रस्य[1] विविधा व्याख्या क्रियते। परम्परानुसारमत्र 'माता' तथा 'पिता' इत्यनयोः शब्दयोरर्थः 'अग्निः' अस्ति, यो हि सुबन्धोः सम्बन्धिनां प्रार्थनां श्रुत्वा सुबन्धुं जीवयामास। लुडविगमहोदयस्यानुसारमत्र स्वयमृषिरेवार्थः। विल्सनमहोदयोऽस्य व्याख्यामित्थं करोति—सुबन्धो तव माता पिता तथा पुत्रस्तव मृत्यौ विलापार्थं समागताः।

इमे मन्त्रा यातुमन्त्राः प्रतीयन्ते। सम्पूर्णे सूक्तेऽग्नेः कुत्राप्युल्लेखो नास्ति। १ इत्यतः ६ पर्यन्तं मन्त्राणामनुगतानाम् ७ इत्यतः १२ मन्त्राणां कोऽपि स्पष्टः सम्बन्धो नास्ति। ऋषिः स्वकीयमहदद्भुतकर्मणः शक्तेश्च श्लाघां करोति यत् स सुबन्धुमुज्जीवयितुं यमसकाशादानीतवान्। मृतकस्य शरीरे करं चालयन् स कथयति—यथा "वायुरुच्चैः नीचैरतति तथैव तव पीडा तथा क्लेशः नीचैर्गच्छताम्"। गायकस्य ऋषेः हस्तस्पर्शोऽतीव स्वास्थ्यदायिनी शक्तिरस्ति।

(स) अपशकुनानां निष्कृतिः

२-४२-४३ इमे द्वे प्रार्थने पक्षिणामप्रियध्वनिं श्रुत्वाऽपशकुनस्य निष्कृत्यै प्रयुज्येते। अयं कपिञ्जलः पक्षिरूपिणमिन्द्रं प्रति सम्बोधित इति कथ्यते, किन्त्विदं विशिष्टं नाम सूक्ते कुत्रापि नोपलभ्यते।

४२ मन्त्रे कुशलवृत्तार्थं सुरक्षार्थं च दक्षिणाभिमुखीभूय विलपन् पक्षी प्रार्थ्यते।[2] ४३ सूक्तेऽपि सर्वत्र समृद्धिं सौभाग्यं चादातुं पक्षी प्रार्थ्यते, येन स सभायां वीरैः सहोच्चैर्वक्तुं शक्नुयात्। अत्र पक्षिणस्तुलना मन्त्रमुच्चारयतोद्गातृपुरोहितेन सह कृता।

१०-१६४ इत्यस्योपयोगो दुःस्वप्नानां दुष्परिणामानां विनाशार्थं कृतः। ऋषिर्दुःस्वप्नांस्तेषां परिणामांश्च दूरीकर्तुमाकाङ्क्षते। स दुःस्वप्नान्[3] प्रार्थयति, तथा

१. अयं मातायं पितायं जीवातुरागमत्। इदं तव प्रसर्पणं सुबन्धवेहि निरिहि॥

२. अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः॥ मन्त्रः ३

३. अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः॥ [मन्त्रः १]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देविकीं सहायतामिच्छति। चतुर्थे मन्त्रे शत्रुभिः कृतया हान्या सुरक्षां प्राप्तुं प्रचेताङ्गिरसोऽपि आहूयते। पञ्चमो मन्त्रोऽनया घोषणया इच्छया च सह समाप्यते यदृषिः स्वपातकानि विजित्य तैर्मुक्तो भवति तथा तस्य ते दुर्विचारास्तस्य समीपे गच्छन्तु येभ्यः स ईर्ष्यति।

१०–१६५ अपशकुनकारकपक्षिण[1] आगमनेनोत्पन्नानां दुष्परिणामानां निराकरणाय कृतायां निष्कृतौ तथा प्रार्थनायाम् (१ मन्त्रो द्रष्टव्यः) अयं पक्षी अभ्यर्थ्यते। (द्रष्टव्यः १ मन्त्रः) ऋषिरग्निः सर्वा देवता यमं च प्रार्थयते यत्ते तस्य आहुत्या प्रसन्ना भूत्वा पक्षिणं दूरीकुर्युस्तथा तस्यागमनेन तस्य परिवारस्य पशूनां च हानिर्न भवेत्। अन्ते च स अन्नस्य तथा पश्वादीनां प्राप्त्यै प्रार्थयते। यद्यपि सूक्तस्य २, ४२–४३ तथा १०–१६४–१६५ इत्यत्र प्रार्थनातत्त्वमस्ति; तथापि मया तेषां समावेशोऽत्र शकुनानां तथा भाविसूचकानां लक्षणानां च प्रसङ्गे कृतः।

(घ) अलक्ष्मीनाशः

१०–१५५ (१-३) इदं सूक्तं दुर्भाग्यनिराकरणे प्रयुक्तमस्ति। प्रथमे मन्त्रे वक्ता कुरूपाम् अरायिनीं दुष्टात्मानं राक्षसीं पर्वतोपरिगन्तुमादिशति। स तां शिरिम्बिठस्य[2] शक्त्या दूरं निर्गमयति। तां दूरे प्रापयितुं बृहस्पतिः प्रार्थ्यते (मन्त्रः)। तृतीये मन्त्रे स तां नद्यां चालकविहीने काष्ठफलके स्थित्वा दूरे गन्तुं कथयति[3]।

(ङ) स्त्रीकर्माणि

५,७८ इदं सूक्तं भागद्वयेन निर्मितमस्ति। १-६ मन्त्रेषु प्रार्थना अस्ति। ७-९ मन्त्रेषु सुरक्षितप्रजननार्थं यातुमन्त्राः सन्तिः। सायणानुसारमिदं सूक्तं गर्भस्राविण्युपनिषदस्ति। १-३ मन्त्रेषु सप्तवध्रिणा अश्विनौ सोमग्रहणाय आहूतौ, ४-६ मन्त्रेषु स अश्विनोर्भूतकाले कृतां सहायतां स्मरति[4]। ७-९ मन्त्रेषु दशमासकस्य शिशोर्जीवितावस्थायां सुरक्षितोत्पत्ति-

---

१. कपोतोलूकयोर्नामनिर्देशोऽस्ति। प्रथमे मन्त्रे कपोतो निर्ऋतेस्तथा चतुर्थे मन्त्रे यमस्य दूतो कथितः।

२. अरायि काणे विकटे गिरिं गच्छ सदान्वे।
शिरिम्बिठस्य सत्त्वभिस्तेभिष्ट्वा चातयामसि॥

३. अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम्।
तदा रभस्व दुर्हणो तेन गच्छ परस्तरम्॥

४. परम्परानुसारेणाश्विनौ सप्तवध्रये पेटिकयोर्बहिर्निगमनस्य सामर्थ्यमदत्ताम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वर्ण्यते[1]। एच० डी० वेलङ्करमहोदयः[2] १.६ तथा १-६ मन्त्राणां सम्बन्धविषये समुचितं समादधात्। तदनुसारं सप्तवध्रिणा अश्विनौ स्वयज्ञे सोमपानार्थमामन्त्र्येते। तदानीमेव स्वस्मै तथा स्वपत्न्यै दत्तां तत्सहायतां स्मरति[3]। ७-६ मन्त्रेषु सप्तवध्रेः पत्न्या वध्रिमत्या मूढगर्भविषये उक्ता अश्विनोः शब्दाः सन्ति। अन्ते त्रयो मन्त्राः स्पष्टरूपेण सप्तवध्रये कारागाराद् मुक्तिप्रदानवत् सुरक्षितप्रजननाय यातुमन्त्राः सन्ति।

१०-१४५ सूक्ते सपत्नीभ्यो मुक्तये यातुमन्त्राः सन्ति। इदमेकामत्यन्तप्रभावशालिनीं देवप्रेरितामोषधिमुन्मूलयितुं निर्दिशति। येनैका महिला स्वसपत्नीं विजित्य दूरे निर्गमयति, तथा पत्यौ एकाधिकारं प्राप्नोति। अस्मिन् सूक्ते यातोः (मैजिक) तत्त्वं सुस्पष्टं परिलक्ष्यते।

१०-१५६ सूक्ते सफलकामायाः पत्न्याः (इन्द्राणी-अनुक्रमणिकानुसारम्, सम्भवतोऽस्य सूक्तस्य चतुर्थमन्त्रे उल्लिखिते इन्द्रप्रसङ्गे भ्रमोऽस्ति।) सपत्नीषु प्राप्तविजयाया गीतानि सन्ति। सा अतीव प्रसन्ना यत् तस्याः पतिस्तदीयेच्छावशवर्ती जातः। तस्या गीतस्तस्याः पतिमविष्टितोऽस्ति[4]। चतुर्थे मन्त्रे सा रहस्यमुद्घाटयति यत् सा तामिष्टिं समपादयद् अथवा आहुतिमददाद् यया इन्द्रो यशस्वी तथा महान् अजायत[5]। सा एतस्य सपत्नीबाधनकार्यस्य सम्पादनं स्वपतिं जनतां च वशीकर्तुमकरोत्[6]। अत्र यज्ञस्य आहुत्या वा, शक्त्या नियमनेन वा सफलकामा पत्नी स्वप्रतिस्पर्धिषु विजयं प्राप्नोति, न तु देवतानां सहायतया।

१०-१६२ सूक्तं गर्भस्रावनिवारणार्थमस्ति। १-२ मन्त्रयो रक्षोहा अग्निः प्रार्थ्यते यद् गर्भस्य तथा योनेर्दुष्टं नाम (अमीवा दुर्णामा) दूरं करोति। ३-६ मन्त्रेषु कस्या अपि देव्याः

---

१. यथा वातः पुष्करिणीं समिङ्गयति सर्वतः। एवा ते गर्भ एजतु निरैतु दशमास्यः॥

२. ए वाल्युम ऑफ स्टडीज इन इन्डोलाजी, प्रेजेन्टेड टु पी० वी० काणे पृष्ठ ५४८-४९।

३. असुराः सप्तवध्रिमेकस्मिन्नग्निकाण्डेऽक्षिपन्। अस्मिन् प्रसङ्गे ऋ. वे. सं. १.५१.३, ११२.७, ११७.३;८.७५.३;१०.३९.९ इत्यादीनि द्रष्टव्यानि भवन्ति।

४. पत्यौ मे श्लोक उत्तमः।

५. येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः।
इदं तदक्रि देवा असपत्ना किलाभुवम्॥

६. यथाहमस्य वीरस्य विराजानि जनस्य च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सहायताया निर्देशो नास्ति, तथा वक्तुरिच्छाशक्तेः प्रभावः परिलक्ष्यते। ये दुष्टात्मानो विविधैः प्रकारैः स्त्रीगर्भं प्रति बाधां प्रापयन्ति, वक्त्रैव तेषां नाश इत्यत्र कथितम्[1]।

१०-१८३ सायणानुसारं पत्नी प्रथमं मन्त्रमुच्चारयति, यजमानो द्वितीयम्, अथ च होता तृतीयम्। लुडविग्महोदयस्त्विदं सम्यग् विचिन्तयति यदग्निः सम्पूर्णस्य सूक्तस्य शंसकोऽस्ति। तत्र प्रथमद्वितीययोर्मन्त्रयोरपत्यावाप्तये आशीर्वचनमस्ति। तृतीयमन्त्रेऽग्निरुद्घोषयत्यात्मानं सर्वस्य बीजस्य रक्षकं तथा पृथिव्यां प्रजातन्तोः प्रवर्तयितारञ्च—

अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः।
अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान्॥

यद्यस्य प्रयोगः शिशोः सुखप्रसवायैव क्रियेत, तर्हि मन्त्रोऽयं केवलं यातुरेव स्यात्।

शत्रुविद्वेषिणो मन्त्राः

३–५३ अस्य ऋषिर्विश्वामित्रः। तत्र पञ्चदशो मन्त्रो यातुसम्बन्धिनं प्रसङ्गं द्योतयति। मन्त्रस्यास्य विषये सायणाचार्यः पुराविद्भिः प्रकथितमितिहासमेकमुद्धरति—सुदासस्य यज्ञे विश्वामित्रः स्वप्रतिस्पर्द्धिनो वसिष्ठस्य पुत्रेण शक्तिनामकेन स्वबलवाग्भ्यां विरहितः कृतः, पुनः जमदग्निना प्रदत्तया सूर्यलोकाहृतया ससर्पर्या वाण्या स्वबलवाचौ प्राप्तवान्। बाधमाना इत्यन्तिमशब्दस्य व्याख्याविषये विदुषामैकमत्यं नास्ति। सायण इदम् 'अज्ञानम्' मनुते। श्रीलुडविक् तथा श्रीराथः ससर्परीं रणतुरीं मन्येते, या हि योद्धॄन् प्रोत्साहयति, तथा तेभ्यः शत्रुभयमपाकरोति। श्रीयुद्ग्रासमनमतेन ससर्परी एका॰ कामदोग्ध्री गौरस्ति। ग्रिफिथोऽन्यव्याख्यापेक्षया सायणस्य व्याख्यामुत्तमां मन्यते, किन्त्विदमपि कथयति यदियमप्यधिका सन्तोषजनिका नास्ति।

यदि वयम् 'अमतिम्' शब्दस्यान्वर्थव्याख्यां कुर्मस्तदा सर्वं स्पष्टं भवेत्। अस्य सिद्धिः 'मन्' (१० आ०) धातुना प्रार्थनार्थकेन जाता। इत्थं ससर्परी एको मन्त्रोऽस्ति। एवं च विश्वामित्रः स्ववाक्शक्त्यभावे स्वमनस्येवास्य पाठमकरोत्, तथा पुनः स्वीयां वाक्शक्तिमलभत। शक्तिः (वसिष्ठपुत्रः) तस्योपर्यभिचारप्रयोगेण[2] तं वाग्घीनमकरोत्।

---

१. यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम्।
जातं यस्ते जिघांसति तमितो नाशयामसि॥ इत्यादिः।
(मन्त्रः ३)

२. हिन्दीभाषायामिदम्–'मूठ मारना' इति कथ्यते। इदं वाण्या अवरोधस्यैकमुदाहरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अस्मिन् सूक्ते २१–२४ मन्त्रेषु वसिष्ठं प्रति शापो वर्णितः। यथा पूर्वमुपवर्णितं निरुक्तस्य ४–१४ अनुसारं वसिष्ठकुलोद्भवा अद्यापीमान् मन्त्रान् न शृण्वन्ति। अत्र कुत्सितप्रतिद्वन्द्विनो मृत्यवे [1]इन्द्रः प्रार्थितः। वक्ता वाञ्छति यत्तस्य प्रतिस्पर्द्धी शिम्बलः पुष्पवत् छिन्नो भवेत्, तथा स स्वमुखात् फेनमुद्गमेदित्यादि[2]। अत्र स्वशत्रूणां नाशाय ऋषिरिन्द्रेण सहायतां याचते।

७–१०४ आद्योपान्तं पिशाचानां दुरात्मनां राक्षसानां यातुधानानाञ्च कृते शापेन युक्तमस्ति। इन्द्रः सोममग्निञ्च सोमपेषकेण मुसलादिना इमान् दुष्टात्मानो ज्वलयितुं पेष्टुं तथा मर्दयितुं निवेदितः। षष्ठे मन्त्रे ऋषिरिन्द्रं सोमं च तथैव नियन्त्रयितुमिच्छति, यथा महापराक्रमौ अश्वौ कक्ष्यया वशीक्रियेते।

अस्मिन् सूक्ते शापार्थशब्दा अत्यन्तं रोषपूर्णाः कुवाच्याः सन्ति, अद्यत्वेऽप्यतिपामरजनेष्वीदृशाः शब्दा लभ्यन्ते। उदाहरणार्थं मन्त्राः २,७,६,१०,१५ द्रष्टव्याः। "अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य। अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह॥" (१५) इत्यादि।

द्वाविंशे (२२) मन्त्रे उलूककुक्कुरकोकिलगृध्रादिरूपेषु विचरतां प्रत्येकं स्त्रीपुरुषाणां पिशाचानां दुरात्मनां च नाशार्थं विभिन्ना देवा आवाहिताः। इदं सूक्तमभिचारपरं नहि, अपि तु प्रार्थनापरमस्ति। किन्त्वस्माभिरत्रास्य समावेशो वर्णितेष्वाभिचारिकेषु शापेषु घटनासु च विशेषं ध्यानमाक्रष्टुं कृतोऽस्ति।

---

१. यो नो द्वेष्टयधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु॥
(मन्त्रः २१)

२. परशुं चिद्धि तपति शिम्बलं चिद्धि वृश्चति।
उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति॥
(मन्त्रः २२)

३. सायणवर्णिताख्यानानुसारमेको राक्षसो वसिष्ठस्य रूपं धृत्वा तस्य पुत्रान् अभक्षयत, तथा अकथयद् अहं वसिष्ठोऽस्मि त्वं च राक्षसोऽसि, तदा वसिष्ठः १२–१६ मन्त्रैरुत्तरयाञ्चकार। मैक्समूलरस्य मतमस्ति यद् वसिष्ठेऽयमारोपः।

४. तस्य प्रतिस्पर्द्धी विश्वामित्रः कृतोऽस्ति—
उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम्।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

१०–१६६ सूक्तं विशेषतो बन्धनविषयकमस्ति। ऋषिः शत्रून् (मन्त्रः १) नाशयितुमिन्द्रं प्रार्थयते, तदनन्तरं स्वप्रार्थनायां प्रभावं वर्णयन् कथयति यत् स इन्द्र[1] इव स्वशत्रून् हन्ति तथा बध्नाति[2]। अन्ते स पराजितान् शत्रून् आदिशति यत् ते स्वचरणयोरधोऽवस्थितास्तथा गदेयुर्यथा जलमध्ये दर्दुरा गदन्ति, रटन्ति[3], ऋषेरिच्छाशक्तेः प्रभावेण, यो हि प्रभाव इन्द्रप्रदत्तः[4] प्रतीयते, शत्रवो नश्यन्ति।

१०–१७४ सूक्तं शत्रूणां नाशार्थमस्ति। अस्य १०–१५६ सूक्तेन सह बहु साम्यमस्ति।

एतदतिरिक्तम् ऋग्वेदसंहितायामेकमपरमपि स्थलमस्ति यत्र यातोस्तत्त्वसत्ता मन्यते, किन्तूपरिनिर्दिष्टस्थलानीदं प्रमाणयितुं पर्याप्तानि सन्ति यदाथर्वणिकाः शान्तिपुष्ट्यभिचारिकक्रिया ऋग्वेदस्य कृतेऽपरिचिता न सन्ति, तथा वैदेशिका अपि न सन्ति।

२. ऐतरेयब्राह्मणम्

अनन्तरं संहिताया अहमिदानीम् ऋग्वेदस्य द्वयोर्ब्राह्मणयोर्मध्ये एकमैतरेयब्राह्मणं विचारयामि। अन्यब्राह्मणानुरूपमेवास्मिन्नपीहलोकपरलोकयोर्दृष्टादृष्टपदार्थयोश्चेतनाचेतनजगतोश्च प्रभुत्वमयाप्तुं यज्ञः साधनमस्तीति मन्यते। क्रियाणामुपयुक्तमन्त्राणामुपयुक्तैर्विनियोगैः सहानुष्ठानं कस्यापीष्टस्योद्देश्यस्य वा पूर्तिं विधातुं क्षमते। होमो यजमानाय स्वास्थ्यम्, धनम्, सन्ततिम्, आयुष्यम्, ब्रह्मवर्चसं तथा स्वर्गादिकं प्रापयितुं समर्थोऽस्ति। स पापानां कुपरिणामं तथा यजमानस्य शत्रून् अथवा असन्तुष्टः सन् स्वकीयं यजमानमपि नाशयितुं शक्नोति।

मन्त्राणां प्रयोगसमये होता स्वमनसि विविधसंख्याकैरक्षरैर्युक्तानामनेकेषां छन्दसाम्[5], आवृत्तिरीत्या–विरामं विना आवृत्त्या, एकपादानन्तरमथवाऽर्द्धमन्त्रानन्तरं क्रमशो द्वितीय-

---

१. अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः।
अधः सपत्ना मे पदोरिमे सर्वे अधिष्ठिताः॥
(मन्त्रः २)

२. अत्रैव वोऽपि नह्याम्युभे आर्त्नी इव ज्यया। (मन्त्रः ३)

३. योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम्।
अधस्पदान्म उद्वदत मण्डूका इवोदकान्मण्डूका उदकादिव॥ (मन्त्रः ५)

४. मन्त्रः १।

५. प्रत्येकं छन्दोऽस्मिन् जगत्युपलभ्यमानस्य कस्यापि वस्तुनः प्रतीकमस्ति, यथा त्रिष्टुप्छन्दो वीर्यस्य तथाधिपत्यस्य, जगतीच्छन्दः पशूनाम्—इत्यादि। एकस्य विशिष्टस्य छन्दसः प्रयोक्ता तस्य छन्दसः सांकेतिकं वस्तु प्राप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

पादस्याथवाऽर्द्धमन्त्रस्य आवृत्त्या अश्राव्ये, उपांशौ, मध्यमे, उत्तमे, वा स्वरे आवृत्त्या विषये विशेषमवदधाति। स्तोमानामपि स्वीयः सांकेतिकोऽर्थोऽस्ति। यथा पञ्चदश आधिपत्यार्थम्, सप्तदशः पशुभ्यः, एकविंशः प्रजननार्थमित्यादि।

वस्तूनां सांकेतिकप्रातिनिध्येन व्यावहारिका अथवा भौतिकार्था बहूपलभ्यन्ते, यथा–काल्पनिकमिथुनं वास्तविकस्य मिथुनस्य रूपकमात्रमस्ति, किन्तु तेन प्रजानां पशूनां च प्राप्तिर्भवति। एवमेव कस्यापि शत्रोर्मृत्यवे वषट्कार इत्युच्चारणात् पूर्वं तस्य शत्रोः स्मरणं पर्याप्तमस्ति, यतो वषट्कारो वज्रस्य प्रतीकमस्ति (३, ६)। इत्थमेव कस्यापि विशिष्टस्य शस्त्रस्यांशानाम् (भागानाम्) विशुद्धप्रकारेणावृत्तिं न कृत्वा तस्य भ्रमस्थितिमुत्पाद्य होता याजकं तदीयश्वासनेत्रघ्राणकर्णादिशक्तिभ्यो विरहितं कर्तुं शक्नोति। एवं यज्ञविधिना सूक्ष्मज्ञानेन कश्चित् किमपि कारयितुं समर्थः। हाँगमहोदयस्य शब्देषु—"यज्ञो विद्युत्सञ्चालकयन्त्रे प्रच्छन्नविद्युच्छक्तिवदस्ति, याम‌धिगन्तुं कस्याप्युपयुक्तसाधनस्य सञ्चालनमात्रमावश्यकम्[1]"।

अग्रे 'ऐतरेयब्राह्मणस्य ते विषया वर्णिताः, ये ह्याथर्वणविषयेभ्यो भिन्ना न सन्ति; तथा ये शान्तिपुष्ट्यभिचारशीर्षकान्तर्गता भवितुमर्हन्ति।

इमे विषया सन्दर्भद्वये आगताः। ब्राह्मणग्रन्थेषु केनापि निर्धारितकर्मकाण्डेन विभिन्नतत्त्वैः कस्यापि विशिष्टफलस्य प्राप्तिरभिहिता, अथवा विभिन्नाभीष्टानां प्राप्तये विविधा विकल्पा अभिहिताः।

एतदतिरिक्तं कतिस्थलान्येतादृशान्यपि सन्ति, यानि प्रतिपादयन्ति यत् कस्या अपि क्रियायाः सिद्धान्तस्य, अथवा इतिहासस्य ज्ञानमात्रेण कस्यापि विशिष्टाभीष्टस्य प्राप्तिः सम्भवा। यथा—ऐ० ब्रा० ३,३३ इत्यत्राभिहितं यत् प्रजापतेरेकं नाम 'पशुमत्' अप्यस्ति। एतद्वृत्तस्य ज्ञाता पशूनां स्वामी भवति। तथैव कौषीतकिब्राह्मणे १–२ इत्यत्र यज्ञाग्निस्थापनप्रसङ्गे इयं कथा उक्ता यदग्निः केन विधिना प्रयाजम्, अनुयाजं तथाऽऽज्यं स्वस्य कृते प्राप्तवान्, तथा तत्रेदमप्युक्तं यदस्य ज्ञाता समृद्धिं प्राप्नोति शत्रूँश्च जयति। अस्माभिरस्य समावेशोऽस्मिन्नध्याये, अथवा अन्यस्मिन्नध्याये न कृतः; यतो ह्येषु क्रियमाणस्य कार्यस्य विषये स्पष्टतः किमपि न कथितम्। अन्यच्च कारणं मीमांसका वेदप्रशंसापराणि इमानि स्थलानि स्तुत्यर्थकोऽर्थवाद इति मन्यन्ते। एषु स्थलेषु विहितकर्मविधानानां सम्पादनस्य निर्देशः कैमुतिकन्यायेन निहितोऽस्ति।

१. ऐ० ब्रा० अनुवादः, पृ० ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पुष्ट्या सम्बद्धानि स्थलानि

(क) अन्नम्—

स्वसन्ततिभिः सह अन्नादः, अन्नपतिश्च भवितुम् १,६,१,८,७,१२ इत्यत्र क्रमशः विराजूछन्दसे दक्षिणदिशायै दक्षिणाग्नये आहुतिप्रयोगो विहितः।

वाञ्छितफलप्राप्तये प्रयुक्तानि साधनान्यलौकिकशक्तिसम्पन्नानि सन्ति।

२, १ इत्यत्रान्नं तथा पुष्टिं प्राप्तुमिच्छतो जनस्य कृते पशुयज्ञे विल्वकाष्ठस्य यूपप्रयोगो विहितः। अत्रेदं कारणं यत् प्रत्येकस्मिन् वर्षे आमूलं वृक्षं नवीनोत्पन्नैः शाखापत्रैराच्छादयितुं प्रवृत्तो जायमानोऽयं विल्ववृक्षोऽन्नस्य तथा पुष्टेः प्रतीकोऽस्ति। अतो विल्वकाष्ठनिर्मितयूपस्य प्रयोक्ता सन्ततिभिः पशुभिश्च सम्पन्नो भवति[१]।

४,१६ इत्यत्र 'विराज्' इत्यस्य प्राप्त्यै अन्नस्य वा प्राप्त्यै 'पञ्चमषडह' इत्यस्य कर्मणो विधानमभिहितम्। सर्वा षडहक्रिया ३० दिनानां भवति, या हि ३० अक्षरसंख्याकस्य 'विराज्' इत्यस्य तुल्या भवति। ५, ३ इत्यत्र अन्नोत्पत्त्यै पृष्ठ्यषडह इत्यस्य चतुर्थे दिने न्यूङ्खस्य प्रयोगो वर्णितः। 'प्रातरनुवाक्' इत्यस्य प्रारम्भे एव न्यूङ्खस्य प्रयोगो यज्ञकर्तारं समुचितान्नप्रारम्भे स्थितं कर्तुं तथा आज्यशस्त्रस्य मध्ये तस्य प्रयोगो यज्ञकर्तारमन्नस्य मध्ये स्थितं कर्तुं विहितः। इत्थमन्येऽपि प्रयोगा विहिताः। कस्या अप्यलौकिकशक्तेर्हस्तक्षेपं विना विविधैः प्रकारैः कृतो न्यूङ्खप्रयोगो विभिन्नमुद्देश्यं पूरयति।

२, ४ इत्यत्र 'आप्री'मन्त्रेष्विडायाः कृते याज्यायाः प्रयोगो यजमानाय अन्नप्रदायकोऽभिहितः।

६,३ इत्यत्र सुब्रह्मण्याया वाचोऽनन्तरं दीयमाना दक्षिणा यज्ञम् (तथा अनेन प्रकारेण स्वयं यजमानम्) अन्ने वाचि च स्थापयति। अतः पूर्वं सुब्रह्मण्यायां वाक्त्वारोपः, दक्षिणायां भोजनत्वारोपः कृतो वर्तते।

८,१ इत्यत्र रथन्तरं साम यजमानस्य सम्मुखमन्नाद्यस्योपस्थापकमभिहितम्।

एवम् ६,१५,२०; ७,३१ इत्यादीन्यपि द्रष्टव्यानि।

---

१. वैल्वं यूपं कुर्वीतान्नाद्यकामः पुष्टिकामः समां समां वै विल्वो गृभीतस्तदन्नाद्यस्य रूपमामूलाच्छाखाभिरनुचितस्तत्पुष्टेः पुष्यति प्रजां च पशूंश्च य एवं विद्वान् वैल्वं यूपं कुरुते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२,१७ इत्यत्र सोमस्य दिने प्रातरनुवाके आयुष्कामस्य कृते शतसंख्याकानामृचां पाठो विहितः, यतो हि मनुष्यस्य आयुषः, वीर्यस्य, इन्द्रियाणां च संख्या शतमेवास्ति। एवं कृते स यजमानाय आयुष्यम्, वीर्यम्, इन्द्रियाणि च प्रददाति[1]।

३,८ इत्यत्र प्रत्येकं वषट्कारात् पश्चाद् वाक्, प्राणः, अपानश्च त्यक्त्वा निर्गच्छन्ति, यतो हि वषट्कारोऽस्त्ररूपो भवति। अस्याः स्थितेर्निवारणार्थं वषट्कारात् पश्चात् 'वागोजः सह ओजो मयि प्राणापानौ' इत्ययं मन्त्र उच्चारणीयः। एवं कृते होता स्वस्मिन् वाचं प्राणान् अपानं च स्थापयति, तथा पूर्णमायुः प्राप्नोति। अत्रोक्तमन्त्रे एका अलौकिकी यातुसम्बन्धिनी शक्तिरभिहिता।

(ग) सन्ततिः

१,२१ सन्ततिप्राप्त्यै अस्ति। इदम् ऋ० वे० सं० १०-१८३ इत्यस्य प्रयोगस्य विधानं बोधयति, यतो हि तत्र प्रजाशब्दः प्रयुक्तः, तथा स प्रजापतिं सम्बोधयति।

२,४० इत्यत्र ऋ० वे० सं० ३,१३,७ मन्त्राणां प्रयोगो वर्णितः। यत्राज्यशस्त्रस्यान्तिमे मन्त्रे सहस्रशब्दः प्रयुक्तः, यो हि सहस्रप्रकारकाः सन्ततीः पुष्टीश्च प्रददाति।

३,२४ इत्यत्र निष्कैवल्यशस्त्रस्यानुरूपस्योच्चारणम् (या सन्ततिरस्ति) उच्चस्वरे, (स्तोत्रियायाश्चोच्चारणं नीचैः स्वरे) कुर्वन् मनुष्यः स्वीयां सन्ततिं स्वस्मादपि श्रेष्ठतमां विदधाति।

५,३० इत्यत्र सूर्योदयात् पश्चादग्निहोत्राहुतिः सन्ततिं राजतुल्यां विदधाति[2]।

७,१८ इत्यस्यानुसारं शुनःशेपस्य कथाश्रवणेन, यत्र हरिश्चन्द्रस्य पुत्रोत्पत्तिर्वर्णिता, पुत्रप्राप्तिर्भवति। एवम् ३,४८ तथा ८,८ द्रष्टव्ये।

(घ) पशुः

१,५ पशुकामाय स्विष्टकृदित्यस्य याज्यार्थम्, अनुवाक्यार्थं च जगतीमन्त्राः प्रयो-

---

१. शतमनूच्यमायुष्कामस्य। शतायुर्वै पुरुषः शतवीर्यः शतेन्द्रिय आयुष्ये वैनं तद् वीर्यमिन्द्रिये दधाति।

२. "राष्ट्रमिव ह वा अस्य प्रजा भवति य एवं विद्वान् उदिते जुहोति"। हॉगमहोदयोऽस्य इत्थमनुवादं करोति–यद् यो जनः सूर्योदयात् पश्चादग्निहोत्रं गृह्णाति स बहुसंख्याकान् पुत्रान् प्राप्स्यति, यथा ऐकादशाक्षः, यस्य बहुसंख्यकैः पुत्रैः राज्यं व्याप्तमासीत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

क्तव्याः। पशुर्जगत्या सम्बद्धोऽस्ति। यो हीदं जानन् जगतीमन्त्रान् प्रयुङ्क्ते स पशूनां स्वामी भवति।

१,८ इत्यत्र प्रायणीयेष्टौ पशुकामानां प्रयाजाहुतिं कुर्वाणानां[1] पश्चिमाभिमुखाय विधानमस्ति। अत्रैका विशिष्टदिगेव यातुसम्बन्ध्युद्देश्यानां पूर्तिं करोति।

२,३ इत्यत्र पशुयज्ञे पशुकामानां कृते यूपस्थापनस्य विधानमस्ति—'तिष्ठेत् पशुकामस्य'।

२,४ इत्यत्र पशुयज्ञे बर्हिषोऽर्थे याज्यायाः प्रयोगेण होता यजमानाय पशून् प्रददाति। अत्र बर्हिः पशूनां प्रातिनिध्यं करोति–"पशवो वै बर्हिः, पशूनेव तत्प्रीणाति पशून् यजमाने दधाति"।

२,१८ प्रातरनुवाकस्यावृत्त्या प्रकारविषये विचारप्रवर्तकौ द्वौ तर्कौ उपस्थापितौ। प्रथमः –"पच्छोऽनूच्यः प्रातरनुवाकश्चतुष्पाद्या वै पशवः पशूनामावरुध्या"। द्वितीयः –"अथर्चश एवानूच्या यथैवैनमेतदन्वाह प्रतिष्ठाया एव। द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति"।

अत्रावृत्त्या इमौ द्वौ प्रकारौ विशिष्टोद्देश्यं पशुप्राप्तिसिद्धिं च सहानुभूतिक्रियातुसम्बन्धि-न्यायानुसारेण कुरुतः।

३–२४ निष्कैवल्यशस्त्रस्य सामप्रगाथः स्वरवत्या वाचा (अनुदात्तेन, अनुदात्ततरेण, उदात्तेन, स्वरितेन सह) उच्चरितः सन् पशून् प्रददाति। यतो हि "पशवो वै स्वरः पशवः प्रगाथः"।

४–१ षोडशी वज्ररूपा अस्ति, तथा उक्थः पशुरूपोऽस्ति। तृतीये सवने यदा होता "तं परस्तादुक्थानां पर्यस्य शंसति वज्रेणैव तत्षोडशिना पशून् परिगच्छति" एवं प्रकारेण वज्ररूपेण षोडशिना स पशुधनान्यवरुध्य स्वसमीपे आनयति।

४–२१ 'दूरोहण' इत्यस्यावृत्तिकाले त्रिष्टुप्छन्दोवत्सूक्तं जगतीच्छन्दोवत्सूक्तं मिथुनरूपेणोच्चार्येते। तत्रायं तर्क उपस्थाप्यते—"मिथुनं वै पशवः पशवश्छन्दांसि पशूना-मवरुध्यै"।

---

१. यः पशूनिच्छेत प्रयाजाहुतिभिः प्रत्यङ् स इयात्। पशवो वा एते यदापः। पशुमान् भवति य एवं विद्वान् प्रत्यङ्ङेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

एवमिमानि द्रष्टव्यानि–१,२१; ४,३,२१, ५–३,४, । ६–२१,२६; ६–२,२०,२४–२५।

(ङ) प्रजा तथा पशुः

१,१ दीक्षणीयायामिष्टयां घृतसिक्तस्य चरोर्निर्वपणं यजमानाय प्रजापशुलाभार्थमेकं साधनमस्ति "तद्यद् घृतं तत्स्त्रियै पयो ये तण्डुलास्ते पुंसस्तन्मिथुनं मिथुनेनैवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै"। प्रजादयो मिथुनस्य परिणामाः सन्ति। अतो विभिन्नलिङ्गाभिव्यञ्जकयोर्वस्तुनोर्मिथुनसम्बन्धः स्थाप्यते। अत्र फ्रेजरमहोदयस्य सादृश्यात्मकसहानुभूतिकयातुन्यायेन कार्यं भवति। एतदनुसारं ये द्वे वस्तुनी एकमपरस्य सारूप्यमुपस्थापयतः, ते वस्तुत एकमेवास्ति। कल्पनाप्रसूतं मिथुनं वास्तविकं मिथुनमस्ति।

२,१७ इत्यत्र प्रातरनुवाके प्रजायास्तथा पशोः प्राप्त्यै सोमसवनदिने विंशत्युत्तरसप्तशतसंख्याकानामृचां पाठो विहितः। विंशत्युत्तरसप्तशतसंख्या संवत्सरस्य प्रातिनिध्यं करोति, यत्र ३६० दिनानि तथा ३६० रात्रयो भवन्ति। तदनन्तरं संवत्सरं प्रजापतिना (प्रजानां स्वामिना) सरूपीक्रियते। एवं प्रकारेणात्र यातुसम्बन्धिरूपेणार्थस्य सिद्धिरभिहिता।

३,७ इत्यत्र प्रजापश्वोः प्राप्त्यै धामच्छदो वषट् इत्यस्य यातुसम्बन्धी प्रयोगो विहितः[१]। अयमपि 'होमियोपैथिक मैजिक' इत्यस्योदाहरणमस्ति।

३,३५ वैश्वानरसूक्तस्याग्निमारुतसूक्तस्य च पाठानन्तरं योनिप्रगाथस्यानुरूपप्रगाथस्य च पाठः प्रजापश्वोः प्राप्तिं कारयति, यतो हि "प्रतिष्ठयोरेव तदुपरिष्टात् प्रजननं दधाति"।

एवमिमानि सूक्तानि द्रष्टव्यानि—

२,३५; ३,५०; ४,६; ५,२२; ६,३,३६,३७।

(च) ऋद्धिः

यदि याज्याया उच्चारणं नीचैस्तरेण (शनैस्तराम्) स्वरेण कृत्वा वषड् इत्यस्योच्चारणमुच्चैस्तरेण (उच्चैस्तराम्) स्वरेण क्रियते, तदाऽभीष्टो जनः 'श्रिया'[२] युक्तो भवति। एवं स्वरे यत्किञ्चित् परिवर्तनमपि यातुसम्बन्ध्यर्थानां सिद्धिं करोति।

---

१. अथ यः समः सन्ततो निर्ह्राणर्चः स धामच्छत, तं प्रजाश्च पशवश्चानूपतिष्ठन्ते। तस्मात स प्रजाकामेन पशुकामेन वषट्कृत्यो···।

२. यं कामयेत श्रेयान् स्यादिति शनैस्तरामस्य ऋचमुक्त्वोच्चैस्तरां वषट् कुर्याच्छ्रिय एवैनं तच्छ्रियमादधाति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(छ) कामतृप्तिः

(१) बहुकामतृप्तिः

१,५ श्रियो यशसश्चेच्छुकस्य जनस्य कृते दीक्षणीयेष्टौ 'स्विष्टकृत्' इत्यस्य द्वे बृहत्यौ (७,१६ यथा ७,१६,३) इत्यनयोः प्रयोगः कर्तव्यः। यतो हि छन्दस्सु बृहतीच्छन्दः श्रियो यशसश्च रूपमस्ति । तस्य प्रयोगेण स स्वस्मिन् श्रियो यशसश्चाधानं करोति ।

२,१४ इत्यत्र पशुयागावसरे वपाया आहुत्या एको यातुसम्बन्धी प्रयोगोऽभिहितः। वपायाः पञ्चभागेषु निर्वपणं भवति यत्र हिरण्यशकलमपि निक्षिप्यते । हिरण्यशकलस्याभावे आज्यस्य द्वयोर्वपाया एकस्योपस्तरणानन्तरमाज्यस्य द्वे आहुती निक्षिप्येते । एवमाज्यस्य हिरण्यशकलस्य चाहुतिनिक्षेपसमये या याः कामना भवन्ति सर्वाः पूर्यन्ते । "तत्र स काम उपाप्तो य आज्ये तत्र स काम उपाप्तो यो हिरण्ये" ।

५,१४ द्वादशाहस्य षष्ठे दिवसे नाभानेदिष्ठसूक्तानाम् (ऋ० वे० सं० १०, ६१–६२) उच्चारणं सहस्रवस्तूनां प्राप्तिं कारयति–"स एष सहस्रसनिर्मन्त्रो यन्नाभानेदिष्ठम्[१]" ।

५,२२ पृष्ठ्यषडहानुष्ठानस्य समये ऋत्विजः पत्नीशालायां गच्छन्ति, तथा तेष्वेकः— "इह रमेह रमध्वमिह धृतिरिह स्वधृतिरग्ने वाट् स्वाहा वाट्" इति मन्त्रस्य पाठं करोति । अनेन स यजमानानामिह लोकेऽवस्थितिं कारयति–"अस्मिन्नेवैनांस्तल्लोके रमयति" तथा तेषु प्रजास्तथा वाचं स्थापयति ।

७, २० यदि राजसूययज्ञकर्ता ब्राह्मणः क्षत्रियो वैश्यो वा भवति, तदा तस्य कृते राजन्यानां यज्ञभूमियाचनस्य विधानमस्ति, किन्तु यज्ञकर्ता यदि स्वयं राजा भवति, तेन 'दैवक्षत्रः' भूताधिपतिरादित्यो याचितव्यः। दीक्षासमारोहस्य पूर्वाह्णे एवं करणेन यजमानः सवितृकृतां हानिं न प्राप्नोति, तथा स उत्तरोत्तरमेधमानां पुष्टिं प्राप्नोति, प्रजासु तस्यैश्वर्यमाधिपत्यं च भवति ।

८, ६ पुनरभिषेकसमये यदा क्षत्रियः प्रथमं देवता राजसिंहासने आरोहयितुं छन्दोभिस्तेषां प्रार्थनां कृत्वा ततः स्वयं राजसिंहासनोपरि प्रथमं स्वदक्षिणजानुना ततो वामजानुना आरोहति, तदा स सौभाग्यं प्राप्नोति, उत्तरोत्तरमेधमानां पुष्टिं प्राप्नोति, तथा महाराज्याधिपतिर्भवति ।

८, ७ यदा राजसूययज्ञकर्ता औदुम्बरीं शाखां शिरसि निधाय "देवस्य त्वा सवितुः

१. अत्र मनोः पुत्रस्य नाभानेदिष्ठस्य कथा वर्णिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

प्रसवे ···· भूर्भुवः स्वः” इति मन्त्रेणाभिषिक्तो भवति, तदा स हृतं ब्रह्म, क्षत्रम्, शक्तिम्, अन्नम्, सन्ततिं च पुनर्विन्दते ।

८, ६ राज्याभिषिक्तो राजा सिंहासनादवतीर्य पूर्वाभिमुखीभूय वारत्रयम् 'नमो ब्रह्मणे' इत्युच्चारयति। ब्रह्मणि नमस्कृते क्षत्रं ब्रह्मवशे भवति, येन तस्य राज्ये समृद्धेर्वीराणां च वासो जायते, तथा तत्र वीरा उत्पद्यन्ते ।

एवमेव ८, ८ इत्यपि ।

(२) सर्वकामतृप्तिः

२,१७ सर्वकामतृप्त्यै सोमसवनदिने प्रातरनुवाकेऽपरिमितमन्त्राणां पाठस्य विधानमस्ति, यतो हीदमपरिमितप्रजापतीनामुक्थमस्ति ।

३, १८ एकदा प्रजापतिर्धाय्यामन्त्रैः सर्वान् कामानुपलब्धवान् । अत एभि-र्धाय्यामन्त्रैः स लोकान् वाञ्छितफलं दोग्धि ।

८,५ अत्र राजसूययज्ञस्य पुनरभिषेकस्य सूक्ष्मं विवरणमस्ति। यो हि सांकेतिकरूपेण शान्तिपुष्ट्यर्थं च निष्पाद्यते । अनेनास्यां क्रियायां प्रयुक्तसाधनानामात्मनिर्भरताया भासो भवति। अथ एकमुदाहरणं प्रस्तूयते—

वेद्या दक्षिणे खड्गेनैका रेखा निर्मीयते, तथा औदुम्बरी आसन्दी पूर्वाभिमुखी आस्थाप्यते, यस्या द्वौ पादौ वेद्या अभ्यन्तरे (अन्तर्वेदि) तथा द्वौ पादौ वेद्या बहिस्तिष्ठतः। भूमिरेव 'श्रीः' अस्ति। अत आसन्द्या अनया स्थित्या वेद्या अभ्यन्तरस्थिताया बहिःस्थिता-याश्च परिमिताया अपरिमितायाश्च श्रिय उपलब्धिर्भवति ।

एवमेव ४,८ : २४,२७; ५,१; ६,२,३ ।

(ज) विशेषयोग्यताया अथवा शक्तेः प्राप्तिः

(१) तेजो ब्रह्मवर्चश्च

१,५ ब्रह्मवर्चसस्तेजसश्चेच्छुकः “गायत्र्या स्विष्टकृतः संयाज्ये कुर्वीत” ।

१, ८ प्रायणीयेष्टौ पूर्वाभिमुखीभवनं ब्रह्मवर्चसस्तेजसश्चोपलब्धिं कारयति ।

८,८ राजसूयस्य पुनरभिषेकावसरे औदुम्बरे ग्रहे निक्षिप्तमातपवृष्टिजलं यज्ञकर्त्रे ब्रह्मवर्चस्तेजश्च प्रददाति ।

८-२० महाभिषेकावसरे आज्यस्यानुलेपनं राज्ञे तेजः प्रददाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(२) इन्द्रियशक्तिवीर्यादेरवाप्तिः

१,१२ इत्यत्र यज्ञकर्तुः कृते इन्द्रियशक्तिप्राप्त्यै अष्टानामृचां पाठः शान्तिपुष्टिकारकोऽभिहितः। अत्र अष्टसंख्या (अश् √) सांकेतिकी अस्ति।

१,२१ यज्ञकर्तुः कृते इन्द्रियशक्तिप्राप्त्यै प्रवर्ग्यानुष्ठाने त्रिष्टुब्मन्त्राणां प्रयोगोऽभिहितः। यज्ञकर्तारं वीर्यवन्तं विधातुमत्र ऋ० वे० सं० २-३६ इत्यस्यैकपादस्य प्रयोगो वर्णितः।

१,२८ वेद्या यज्ञाग्नेर्नयनसमये राजन्यानां कृते त्रिष्टुब्मन्त्राणां प्रयोगो राज्ञे ओज इन्द्रियशक्तिं वीर्यं च प्रददाति।

२,१ पशुमेधे स्विष्टकृत्पुरोडाशस्य हविर्यजमानाय ऊर्जस्तथा शक्तिं प्रददाति।

२,१७ सोमसवनदिने प्रातरनुवाकेऽश्विभ्यां सप्तसु छन्दःसु पाठः सम्पूर्णवाचो ब्रह्मवर्चसश्च प्रदायकोऽस्ति।

३,४१ मध्ये एकं स्तोममुभयोः पार्श्वयोः (१०-१०) दश दश स्तोमान् संस्थाप्य एवं क्रमेण संस्थापितानामेकविंशतिस्तोमानां प्रयोगेण यजमानो दैवं क्षत्रं सहोबलं सायुज्यं सरूपतां सलोकतामश्नुते। अत्र स्तोमो दैवीशक्त्या समीभूतस्तथा स्तोत्रियमन्त्रो यज्ञकर्त्रा समीभूतोऽस्ति।

४,१६ शतायुःशतवीर्यशतेन्द्रियप्राप्त्यै शतमन्त्राणामुच्चारणं विहितम्।

७,३१ राजसूययज्ञप्रसङ्गे न्यग्रोधभक्षणस्य फलं प्रतिपादयता इदमुक्तं यत् "तद्यः क्षत्रियो यजमानो न्यग्रोधस्यावरोधांश्च फलानि भक्षयत्यात्मन्येव तत्क्षत्रं वनस्पतीनां प्रतिष्ठापयति। क्षत्र आत्मानं क्षत्रे ह वै स आत्मनि क्षत्रं वनस्पतीनां प्रतिष्ठापयति न्यग्रोध इवावरोधैर्भूम्यां प्रतिराष्ट्रे तिष्ठत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः" इति। अत्र न्यग्रोधस्य फलावरोधयोर्भक्षणं शान्तेः पुष्टेः सिद्धया यातुसम्बन्धिप्रभावं लक्षयति।

८,८ पुनरभिषेकावसरे चमसे दधिमधुघृतातपवृष्टिजलैः सह दूर्वापि निक्षिप्यते। या यातुरूपेण यजमानाय ओषधीनां क्षत्रं तथा प्रतिष्ठां प्रददाति। 'दूर्वा ओषधीनां क्षत्रम्' इत्यभिहितम्।

एवमेव १. २८; २. १,४,२०; ४. २,१६; १५-२४, ६-२, ८-४ द्रष्टव्याः।

---

१. देवावीर्देवान् हविषो यजास्यग्ने बृहद्यजमाने वयो धाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

(३) प्राणा:

१-२८ अग्नेः प्रणयनसमये ऋ० वे० सं० ३-२९-८ इत्यस्य 'उत्तरार्द्धोच्चारणद्वारा होता यजमाने प्राणानादधाति। अत्र प्रयुक्तो 'वयः'शब्दः प्राणानां द्योतकोऽस्ति। "प्राणो वै वयः" इत्यत्रत्येन 'वयः'शब्देन यातुसम्बन्धिप्रभावं द्योतयति।

एवमेव द्रष्टव्याः २-२६, २६; ६-२८।

(४) श्रेष्ठता तथाऽऽधिपत्यम्

१-२८ अग्नेः प्रणयनसमये ऋ० वे० सं० ३,५४,१ इत्यस्य द्वितीये पादे उच्चारणद्वारा यजमानः स्वप्रजासु श्रेष्ठतां प्राप्नोति।

२-१ पशुमेधे विल्वकाष्ठनिर्मितो यूपो यजमानाय स्वप्रजास्वाधिपत्यं स्थापयितुं साहाय्यं प्रददाति। विल्वस्य प्रयोग एतदर्थं क्रियते यत् स 'तेजः' अस्ति।

८, ४ सप्तदशस्तोमस्य तथा एकविंशस्तोमस्योच्चारणं वैश्यान् शूद्रांश्च राजानं प्रति आज्ञापालकान् करोति। इमौ द्वौ स्तोमौ क्रमशो वैश्यस्य तथा शूद्रस्य प्रतीकौ स्तः।

८, १५ इन्द्रस्य महाभिषेकेणाभिषिक्तो राजा जयमित्यादि प्राप्नोति—"सर्वा जितीर्जयेतायं सर्वान् लोकान् विन्देतायं सर्वेषां राज्ञां श्रैष्ठ्यं प्रतिष्ठां परमतां गच्छेत, साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्" इत्यादि।

एवमेव ३, १३, २७; ८, १६, १७, २०,

(५) विजयप्राप्तिः

६, ७ इत्यत्र निम्नलिखितमन्त्रद्वारा 'सनिम्' इत्यस्य प्राप्तिरभिहिता—"उद् गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः। अर्वाञ्चं नुनुदे वलम् ॥"।

८, १० कस्यापि सेनां पराजेतुमलौकिकविधेर्वर्णनमस्ति—"तं यदि क्षत्रिय उपधावेत् सेनयोः समायत्योस्तथा मे कुरु यथाहमिमां सेनां जयानीति, स यदि तथेति ब्रूयात्। वनस्पते[2] वीड्वङ्गो हि भूया इत्यस्य रथोपस्थमभिमृश्याथैनं ब्रूयादातिष्ठस्वैतां ते दिशमभिमुखः सन्नद्धो

१. हांगमहोदयानुसारम् 'तम्' इति पुरोहितं संकेतयति। यो हि युद्धक्षेत्रे सम्मतिं प्रदातुं राजानमन्वसरत।

२. ऋ० वे० सं० ६, ४७, २६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

रथोऽभिप्रवर्ततां स उदङ् स प्रत्यङ् स दक्षिणा स प्राङ् सोऽभ्यमित्रमिति; अमीवर्तेन हविषेत्ये[1]-वैनमावर्तयेदथैनमन्वीक्षेताप्रतिरथेन[2] शासेन[3] सौपर्णेनेति । जयति ह तां सेनाम्" ।

८–१६ इन्द्रस्य महाभिषेकेणाभिषिक्तो राजा "सर्वा जितीर्जयति सर्वान् लोकान् विन्दति, सर्वेषां राज्ञां श्रैष्ठ्यं प्रतिष्ठां परमतां गच्छति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यम्" इत्यादिः ।

(६) साम्मनस्यम्

३, २४ पत्नीमप्रतिवादिनीम् (अप्रत्युत्तरदायिनीम्) विधातुं निष्कैवल्यशस्त्रधाय्यायाः शंसनं नीचैस्तरस्वरेण कर्तव्यम् । अत्र धाय्यायां पत्न्याः प्रतीकं विधाय सांकेतिकक्रियया यातुसिद्धिरभिहिता ।

६–२० अथीनसूक्तेभ्यः प्रथमं मैत्रावरुणेन वैश्वामित्रसूक्तस्य शंसने कृते विश्वमैत्री प्राप्यते । अत्र विश्वामित्रनामकस्य यात्वर्थस्य सिद्धिरभिहिता । उक्तं च—"विश्वस्य ह वै मित्रं विश्वामित्र आस; विश्वं हास्यै मित्रं भवति य एवं वेद येषां चैवं विद्वानेतन्मैत्रावरुणः पुरस्तात्सूक्तानामहरहः शंसति" ।

(७) नानाविधाः

३-३ यजमानस्य सर्वाङ्गोन्नत्यै अत्र प्रउगशस्त्रस्य शंसनं क्रमभङ्गं विना कर्तुमभिहितम्—"यमु कामयेत् सर्वैरेनमङ्गैः सर्वेणात्मना समर्धयानीत्येतदेवास्य यथापूर्वमृजुक्लृप्तं शंसेत् सर्वैरेवैनं तदङ्गैः सर्वेणात्मना समर्धयति" ।

२,४ अत्र पशुयागे स्वाहाकारस्य कृते याज्यायाः शंसनं यजमानाय प्रतिष्ठां प्रददातीत्यभिहितम् । यतो हि स्वाहाकारः प्रतिष्ठात्मकोऽस्ति[4] ।

२,१६ : अपोनप्त्रीयसूक्तस्य सन्ततं शंसनमविरतं वृष्टिं कारयति, किन्तु यदि भागानां शंसनं भवति, तदा वृष्टिर्मेघानामनुरूपैव भवति ।

१. ऋ० वे० सं० १०, १७४ ।

२. ऋ० वे० सं० १०–१०३ ।

३. ऋ० वे० सं० १–१५२ ।

४. इमाः सर्वाः क्रियाः स्वयं शक्तिसम्पन्नाः सन्ति, तथा आसां ज्ञाता दैवीशक्तेः सहायतां विना घटनायाः क्रमान् स्वेच्छानुसारमन्यथयितुं शक्नोति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

शान्तेस्तथाऽभिचारस्य स्थलानि

(क) शत्रूणां पलायनं वधः पराजयः

१,२३ पूर्वाह्णस्य प्रारम्भे प्रथमोपसदसम्पादनेन[१] तथा अपराह्णारम्भे द्वितीयोपसदसम्पादनेन यजमानः स्वशत्रुभ्यः केवलं तावदेव स्थानं ददाति, यावदहोरात्रयोः सन्धाववशिष्यते ।

२,१ "वज्रो वा एष यद् यूपः, सोऽष्टाश्रिः कर्तव्योऽष्टाश्रिर्वै वज्रस्तं तं प्रहरति द्विषते भ्रातृव्याय वधं योऽस्य स्तृत्यस्तस्मै स्तर्तवै" । अत्र यूपस्य शान्तिपुष्ट्यर्थकः प्रयोग उपलभ्यते (यु=पृथक्करणम्)[२] ।

२,३५ आज्यशस्त्रस्य सूक्तानाम् ऋ० वे० सं० ३,१३ शंसनं कुर्वन् होता प्रथमं द्वौ पादौ पृथक्कृत्य वज्रस्य निर्माणं करोति, तथाऽनेन शत्रूणां वधार्थमाघातं करोति ।

३,६ वषट्कारो वज्रोऽस्ति, अत एव शत्रुनाशाय वषट्कार इत्यस्योच्चारणकाले शत्रूणां ध्यानं कर्तव्यम् । इत्थं शत्रुषु वज्रस्य प्रहारः क्रियते ।

३,७ बलपूर्वकं तथोच्चस्वरे उच्चारितो वषट्कारो वज्रोऽस्ति, येन स्वद्विषतां शत्रूणां वधार्थं तेषु प्रहारः क्रियते । पुनरिदं कथितं यत् शत्रूनर्धमृतावस्थायां प्रापयितुं होतृभिः 'ऋक्' इत्यस्योच्चारणमुच्चस्वरे तथा वषड् इत्यस्योच्चारणं शनैस्तरस्वरे कर्तव्यम् ।

३,२२ अत्र शत्रुसेनां पराजेतुमेको रोचको विधिर्वर्णितः । सेना अर्थादिन्द्रस्य प्रियपत्नी 'प्रासहा' अस्ति, यस्याः श्वसुरस्य नाम 'कः' अस्ति । अत एव कस्यामपि सेनायां विजयप्राप्त्यर्थं विजयेच्छुर्जनस्तस्या अर्धान्तरे स्थितः सन् तृणमुभयपार्श्वतः कृन्तेत्, तथा विपक्षिसेनासु 'प्रासहे कस्त्वा पश्यति' इत्युच्चारयन् निक्षिपेत् । एवं कृते यथा लज्जया पुत्रवधूः स्वश्वसुराद् जिहेति, तथैव शत्रुसेना भ्रान्ता सती इतस्ततः पलायते ।

४,२ "षोडशिन् सामन्" इत्यस्य रूपे 'नानद' इत्यस्य प्रयोगसम्बन्धे इदमुक्तं यदयं प्रयोगः शत्रूणां विनाशकोऽस्ति, यतो ह्यस्योत्पत्तिरिन्द्रेण विदीर्यमाणस्य वृत्रस्यार्तस्वरावसरेऽभवत् ।

---

१. देवताभिरुपसदसम्पादनस्य विस्तृतं वर्णनमस्ति । पौराणिककथायाः शान्तिपुष्ट्यर्थकः प्रयोगः ।

२. देवता यूपेन मनुष्येभ्य ऋषिभ्यः स्वर्गगमने विघ्नमुपस्थापितवन्तः ।

३. वज्रो वा एष यद् वषट्कारो । यं द्विष्येत्तं ध्यायेद् वषट् करिष्यन् तस्मिन्नेव वज्रमास्थापयति (आश्व० श्रौ० सूत्रे १-३ अयं भावो व्यक्तः) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

८,२८ इत्यत्र शत्रूणां वधार्थं केनापि राज्ञा उच्चार्यमाणस्याभिचारस्य विषये[1] इदमुक्तम्–"यो ह वै ब्रह्मणः परिमरं वेद पर्येनं द्विषन्तो भ्रातृव्याः परिसपत्ना म्रियन्ते"। यद्यपीदं केवलं वेदनप्रशंसैव कर्मविधिर्न पुनरप्यस्य स्थलस्योद्धरणमन्त्रं कृतमस्ति यदत्र ब्रह्मणः परिमर इत्यस्य चर्चास्ति यत् शत्रूणां वधार्थं पुरोहितेन कृतमनुष्ठानमस्ति।

(ख) कस्यापि तद्वस्तुनोऽपाकरणम्

२,३२ यदि होता[2] कमपि यजमानं नाशयितुमिच्छति, तदा स यज्ञस्य मूलम् 'तूष्णीशंसम्' इत्यस्य शंसनं न करोति, येन यज्ञो यज्ञकर्ता चोभौ क्रमशो निर्मूलावनायतवन्तौ च भूत्वा नश्यतः।

२,३३ यदि होता कमपि जनं तस्य क्षत्राद् वञ्चयितुमिच्छेत्, तदा स निविद इत्यस्य मध्ये सूक्तोच्चारणं कुर्यात्। 'निविद' इति क्षत्रं तथा सूक्तं प्रजा। नूनमित्थं स तज्जनं क्षत्ररहितं करोति। स यज्ञकर्तारं सूक्तस्य मध्ये 'निविद' इत्यस्योच्चारणं कृत्वा तस्य प्रजाभ्यस्तं विरहितं करोति।

३,३ प्राणानामुक्थप्रउगशस्त्रस्य कतिपयभागानां समुचितप्रकारेण शंसनं न कृत्वा[3] होता यज्ञकर्तारं तस्य प्राणात् तथाऽपानाद् विरहितं कर्तुं शक्नोति। इत्थमेव स मित्रवरुणाश्विनीन्द्र-वैश्वदेवसरस्वतीः प्रति शंसिततृचे भ्रान्तिमशुद्धिं वा कृत्वा यजमानं क्रमशस्तस्य नेत्रकर्णवीर्याङ्ग-वचोभ्यो विरहितं करोति।

३,७ त्रिप्रकारके 'वषट्' इत्यत्र रिक्तमेकमस्ति[4]। यस्य कृतेऽस्य वषड् इत्यस्योच्चारणं क्रियते, स रिक्तस्तथा पापीयान् भवति।

३,१९ यदि होता वैश्यानां क्षत्रियैर्वधं कर्तुमिच्छति, तदा स सूक्तस्य (ऋ० वे० सं० १०–७३ मरुत्वत्सम्बन्धिशस्त्रस्य) आरम्भे, मध्ये, अन्ते च निविदशंसनं करोति। इदं सूक्तं

---

१. सर्वप्रथमं मैत्रेयकौपारवेण सतवनभार्गायणायेदमुपदिष्टम्।

२. योऽस्य होता स्यादित्यत्रैवैनं यथा कामयेत तथा कुर्याद् यं कामयेत। द्रष्टव्यम्–ऐ० ब्रा० ३–३।

३. इन्द्रस्य तथा वायोः शंसनकरणसमये स ऋचोऽथवा पदस्योच्चारणं न करोति, इत्थं भ्रान्ति-मुत्पादयति।

४. 'वट्' इत्यस्योच्चारणमतीव नीचैस्तरस्वरेण कर्तव्यम्। येनैव पलवराध्नोति स रिक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वैश्यानां प्रतीकमस्ति। उपर्युक्तप्रतीकात्मकमनुष्ठानं कृत्वा होता वैश्यैः क्षत्रियाणामपि नाशं कर्तुं शक्नोति[1]।

३,२२ निष्कैवल्यशस्त्रस्य याज्यायां गायत्रीच्छन्दसि, अथवाऽन्यस्यां कस्याश्चिच्छन्दसि कृतायां सत्यां ततो वषट्कारस्योच्चारणेन होता यजमानमावासहीनं करोति।

५,१५ द्वादशाहानुष्ठानस्य षष्ठे दिने सायंसवनावसरे नाभानेदिष्ठवालखिल्यवृषाकप्ये-व्यामरुतां सूक्तानां सर्वेषां कस्यापि परित्यागं विना सहैव शंसनं कर्तव्यम्। अन्यथा यजमानः क्रमशः रेतःप्राणशरीरेभ्यस्तथा दैवीमानुषाधाराभ्यां च विरहितो भवति। इदं नकारात्मकं यात्वस्ति।

(ग) भयं हानिरथवा दौर्भाग्यान्मुक्तिः

२,२१ उपांशुना अन्तरयामग्रहैश्चाग्नौ हविःप्रदानात् पूर्वमभाषणार्थं मौनधारणार्थं वा होता सावधानः कृतः। इमौ द्वौ ग्रहौ प्राणौ स्तः, तथा होतुर्वाणी वज्रोऽस्ति। तस्य भाषणे कृते यदि कश्चिद् वदेद् यद् होता प्राणहीनो भवेत्, यतो हि स यजमानस्य प्राणानां हानिं कृतवानस्ति, तदा स होता प्राणहीनो भविष्यति। अतस्तेनास्य नियमस्य पालनमवश्यं कर्तव्यम्। इदमपि नकारात्मकयातुन एकमुदाहरणम्।

४–२६ द्वादशाहे यागे होता निष्कैवल्यशस्त्रस्य निविदसूक्तात् पूर्वं तार्क्ष्यसूक्तस्य (ऋ० वे० सं० १०–१७८) शंसनं करोति। "स्वस्त्ययनं वै तार्क्ष्यः, स्वस्तितायै स्वस्त्ययनमेव तत्कुरुते, स्वस्ति संवत्सरस्य पारमश्नुते।"

६, ६ एतदनुसारं प्रातर्माध्यन्दिने तथा सायंसवने सोमग्रहोत्थापनावसरे त्रिपु सप्तानां सप्तानां मन्त्राणामुच्चारणं न कार्यम्, अन्यथा तेन यज्ञस्य तथा यजमानस्य रेतसो हानिर्भवति। (नकारात्मकस्य यातुन उदाहरणम्)।

५,३३ ब्रह्मणा पुरोहितेन प्रातरनुवाकादारभ्य उपांशोस्तथान्तर्यामग्रहाणामाहुतिपर्यन्त-मेवमन्येष्ववसरेषु यज्ञस्य तथा यजमानस्य हानिर्न भवतु, एतदर्थं मौनेन भाव्यम्।

८,११ यत्रैकः पुरोहितः कस्यापि क्षत्रियस्य लाभार्थम् ऋ० वे० सं० ६–११०, १–३

---

१. ब्राह्मणः क्षत्रविड्भ्यां हीनो भूत्वा क्रमशः स्वकीयं प्रभावं स्वकीयां जीविकां च नाशयति, तथा क्षत्रियः स्वक्षत्रात् स्वविशश्च हीनो भूत्वा क्रमशः स्वशक्त्याः प्रजायाश्च हीनो जायते—हॉग-महोदयस्य ऐ० ब्रा० अनुवादः, पृ० १२८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मन्त्राणां शंसनं प्रपदप्रकारेण कुर्वन् चमसेनाज्यस्य चतुर्भिर्भागैराहुतिं प्रददाति, तदा स हानेराघातात् तथा दमनान्मुक्तो भवति, तथा सर्वासु दिक्षु रक्षितो भवति।

एवमेव द्रष्टव्याः—२, ३१; ३, २४, २६; ४, ३०; ६, १५; ७, १२।

(घ) पापानां तथापराधानां परिणामनिवारणम्

२, १७ सोमसवनदिने प्रातरनुवाकेऽब्राह्मणेन दुरुक्तोक्तेन शमलगृहीतेन वा अष्टशत-मन्त्राणां शंसनं कर्तव्यम्। गायत्र्यामष्टावक्षराणि सन्ति। गायत्र्या देवाः पापस्य शमलस्य च नाशमकुर्वन्। इत्थं निश्चयमेव स गायत्र्या पापस्य तथा शमलस्य नाशं करोति।

३, ८ अत्रेदमभिहितं यद् वषट्कारो वज्रमस्ति। यद्यस्योच्चारणानन्तरमस्य शान्तिर्न क्रियते, तदेदमशान्तं जायते। अतः प्रत्येकवषट्कारानन्तरं वाचा तस्यानुमन्त्रणं कार्यम्। अनेन प्रसन्नं भूत्वा तद् हानिं न करोति। एतदतिरिक्तं वषट् वाक्, प्राणोऽ-पानश्चास्ति। अतो यदि होता 'वषट्' इत्यस्यानुमन्त्रणम् "वागोजः सह ओजो मयि प्राणापानौ" इति मन्त्रेण करोति, तदा स स्वस्मिन् वाचः शक्तेस्तथा प्राणापानानामाधानं करोति, तथा स सर्वायुष उपभोगं करोति।

३–४६ अयोग्यजनस्य पुरोहितस्वीकारेण जायमानत्रुटेः शमनार्थं होत्रा वाम-देव्यसाम्न उच्चारणं कर्तव्यम्। तेन पुरुषशब्दस्त्रिषु भोगेषु—'पु–रु–षः' इत्येवंरूपेण विभक्तः कर्तव्यस्तथेमान्यक्षराण्येकैकं कृत्वा क्रमशः प्रत्येकपादस्यान्ते संयोज्य पठनीयानि। इत्थं स स्वमेषु शब्देषु स्थितं करोति, तथा यज्ञस्य सर्वां त्रुटिं परिष्करोति (नकारात्मकं यातु)।

५–२१ द्वादशाहावसरे नवरात्रे एतादृश बहु क्रियते यद् वर्जितमस्ति। तत्र यत् स कथयति "स नः पर्षदति द्विषः"[१] स सर्वैः पापैर्मुक्तो भवति।

५–२७ यद्यग्निहोत्रस्य गोदोहनकाले गौरुपविशेत्, तदा होत्रा "उदस्थाद् देव्य-दितिरायुर्यज्ञपतावधाद् इन्द्राय कृण्वती भागं मित्राय वरुणाय च" इति मन्त्रेण सोत्थापयि-तव्या। तदनन्तरम् "अस्या उदपात्रमूधसि च मुखे चोपगृह्णीयादथैनां ब्राह्मणाय दद्यात्।"[२]

---

१. तृतीयसवनसमये ऋ० वे० सं० १०–१८७ यज्जातवेदसं सम्बोधयति, तस्य शंसनमेतस्या-वृत्त्या सह क्रियते।

२. तै० ब्रा० १, ४, ३, १ आदि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

७, १८ विजयिना राज्ञा यज्ञमकुर्वाणेनापि शुनःशेपस्य कथाऽवश्यं श्रोतव्या। इत्थं स दैवेन चैवैनं..........तन्मानुषेण च पापादेनसः प्रमुञ्चति।

७, २३ राजसूयार्थमभिषिक्तः क्षत्रियो ब्राह्मणत्वं प्राप्नोति। अतस्तस्य देवता इन्द्रः, तस्य त्रिष्टुप्छन्दः पञ्चदशस्तोमेत्यादयश्च, तस्मात् तस्येन्द्रियाणि वीर्यमायुष्यं च हरति। अतस्तेनाभिषेकात् पूर्वम् "नेन्द्रा देवताया एमि" इत्यादिमन्त्रैरेकसवनं कृत्वा आहवनीयसमीपे स्थातव्यम्। इत्थं स इन्द्रियादिभिर्विरहितो न भवति। एवमेव–५, १, २; ६–१, ४; ७, २४, २६,।

३. कौषीतकिब्राह्मणम्

साम्प्रतमहमृग्वेदस्य कौषीतकिब्राह्मणमाधृत्य किञ्चिद् विमृशामि। अत्रोपन्यस्तानि प्रकरणानि नात्यन्तं स्पष्टानि। एषु बहुषु विशेषोद्देश्यपूर्तये यज्ञानामुद्धरणं दीयते। अतो यजुर्वेद-समुपवर्णिताभिः काम्येष्टिभिः समं साम्यं विलोक्यात्र एषां समावेशः क्रियते।

समृद्धिकृत्यानि (पुष्टिः)

(क) भूतिकर्माणि

५, ५ साय गृहमेधीये 'पुष्टि'शब्दमुदीर्याज्याहुतिप्रदानेन यजमानस्य पुष्टिर्जायते। तद्यथा—

"अथ यत् साय गृहमेधीयेन चरन्ति पुष्टिकर्म वा, एतद् गृहमेधीयः सायंपोष तस्मात् पोषवन्तावाज्यभागौ यजति। यजमानमेव तत् पोषयति।"

पोषं पुष्टिवर्धनमित्येतौ शब्दौ ऋक्संहितायाः १, १, ३ तथा १, ६१, १२ इत्यत्र मन्त्रयोः समागतौ।

१८, ६ सूर्यो जलं प्रविष्टो वरुणत्वेन गृह्यते, अतो वरुणमेवोद्दिश्यैककपालं हविर्दीयते। "एकस्था वै श्रीः, वरुणो भूतिः" इत्थं वस्तुतः समृद्धावेव तस्य पर्यवसानम्।

(ख) अन्नम्

३, ७ इडारूपेण यज्ञियस्यान्नस्याह्वानं कुर्वन् यजमानः स्वस्मिन्नेवान्नमादधाति। यज्ञियमन्नं साधारण्येनान्नमेव।

"अन्नं वा इडाऽन्नमेव तदात्मन् धत्ते"।

४, १२ अत्रोक्तम् "अन्नाद्यकाम आग्रयणेन जुहुयात्" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

१०, १ पशुमेधे यूपमाहवनीयाभिमुखं कुर्वतो यजमानस्य पत्नी स्वाशिता भवति। तद्यथा—

"आहवनीयं पुनरभ्यावृतस्तद्धै सुहितस्य रूपमनशनायुका हास्य भार्या भवति, य एवं रूपं कुरुते"। अत्रैवाग्रेऽन्नाद्यकामस्य कृते वैल्वस्य यूपस्य विधिरुक्तः—"वैल्वमन्नाद्यकामः"।

१२, ३ आपोनप्त्रीयविधौ नियतानां विंशतिसंख्याकानां मन्त्राणां शंसनेनान्नाद्यस्य वृद्धिर्भवति।

"ता वै विंशतिमन्वाह ता विराजमभिसम्पद्यन्ते। वैराजीर्वा आपोऽन्नं विराडन्नमापोऽन्नेन तदन्नाद्यं समर्धयति।"

१२, ८ पशुयागे एकादशिनीभिरिष्ट्वा अर्थादेकादशसंख्याकैः पशुभिरिष्ट्वा याजकोऽन्नाद्यं समग्रं रवीयमभिलाषं च तथैव लभते यथा पूर्वं प्रजापतिः—

"तथा एवैतद्यजमान एतयैवैकादशिन्येष्ट्वोपकामानाप्नोत्येवान्नाद्यं रुन्धे"।

१६, ३ वैश्वदेवशास्त्रप्रसङ्गे ऋक्संहितायाः १४, १ इत्यत्रोक्तम्—"सुरूपकृदनुभूतये०" इत्यादिमन्त्रप्रयोगेण यजमान आत्मन्येवान्न धत्ते, अर्थात् सुरूपं धत्ते, "यतो ह्यन्नं वै सुरूपम्" इत्याह श्रुतिः। अत्र सुरूपशब्दो यातुसम्बन्धी। समानः समानं जनयतीति कृत्वा साधर्म्यमूलकोऽयं यातुः।

२०,१ अत्र हि 'अभिप्लव'विधिना यजमानो यद्यदवाप्नोति, तस्य वर्णनं कृतम्—"तद्यदभिप्लवमुपयन्ति संवत्सरमेव तद् यजमानाः समारोहन्ति, तस्मिन्नेतत् षट्तयमन्नाद्यमाप्नुवन्ति ग्राम्यांश्च पशूनारण्यांश्चौषधीश्च वनस्पतींश्चाप्सुचरञ्च परिप्लवञ्च"।

२२,६ अत्र हि 'पृष्ठ्यषडह'क्रियायां चतुर्थे दिवसे 'न्यूङ्खस्य' निवेशनावश्यकता प्रतिपादिता। न्यूङ्खो यागे यजमाने चान्नं प्रतिष्ठापयति, यतो हि 'न्यूङ्खः' अन्नम्, चतुर्थो दिवसश्च वागायतनम्। इत्थ 'न्यूङ्खेन' अर्थाद् विशेषध्वनिना यातुसम्बन्धिनोऽर्थस्य सिद्धिर्जायते।

२२,८ विराजेन सम्बद्धस्य न्यूङ्खस्य ध्वनिविशेषस्य चतुर्थदिवसे उच्चारणस्य विधानप्रतिपादनानन्तरमत्र हि न्यूङ्खस्य विराजस्य चोभयोरप्यन्नरूपत्वमङ्गीकृत्य यथैवान्नं क्रमशः कवलितं भवति, तथैव न्यूङ्खस्य विराजस्य क्रमश उच्चारणं विधेयम्। तत्र हि त्रयाणां पादानां कल्पना। आद्यो मध्यमोऽन्तिमश्चेति। आद्यः खलु पाद आत्मा शरीरम्, द्वितीयः खलु पादो मध्यभागः, तथा च तृतीयः प्रजारूपः। यतो हि शरीरस्य मध्यभागेऽन्नस्य स्थितिर्भवति, अतो न्यूङ्खस्याप्युच्चारण षळहक्रियाया मध्ये भागे चतुर्थे दिवसे विधेयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

इत्थं विधिनानेन प्रतीयते यत्—न्यूङ्खस्योच्चारणक्रमो विशेषार्थं कञ्चन साधयितुं समर्थः। तथा च विधेः सम्यक् प्रयोगेण कस्याप्यतिमानुषस्य साधनस्य माध्यमस्य वा साहाय्यं विनैव कार्यविशेषस्याभीष्टविशेषस्य वा सिद्धिः संभवति।

२५,१५ अत्र हि विश्वजिदध्वरप्रसङ्गेनोक्तं यदवरार्ध्यमन्नमवाप्तुं नैषदेन सह व्यवहर्तव्यम्, यतो हि सः अवरार्ध्यमन्नाद्यमस्ति। एवं क्रमशो वैश्यक्षत्रियविप्राणां सङ्गमेन क्रमशस्तैः सह सम्बद्धान्नानामवाप्तिर्जायते। सन्दर्भस्यास्यायमाशयो यदवरमध्यमोत्तमसंसर्गेण क्रमशोऽवरमध्यमोत्तमान्नप्राप्तिः। इत्थं संवेदनात्मकस्य यातोरिदं निदर्शनम्।

दशरात्रकर्मणि दशमदिवसस्य कृत्यप्रसङ्गे २७, ४ इत्यत्रोक्त यद् यागे यजमाने चान्नसंभूत्यै "अस्मासु नृम्णं धा" इत्युदीरयेत्। अत्र नृम्णोऽन्नरूपे वर्णितः। अन्नेनैव पु त्वमवाप्यत इति।

(ग) अन्नमैश्वर्यञ्च

१४,२ अत्र आज्यशस्त्राभिशंसनप्रसङ्गे याजक ऋग्वेदसंहितायाः २,२५,४ मन्त्र परित्यज्य विराजस्यार्धर्चे समुच्छ्वसिति। विराजो भूतिरन्नाद्यं चास्ति। इत्थं स विराजमाश्रित्य भूतिमन्नाद्यं चाश्नुते।

एवमेव–१५,५; १६,५; १७,३; १८,५; १६,५; १६,७; २४,६; २७,६; ३०,७ इत्यादिष्वपि द्रष्टव्यम्।

(घ) प्रजाभिवृद्धिः

४,६ सन्तत्यभिवृद्धयै सार्वसेनियागो विधीयते–"स एष प्रजातिकाम य यज्ञ तेन प्रजातिकामो यजेत्"।

४,८ वसिष्ठयज्ञकर्ता सन्ततिभिः पशुभिश्च समृद्धो भवति, तथा प्रतिद्वन्द्विनः शत्रूंश्च विजयते।

"प्रजायते प्रजया पशुभिरभिद्विषतो भ्रातृव्यान् भवति"।

(ङ) सन्ततिः

८,४ प्रवर्ग्यविधिप्रसङ्गे उक्त यत् सन्ततिकामस्यायतने ऋग्वेदसहितायाः (१०, १८३) "अपश्यं त्वा मनसा चेकितानम्" इत्येतदस्यायतने प्रजाकामस्याभिष्टुयात्। "बृहद् वदेम विदथे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सुवीराः" इत्यस्या ऋचो भूयोभूयः शंसनं विधेयमिति। एवमेव ऋक्संहितायाः १०,१८४ ऋचो विषयेऽप्युक्तम्।

८,५ इत्यत्रोक्तं यद् ऋग्वेदस्य २,२३, १६ ऋगुच्चारयन् पुरोहितः पुत्रकामस्य कृते पुत्रमेव ध्यायेत्। एतेन स पुत्रं लप्स्यते। ६,५ इत्यत्रोक्तं यदग्नीषोमाभ्यां पुरतः प्रतिष्ठितो होता यदा ऋक्संहितायाः "धिया चक्रे वरेण्यो भूतानां गर्भमादधे। दक्षस्य पितरं तना" इति ऋगम्युच्चारयेत्, तदा गर्भं कामयमानायाः स्त्रियः कृते गर्भमेव ध्यायेत्। एतेन सा गर्भं धारयिष्यति। अत्र गर्भशब्दप्रयोगः साधर्म्यमूलकं यातु द्योतयति।

(च) पशवः

२,२ अग्निहोत्रानुष्ठानप्रकरणेऽत्रोक्त पशुकामो द्वयङ्गुलां समिधं ज्वलिते वह्नौ समर्पयेत।

२,४ त्रिष्वप्यग्निष्वाहुतिप्रदानानन्तरमग्निहोत्रानुष्ठानतत्परो याजकोऽङ्गुल्या गोर्वत्सं स्पृशेदित्यत्रोक्तम्, तेन हि यजमानस्य पशवः 'अनुत्क्रामुकाः' भवन्ति, न ते इतस्ततो गच्छन्ति, येन तेषां मार्गणे यजमानः कष्टमनुभवेदिति।

३,७ अत्रोक्तं यज्ञियान्नरूपाया इडाया आह्वानेन पशुप्राप्तिर्भवतीति। "अथ यदिडामुपहूयावघ्राति पशवो वा इडा पशूनेव तदात्मन् धत्ते"।

४,५ अत्र हि इडादर्धेत्यारब्धस्य यज्ञस्य विषये उक्तम्-"स एष पशुकामस्यान्नाद्यकामस्य यज्ञस्तेन पशुकामोऽन्नाद्यकामो यजेत"।

८,१ अत्र ह्यातिथ्यस्य महिमानमाह भगवती श्रुतिः पशुप्राप्तिरिति-"आतिथ्येन ह वै देवा द्विपदश्च चतुष्पदश्च पशूनापुस्तथो एवैतद् यजमान आतिथ्येनैव द्विपदश्च चतुष्पदश्च पशूनाप्नोति"।

८,२ अतिथेः स्वागतक्रमे पशोरालभनानन्तरमन्तिमो मन्त्रस्त्रिष्टुप्छन्दसि वर्तते। त्रिष्टुप् च पशुरूपो भवति, "त्रैष्टुभाः पशवः" इति श्रुतेः।

१०,२ पशुकामः पशुयागे कीदृशं यूपमुपयुञ्जीतेति प्रसङ्गेऽत्रोक्तम्—एकाकी निःसपत्नोऽथवा आमूलं शाखाभिः पल्लवैश्चाच्छादितस्तरुर्नग्नो न भवति। एवंविधस्य तरोः पशुना सम्बन्धो भवति। अस्य काष्ठस्य यूपं पशुकामः प्रयुञ्जीतेति।

"एकस्थो भ्रातृव्यो यो वाऽनुवृतः पलाशैरामूला स्यात् सोऽनग्नः स पशव्यस्तं पशुकामः कुर्वीत"।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

११,३ बलस्य वीर्यस्य च प्रतिनिधिभूतयोर्बृहत्युष्णिक्छन्दसोस्त्रिष्टुब्जगत्योर्मध्ये समुच्चारणेन यजमानस्य कृते पशवो बलेन वीर्येण च सम्पन्ना अनुत्क्रामुका भवन्तीत्यत्र प्रतिपादितम् ।

"मध्ये बार्हताश्चौष्णिहाश्च पशवो बलेनैव तद्वीर्येणोभयतः पशून् परिगृह्य यजमाने दधाति । तथा ह यजमानात् पशवोऽनुत्क्रामुका भवन्ति" । इत्थं क्रमविशेषेणोच्चारितानि छन्दांसि यातुसम्बन्धिनमुद्देश्यं पूरयन्ति ।

१६,३ वैश्वदेवशस्त्रप्रयोगेऽत्र चत्वारः प्रार्थनामन्त्रा अनुवर्तनक्रमेणोच्चारिता भवन्ति, येन पशवस्तत्र रमन्ते । "तस्मादेनदारतं शंसेद् रमन्ते हास्मिन् पशवः" । तत्र चतुर्विधाश्चतुष्पदाश्च पशवो भवन्त्यत्रापि चतुर्णामेव मन्त्राणामुपयोगो विहितः । एतेन साधर्म्यमूलकोऽयं यातुप्रयोगो ज्ञायते ।

१८, ६ अत्र 'हारियोजन'प्रयोगे प्रभूतपशुप्राप्त्युद्देश्येन याजकः प्रभूतं धान्यं संगृह्णाति । "पशवो वै धानाः" इत्युक्तिमनुसृत्य धानाः पशुप्रतीका अत्र सन्ति । इत्थं "समानः समानं जनयति" इति सिद्धान्तमनुसृत्य साधर्म्यमूलकोऽयं यातुः ।

२१, ५ अत्र 'अभिप्लवषळह'प्रसङ्गे षट्सु दिवसेष्वाद्योऽन्तिमश्चाग्निष्टोमरूपः । शेषाश्चत्वारो दिवसा उक्थ्याः । अग्निष्टोमो ब्रह्म, उक्थ्याश्च पशवः । इत्थ यथा पशून् ब्रह्म परिवेष्ट्य तिष्ठति, तथैव यजमानोऽपि पशुभिरुभयोः पार्श्वयोः संयुक्तो भवति । अत्र ब्रह्मणा उक्थ्यस्य च रूपकं यातुसम्बन्धिनमर्थमुपस्थापयति ।

२६, १७ सर्वेषु छन्दोमःसु द्विपदच्छन्दसः पाठो भवति, येन यजमानः पशूनां स्वामी स्यादिति ।

'अधिष्ठायामेव तत्पशूनां यजमानां दधाति"

एवमेव ८, ७; ११, ६; १३, २; ११, ६; १५, ४, ५; १६, ८; ११; १७, २; १८, २; २३, १, ८; २६, ६, १२, १६, २८, १०; २६, ३, ८, ३०, १०, ११ इत्येतेषु स्थलेष्वपि विचारणीयम् ।

(६) विशेषयोग्यताया विशिष्टशक्तेश्च सम्प्राप्तिः

(१) तेजो ब्रह्मवर्चश्च

२, २ समिद्धेऽग्नौ द्व्यङ्गुलायाः समिध आहुतिप्रदानं ब्रह्मवर्चसो हेतुर्भवति । प्रतीकात्मिकेयं क्रिया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

१०, १ अत्र हि ब्रह्मवर्चस्कामस्य कृते पशुयागे पालाशस्य यूपस्य विधानं वर्तते।

५, १ अत्र हि चतुर्षु मासिकेषु यागेषु प्रथमस्य वैश्वदेवस्य विषयोपक्रमे उक्तम्—"अथ यन्नवप्रयाजा नवानुयाजा अष्टौ हवींषि वाजिनं नवमम्, तन्नक्षत्रियां विराजमाप्नोति"।

१७, २ अत्र हि षोडशीकृत्ये छन्दसां विहरणप्रसङ्गे उक्तम्—"गायत्रीश्च पङ्क्तीश्च विहरति·····················तेज एव तद् ब्रह्मवर्चसं यजमाने दधाति"। पङ्क्तिर्यजमानस्य छन्दः, गायत्री तु तेजसो ब्रह्मवर्चसश्च। इत्थं गायत्री यजमाने तेजो ब्रह्मवर्चश्च निदधाति। १७, ५ पुनश्चात्रोक्तम् "यदतिरात्रमुपयन्ति स्नेहतेजसोरेवाप्त्यै" इति। एवमेव ५, ५, ८; १७, ६ इत्यत्रापि च द्रष्टव्यम्।

(२) बलं वीर्यञ्च

७, २ यज्ञदीक्षावसरे त्रिष्टुप्छन्दोभिर्हविःप्रदानेन यजमानो बलं वीर्यं चावाप्नोति। यतो हि त्रिष्टुप्छन्दो बलं वीर्यं चास्ति। बलवीर्ययोः कृते त्रिष्टुप्छन्दसः प्रयोगो निम्नस्थलेष्वपि द्रष्टव्यो भवति—

८, २; ११, २; १६, १, ४, ७, ११; १७, २; १८, ५; ३०, ११।

(३) प्राणाः

७, ५ प्रायणीयोदयनीयकर्मभ्यां क्रमशः प्राणोदानयोः सम्प्राप्तिर्भवति—"प्रायणीयेन वै देवाः प्राणमाप्नुवन्नुदयनीयेनोदानम्" इति। सोमयागे प्रथमदिवसे यत्कृत्यं तत्प्रायणीयमन्तिमे च दिवसे सम्पाद्यमानं कर्मोदयनीयमित्युच्यते।

७, १० अत्र हि सोमस्य राज्ञः क्रीणनावसर उक्तम्—"तद् यत् सोमं राजानं क्रीणात्यसौ वै सोमो राजा विचक्षणश्चन्द्रमा अभिषुतोऽसदिति तस्मै क्रीताय नवान्वाह नवेमे प्राणाः प्राणानेव तद्यजमाने दधाति सर्वायुत्वायास्मिल्लोकेऽमृतत्वायामुष्मिन् भद्रादभि श्रेयः प्रेहीति०"। इत्थं नवसङ्ख्याकानां मन्त्राणां समुच्चारणेन यजमाने नवप्रकारकाणां प्राणवायूनां बलाधायकानां सञ्चार उक्तः, येनासौ यजमानः पुष्टोऽमरश्च जायते।

१५, २ अत्र हि मरुत्वतीये शस्त्रे "प्राणो वै गायत्र्यः" इत्युक्तेरिदमायाति यद् गायत्र्याः शंसनमात्मनि बलं प्राणमादधाति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१७, २ अत्र षोडशीप्रसङ्गेनोक्तम्—"प्राणा वै छन्दांसि प्राणानेव तदात्मन् व्यतिषजति०" इत्यादि। एतेन विशेषाणां छन्दसां शंसनेनात्मनि शरीरे बलस्य संयोगो जायते, येन प्राणशक्त्या सह वियोगोऽवरार्हो न भवति।

अस्मिन्नेव प्रसङ्गे १०, ४; १३, ५, ६; १४, ४; १५, २, ३, ४; १६, ३; १७, ७; १८, २ इत्येतान्यपि द्रष्टव्यानि।

(ज) प्रतिष्ठा

७, ६ "प्रेव वा एषोऽस्माल्लोकाच्च्यवते यः प्रायणीयेनाभिप्रैति, तद्यद् विपर्यस्यति तदस्मिल्लोके प्रतितिष्ठति प्रतिष्ठायामप्रच्युत्याम्" इत्यत्रोऽक्तं यत् प्रायणीयेन सहोदयनीयमपि विधेयं येन शाश्वतिकी प्रतिष्ठा प्राप्यते।

११, ३ इत्यत्र प्रातरनुवाकप्रशसाप्रसङ्गे उक्तम्—"प्रतिष्ठा वै पङ्क्तिः सर्वेष्वेव तद्भूतेषु यजमानं प्रतिष्ठापयति"। एवमेव १७, ३; १८, २; इत्यत्रापि द्रष्टव्यम्।

(झ) सर्वकामतृप्तिः

१, ३ अत्र हि वर्षास्वग्नेः पुनराधानेन सर्वेषां कामानामवाप्तिर्जायत इत्युक्तम्। "वर्षासु वै सर्वे कामाः, सर्वेषामेव कामानामाप्त्यै वर्षामध्ये पुनर्वसुनक्षत्रमुदीक्ष्य पुनरादधीत पुनर्मा वसु वित्तमुपनमत्विति०"।

१, ५ अत्रापि पुनराधानप्रसङ्गे उक्तं नीचैः स्वरेण सभेदं मन्त्राणामुच्चारणेन सर्वेषां कामानामवाप्तिर्भवतीति।

२, ३ गार्हपत्येऽन्वाहार्यपचने च प्रत्येकं चतस्र आहुतयस्तथा चाहवनीये द्वे इत्थं दश आहुतयो विराजतुल्याः सन्ति, आभिः सर्वकामतृप्तिर्भवतीत्युक्तम्।

३, ८ "अथ पञ्चाशिषो वदति। इडायां तिस्रः, ता अष्टावेताभिर्वै देवाः सर्वा अष्टीरश्नुवत। तथो एवैतद् यजमान एताभिरेव सर्वा अष्टीरश्नुते" इत्युक्तम्। अत्र 'अश्'-धातोर्निष्पन्नोऽष्टिशब्दोऽष्टसंख्याकान् मन्त्रान् लब्धीश्च प्रकटयन् यातुसम्बन्धिनं कल्पना-पूर्वमर्थमभिव्यनक्ति।

४, ४ अत्र हि दाक्षायणयज्ञकर्ता सर्वान् कामानवाप्नोतीत्युक्तम्।

४, १० अत्र हि मुन्ययनस्य यज्ञस्य सम्पादनेन सर्वाभिलाषपूर्तिरुक्ता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

६, १५ अत्र हि चातुर्मास्यानां प्रजापतिरूपतामुपपादयतोक्तमेतेनैव सर्वान् कामानवाप्नोतीति ।

"यच्चातुर्मास्यानि सर्वं वै प्रजापतिः, सर्वं चातुर्मास्यानि तत् सर्वेण सर्वमाप्नोति, य एवं वेद य एवं वेद" ।

इत्थमेव ११, ७ इत्यत्र प्रातरनुवाकशंसनप्रसङ्गेनोक्तम्—"सहस्रमनुब्रूयात्, सर्वं वै तद् यत् सहस्रं सर्वं प्रातरनुवाकस्तत् सर्वेण सर्वमाप्नोति ।"

(न) प्रकीर्णकानि

२, २ अत्र "धूमायन्त्यां ग्रामकामस्य जुहुयात्" इत्युक्तम् । यो हि ग्रामं कामयेत्, सोऽप्रज्वलिते वह्नौ होमं कुर्यात्, तेन तस्याभीष्टं सिध्यति ।

४, ६ तद् यत् साकं संप्रतिष्ठन्ते, साकं प्रयजन्ते, साकं भक्षयन्ते; तस्मात् साकं प्रस्थाय्यः—अस्य साकं प्रस्थाय्य–यज्ञस्य समाचरणेन जनसमूहे श्रैष्ठ्यं पौरुषञ्चावाप्नोति पुरुष इत्यत्रोक्तम्—"स एष श्रैष्ठ्यकामस्य पौरुषकामस्य यज्ञः, तेन श्रैष्ठ्यकामः पौरुषकामो यजेत" इत्यादि ।

११,७ अत्र हि प्रातरनुवाकानां शंसनसङ्ख्याया विषये विभिन्ना विचाराः समुपस्थापिताः । तेष्वेकस्यानुसारं शतमनुवाका उच्चारणीयाः, येन शतं वर्षाणि जीवेदिति । अत्रायुषोऽनुवाकस्य च संख्याविषये शतशब्दो यातुसम्बन्धिनमर्थमभिव्यनक्ति ।

१६, १० "सोमेनेष्ट्वा सौत्रामण्या यजेत, स श्रियं प्रजां विराजमाप्नोति, यश्चैवं वेद—श्रीर्विराळन्नाद्यमित्यादि ।" इत्थमत्र सौत्रामण्यैश्वर्याद्यवाप्तिरुक्ता ।

१७, १ षोडशीत्याख्ये स्तोत्रे त्रिष्टुप्छन्दसां पाठो विहितः, तस्मिन् प्रसङ्गे उक्तम्—"ताः पञ्चविंशत्यक्षरा एकैका नवभिर्नवभिरक्षरैरुपसृष्टाः, आत्मा वै पञ्चविंशः, प्रजापशव उपसर्गाः" इत्याद्युक्तम् । अस्याः षोडशशस्त्ररूपायाः षोडश्याः फलमुक्तम्—पशुभृत्यान्नाद्यावाप्तिरिति । प्रसङ्गेनानेन सम्बद्धानि पूर्णानि त्रिष्टुप्छन्दांस्यथर्ववेदे २, ५, १ इत्यत्र तथाऽऽश्वलायने श्रौतसूत्रे ६, ३, १ इत्यादिषूपलभ्यन्ते ।

१७, ६ अत्रातिरात्रे जगत्याः शंसनानन्तरं त्रिष्टुब्मन्त्राणां पाठे पशुप्राप्तिर्बलवीर्यावाप्तिश्च फलमुक्तम् । अस्मिन्नेव प्रसङ्गे १८, ६ इत्यपि द्रष्टव्यम् ।

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१६, : १ विशेषेण विधिनाऽग्नये पुरोडाशस्य निर्वपनेन यजमाना बलेन वीर्येण च संयुक्ताः संवत्सरं स्वस्ति चरन्ति, वर्षपर्यन्तं कल्याणपूर्वकं निवसन्तीति प्रतिपादनपरेऽत्र ब्राह्मणे उक्तम् —

"ते वै दीक्षिष्यमाणा अग्नीन् संनिर्वपन्त एकधैव तद् बलं वीर्यमात्मन् दधते, अथैतान् संनिर्वपनीयामिष्टिं तन्वते। ते अग्नये ब्रह्म एव तेऽष्टाकपालं पुरोळाशं निर्वपन्ति, अग्नये क्षत्रवत एकादशकपालमग्नये क्षत्रभृते द्वादशकपालं ब्रह्मक्षत्र एव तद् यजमानाः समारोहन्ति, ताभ्यामेवैतत् स्वस्ति संवत्सरं चरन्ति।"

२५, १ अत्रोक्त ये वैषुवतमहः उपयन्ति, ते क्षुधं पुनर्मृत्यु च जयन्ति।

२५, १५ तत्र २५, १४ इत्यत्रोक्तम्—"विश्वजिच्चेत् सर्वमेव, सर्वमुचेद् विश्वजिदेव यो ह वै न सर्वं ददाति, सर्वं ददानीति ब्रुवन् गर्तपत्यमेव तद्धीयते", तथा चास्मिन् प्रकरणेऽभोक्तं वत्सद्वीं वत्सचर्म परिदधीत इति। परिधानेनानेन पशवो यथाऽत्मीयं वत्सं वाञ्छन्ति, तथैवैनमपि वाञ्छिष्यन्ति, इत्थमयं यजमानः पशून् प्राप्यतीति। अत्रैवाग्रे निर्दिष्टं यदुदुम्बर ऊर्जा अन्नाद्य चास्ति, तथा च ऊर्जस्कामोऽन्नाद्यकामश्च उदुम्बरे वसेदिति। प्रसङ्गेऽस्मिन् २७, ६ इत्यपि द्रष्टव्यम्।

प्रसङ्गेनानेनेयं मानवी प्रकृतिः परिस्फुटति, यच्चेतनाचेतनयोर्मध्ये यस्य कस्यापि संपर्के समापतितो मानवो गुणैरवगुणैश्च, तस्य नूनं प्रभावितो भवति। तथा च वत्सचर्मसम्पर्केण पुरुषे वत्सस्य गुणाः संभवन्ति, येन सः पशुप्रियो जायते। इदं संवेदनात्मकस्य यातोर्निदर्शनं ज्ञेयम्।

एवमेव ७, १०; १२, ८; १७, ३; २०, २, ४, २१, २; ३०, ८; इत्यादीनि स्थलान्यपि विलोकनीयानि। तत्रैतेष्वाद्यानि चत्वारि वाग्दृष्टिश्रोत्रसम्बन्धीनि सन्ति।

शान्त्या अभिचारेण च सम्बद्धाः क्रियाः

३, ८ अत्र हि दर्शपूर्णमासप्रसङ्गेनोक्तं यदाचार्यः सूक्तवाके यजमानस्य नामोच्चैर्गृह्णीयात्, तथा ह यजमानोऽप्रच्यावुको भवति। अर्थाद् यजमानस्य कापि हानिर्न भवति।

८, १ आतिथ्येन ह वै देवा द्विपदश्च चतुष्पदश्च पशूनापुरित्याद्यत्रत्ये सन्दर्भे ऋक्संहितायाः (१, २४, ३) ऋगुच्चार्यते—अस्यां ऋचि देवः सविता प्रार्थितो वर्तते, यतो हि सवितृसंरक्षितो विपद्भ्यो विमुक्तो भवति।

"अभि त्वा देव सवितरीशानं वार्याणम्। सदावन् भागमीमहे।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

६, ४ क्षेत्रादेकस्माद् भयं दूरीकर्तुमत्र यातुसम्बन्धिनी क्रियैका वर्णिता विद्यते। भयापाकरणाय यदा होता प्रार्थितो भवति, तदा स हे इन्द्र ! मनुष्येभ्योऽन्येभ्यश्च भयं दूरीकुर्वित्याशयकम्—"अपेतो यज्ञं भयमन्ययज्ञं च वृत्रहन्नपचक्रा आवृत्सतेऽत्यत उदचक्राणामभ्याचारः", मन्त्रमिममत्रोच्चारयन् स्वदक्षिणपादस्याग्रभागेन मृत्पिण्डमेकं पश्चिमाभिमुखमपसारयति। इत्थं तस्मात् क्षेत्रविशेषाद् मण्डलविशेषाद् वा भयान्निवृत्तिर्जायते।

यातुकृत्यस्येदं विशिष्टं निदर्शम्—

१२, ७ अत्र तृतीयसवने देवानामावाहनप्रसङ्गे उक्तम् —

"आत्मा वै पशुः, प्राणी वनस्पतिः, यस्तं तत्र ब्रूयात् प्राणादात्मानमन्तरा गात्, न जीविष्यति तथा ह स्यात्तस्मात् पशुमेवोपसंधाय वनस्पतिरावाह्यः।"

१३, ६ प्रस्थितानामाज्यानन्तरं होतारः सर्वे सममेव यजन्ति। एवं करणेन यजमान ऋणमुक्तो भवति —

"अथ होत्राः संयजन्ति, यजमानमेव तदृणतायै संप्रमुञ्चन्ति"।

१४, २ ऋक्संहिताया आज्यशस्त्रभूतानां सप्तानामृचाम् (ऋ० सं० ३, १३) उच्चारणप्रसङ्गे द्वौ पादौ पृथक् क्रियेते। यतो ह्येतयोरन्तरे मृत्योर्वासोऽस्ति। अतो मृत्योर्वारणार्थमत्र श्वासावरोधो विधेयः। इत्थं श्वासग्रहणं विनैव द्वयोः पदयोर्मध्यभागं सङ्क्रामेत्।

"एतद्ध वै मृत्योरास्यं यदेते पदे अन्तरेण ········· तस्मात्तदनवानं संक्रामेदमृतं वै प्राणोऽमृतेन तन्मृत्युं तरति।"

एवमेव ८, ३, ६, ५, २१, १, २८, ८ स्थलान्यपि विलोकनीयानि।

(ख) पापान्मुक्तिः

३, २ दर्शपूर्णमासेष्टिप्रसङ्गेऽत्रोक्त सामिधेनीमन्त्राणामुच्चारणात् पूर्वं कृतो हिङ्कारध्वनिर्यजमानस्य पापान् नाशयति, यतो हिङ्कारो वज्ररूपः।

"हिंकृत्य सामिधेनीरन्वाह वज्रो वै हिङ्कारो वज्रेणैव तद्यजमानस्य पाप्मानं हन्ति।"

५, ३ अत्रोक्तं वरुणप्रघासयजनेन यजमानस्य प्रजा वरुणस्य पाशेभ्यः सर्वस्माच्च पाप्मनः संप्रमुच्यन्ते।

१८, ७ अथ शाकलान् जुह्वति, तद्यथा—"हि जीर्णायै त्वचो निर्मुच्येतेषीका वा मुञ्जादेवमेवैते सर्वस्मात् पाप्मनः संप्रमुच्यन्ते।" शोभनाह्यत्रोपमालङ्कृतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

इत्थमेव ६, १, ५, १०, १, ११, १; १५, ४; १७, १, ३, ६; १८, ४; २३, ४; २४, ३ एतान्यपि स्थलानि विलोकनीयानि ।

शत्रूणां पराभवस्तेषां नाशश्च

३, २ दर्शपूर्णमासप्रसङ्गेनात्रोक्तं सामिधेनीमन्त्राणां पूर्वं त्रिः हिंकारोच्चारणम्–'त्रिवृद् वज्रं भवति', येन यजमानः स्वशत्रून् भ्रातृव्यान् लोकादस्माद् दूरीकरोति ।

४, १ "अनुनिर्वाप्यया वै देवा असुरानपाघ्नत, तथो एवैतद् यजमानोऽनुनिर्वाप्ययैव द्विषतो भ्रातृव्यानपहते" इत्यादि । इत्थमनुनिर्वाप्या इष्टिः शत्रुक्षयकारिणी इत्युक्तमत्र ।

४, ७ अत्र शौनकनामकस्य यज्ञस्य प्रशंसनमस्ति, ये इमं यज्ञं कुर्वन्ति, तेषां सपत्नक्षयो जायते—

"स एषतुतूर्षमाणस्य यज्ञस्तेन तुस्तूर्षमाणो यजेत, स य इच्छेद् द्विषन्तं भ्रातृव्यं स्तृण्वीयेत, सोऽनेन यजेत स्तृणुते ह ।"

४, ८ अत्रोक्तं वशिष्ठयज्ञसम्पादनेन यजमानः पशून् प्रजाश्च प्राप्नोति, तथा शत्रून् पराजयते ।

७, २ दीक्षाकर्मणि याज्यापुरोनुवाक्या मन्त्रास्त्रिष्टुप्छन्दसां भवन्ति । त्रिष्टुब् वज्रः । एतस्य साहाय्येन देवा यथाऽसुरान् लोकेभ्यो निष्कासितवन्तः, तथैव त्रिः समृद्धेन वज्रेण यजमानोऽपि स्वभ्रातृव्यान् द्वेषिणः पराभवतीत्यत्रोक्तम् ।

७, ३ दीक्षितो भूत्वा यदि यजमानः स्वशत्रोर्नाम अस्पष्टमुच्चारयति, तदा सोऽग्निरूपः सन् स्वशत्रुं भस्मसात् करोति । एवं शत्रोर्नामोच्चारणं कृत्वा तस्य हिंसनं तोदनं वा विश्वव्यापी प्रयोगः । कस्यापि नाम्नस्तस्य धारयित्रा सह कश्चन रहस्यात्मकः सम्बन्धः संवेदनात्मकस्तिष्ठतीति साधारणः प्राकृतिको लोकविश्वासः । अयं संवेदनात्मको यातुः ।

"यमेव द्विष्यात्तस्य दीक्षितः सन्नाम ग्रसेतैव तदेवैनमग्निर्भूतः प्रदहानीति ।"

११, ५ अत्र हि प्रणवोच्चारणप्रसङ्गेनोक्तं यच्छन्दोऽतिप्रवहणकाले यं मनसा द्विष्यात्तं विध्येत्, तेन हि च्छन्दसां कृन्तत्रेषु तस्य ध्वंसो जायते । तथा चात्र मूलम्—

"एत उ ह वै छन्द प्रवहा अवरं छन्दः परं छन्दोऽतिप्रवहन्ति'.....यन्नेव यं द्विष्यात्तं मनसा प्रेव विध्येच्छन्दसां कृन्तत्रेषु द्रवति वासं वा शीर्यत इति ।"

इत्थमेव १, ४; ७, १०; ८, ८; १२, २; १४, २; १७, ८ इमानि स्थलान्यपि विलोकनीयानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तृतीयोऽध्यायः

कृष्णयजुर्वेदे यातुविषयाः

शुक्लः कृष्णश्चेति द्वयोः प्रकाण्डयोः काण्डयोर्विभक्तो यजुर्वेदः। तत्र शुक्लयजुर्वेदोत्पत्तिविषयकेण पौराणिकेनाख्यानेनेदं प्रतीयते यच्छुक्लो यजुर्वेदः कृष्णयजुर्वेदादनन्तरकालिकः। यद्यपि समुपलब्धयोः कृष्णयजुषोस्तदङ्गानाञ्च विषयाणां वैज्ञानिकेन विस्तृतेन च विश्लेषणेण नाद्याप्येतेषां मूलग्रन्थानां तदङ्गानाञ्च पौर्वापर्यक्रमः सुनिश्चितः; तथापि प्रथमं कृष्णो यजुर्वेदस्तदनन्तरञ्च कृष्णमाश्रित्य मन्त्रभागाद् ब्राह्मणभागं पृथक्कृत्य विकासमुपगतः शुक्लयजुर्वेद इत्यङ्गीकृत्य वयमत्र प्रवर्तामिहे। तत्र कृष्णस्य यजुषः समुपलब्धेषु मूलेषु तैत्तिरीयः खलु सुप्रसिद्धः, यतस्तस्य विपुलो विषयोऽस्माभिर्लभ्यः। अतस्तैत्तिरीयं यजुर्वेदं कृष्णस्य यजुषः श्रेष्ठं निदर्शनं स्वीकृत्य तदेवानुसृत्य प्रकृतमनुसरामः।

(१) तैत्तिरीया संहिता

यजुर्वेदस्यान्येषां ग्रन्थानामिव तैत्तिरीयसंहितायामपि क्रियाविधीनां प्राचुर्यमुपलभ्यते। यद्यपि विभिन्नैर्व्यावहारिकैरुद्देश्यैर्विभिन्नप्रकारकाणामाहुतीनामुपयोगस्तत्र दृश्यते, तथापि तैत्तिरीयसंहिताया मुख्यमुद्देश्यं देवतां प्रति भक्तिस्तस्यास्तुष्टिर्वा नास्ति, किन्तु सम्बद्धदेवतायाः शक्तेर्वा वशीकरणं स्वायत्तीकरणञ्चास्ति। पुरोधसां समूहस्तत्र ता विविधाः क्रियाः सम्पादयति, यासां प्रत्येकं प्रतीकात्मकोऽर्थो मुख्यस्य यजमानस्य विविधोद्देश्यपूर्त्तिरेव भवति। उदाहरणार्थमत्र "इषेत्वोर्जे त्वा" १, १, १ इति मन्त्र एव। यत्र दर्शपूर्णमासेष्टौ दुग्धस्य हविःप्रदानाय पलाशस्य शम्या वा एकां मृद्वीं शाखां छिनत्ति पुरोधाः। तया च शाखया गोर्वत्सस्य गवां वत्सानां वा वारणं क्रियते, येन गोः सम्यग् दोहः स्यात्, अन्यथा मातृभिः सह तेषां वत्सानां वनगमने सायं दोहो न लभ्यते। अत्र हि नास्ति शमीशाखया पलाशशाखया वा वत्सानां वारणं केवलमुद्देश्यम्; अपि तु यजमानस्य ऊर्जसम्पन्नता प्राणवत्ता च मुख्यमुद्देश्यम्। पुनश्च आसन्यामग्निस्थापनार्थमध्वर्युः पूर्वाभिमुखश्चत्वारि पदानि गच्छति (तै० सं० ४.२.१), तत्र तस्य पादविक्षेपो विष्णोर्पादविक्षेपो मन्यते, यस्य चोद्देश्यं भूमौ वायावाकाशे च वर्तमानानां विघ्नकर्तृणामपसारणं भवति। तदानीं तस्याध्वर्योः पादविक्षेपः साधारणो न भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

क्रियाविधिर्नियता, तस्या बाध्यकारी दृढः प्रभावश्च नियतः। सम्बद्धाः शक्तयो मन्त्रशक्त्या पुरोधसां कृत्यैश्च स्वयमेवाधीनाः सञ्जायन्ते। अभिलषितं फलं पूर्णं भविष्यत्येव। तत्र विशिष्टच्छन्दसां प्रयोगः क्रियते येषामुपच्छन्दांसि, पदानि, यतयो मात्राणां संख्याः प्रतिनिधित्वेन प्रतीकस्वरूपाः पदार्थाश्चैवं शक्तिसंयुता भवन्ति, येन ते उद्देश्यपूर्त्तौ सफला भवन्ति। कदाचिच्च क्रिया एवेत्थं समुचिताः सुव्यवस्थिताश्च भवन्ति, येनाभिमतं फलं लभ्यते। उदाहरणार्थमिदमुक्तं यन्महाव्रतदिने यथा पाशमुक्ता जनाः स्वातन्त्र्यमुपलभ्योच्चैः शब्दायन्ते, तथैव यजमाना देवानां बन्धनैर्मुक्ता उच्चैः शब्दं कुर्वन्ति। इत्थं ते स्वेष्वेव देहेष्वन्नं देवशक्तिञ्च प्रतिष्ठापयन्ति। सत्रानुष्ठानं यजमानस्यापत्यानामन्नं सामर्थ्यञ्च गृह्णाति। तेषां हर्षप्रतीकात्मक उच्चैः शब्दो द्योतयति यत्तैर्बलमन्नञ्चोपलब्धमिति। अस्मिन् हर्षावसरे प्रयुक्ता शततन्त्री वीणा आयुषो वर्षशतस्य शतगुणितशक्तेश्च प्रतीकरूपेण तिष्ठति। एवं वीणा दीर्घायुषमपरिमितशक्तिं च ददाति। इदानीं परस्परजिगीषया धावनमपि क्रियते यस्यायमाशयो यन्नाद्यावधि लब्धं तस्य लाभः स्यादिति। यजनमानस्य पापापनोदः सञ्जायत इति बुद्ध्या शूराश्चर्मसु शरवेधं कुर्वते। "इदं मधु, इदं मधु" इति गायन्त्यो दास्यः शिरःसु जलकलशान्निधाय मार्जालीयमग्निमभितो गायन्ति नृत्यन्ति च। अनेनानुकृत्येन प्रचुरमन्नं प्रकृष्टा च वर्षा जायते, तदेव समृद्धिः। सदसो निर्माणक्रियायामध्वर्युः खनित्रमादाय कथयति—"देवस्य त्वा सवितुः प्रसवे।" तथा वर्तुलाकारां रेखां लिखन्नुच्चारयति—.........."परिलिखितरक्षः ँ् परिलिखिता अरातय इदमहं रक्षसो ग्रीवा अपि कृन्तामि, योऽस्मान् द्वेष्टि, यं च वयं द्विष्म इदमस्य ग्रीवा अपि कृन्तामि".........।

इत्थं वर्तुलं विरचयन् स राक्षसान् प्रतिबध्नाति, तदनन्तरं तेषां शिरसां छेदनं करोति। यज्ञियकलावित् पदार्थानां गतिमनुशास्ति। सर्वमेतद् यातुः। अस्मिन् ग्रन्थे द्विप्रकारकं यातुं वयं पश्यामः। प्रथमस्तावद् यज्ञिये काले तत्र प्रवर्तमानाः क्रियाः किञ्चित्प्रतीकात्मकमर्थमुद्दिश्य प्रचलन्ति। उदाहरणाय तैत्तिरीयसंहितायाः २, ६, ४ पर्याप्तम्। अत्र हि वेदिभूमेः परिष्काराय अध्वर्युर्घासच्छेदार्थं लवित्रं तीक्ष्णं करोति। पुनर्घासकर्तनं कृत्वा घासं मन्त्रेणैकेनोत्करस्योपरि निक्षिपति। कार्यमिदं कुलिशतीक्ष्णीकरणस्य, शत्रोरुच्छेदस्य तथा तस्य पृथिवीतो बहिः प्रक्षेपस्य प्रतीकात्मकमनुकरणम्, अथवा लाक्षणिकः सङ्केतः। पुनश्च वेदिकायास्तृतीयास्तरणनिर्माणार्थं दक्षिणे पश्चिमे उत्तरे च भागे षट्त्रिंशत् स्वयमातृण्णाबृहतीः इष्टकाः स्थाप्यन्ते। इदं षट्त्रिंश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MH

दक्षरात्मिकाया बृहत्याश्छन्दसः प्रतीकम्। यतो हि बृहत्या छन्दसा पशोः सम्बन्धः, अत इष्टकास्थापनं पशुप्राप्तेर्लक्षणम्।

यातुविषयकविचाराणां द्वितीयस्तावत्प्रभवस्तैत्तिरीयसंहितायाः २, १, १-१० : २, १-११ : ३, १-१३ तथा ४, १-१३ स्थलेषु काम्येष्टीनामुद्धरणम्। २, १, १-१० इत्यत्र विभिन्नानां विशेषकामनानां कृते विशेषाणां बलीनामुपहारः। एताः काम्येष्टयो मानवजीवनस्य प्रायः सर्वैरपि सम्भवैरभिलाषैः सम्बद्धाः सन्ति। यथा—ऐश्वर्यम्, सन्ततिः, पशवः, ग्रामाः, भोजनम्, वृष्टिः, शक्तिः, ओजः, पौरोहित्यम्, संग्रामे विजयः, आधिपत्यम्, राज्यमित्यादयस्तथा रोगमुक्तिः, शत्रुनाशोऽभिचारश्च। कासाञ्चनेष्टीनामुद्देश्यं पापान्मुक्तिः, प्रवासमुक्तिः तथा कञ्चन पदार्थमुद्दिश्य प्रचलिते विवादेऽथवा प्रतिवेशिना सह जायमाने विवादे विजयश्च भवति। कासाञ्चनेष्टीनामुद्देश्यं समितौ गमनकाले शक्तेः साहसस्य च प्राप्तिः, राक्षसानां बधः, क्षतात् त्राणम्, अकालमृत्युहरणम्, पूर्णायुःप्राप्तिश्च भवति। अत्राग्रिमेषु पृष्ठेष्वेतासामिष्टीनां विषये विस्तृतं विवरणं मया दत्तम्। तैत्तिरीयसंहिताया अध्ययनेनेदं स्पष्टं यदियं संहिताऽथर्ववेदतुल्या, तथा इतः पूर्वस्मिन्नध्याये समुद्धृतानां ब्राह्मणभागानामध्ययनेनापीदं प्रतीयते यन्नास्ति केवलमथर्ववेद एव यातुरथवा शान्तिपुष्ट्यभिचारादि।

अस्मिन् विषये ऋग्वेदं सम्यगालोच्याहमन्यवेदविषये सङ्क्षेपेणैव व्यवहरिष्यामि, यत उदाहरणान्यधिकांशेन साम्यमेव भजन्ते।

(अ) पुष्टिकृत्यानि

विभागेऽस्मिन् तेषां कृत्यानां वर्णनं वर्तते, येषामुद्देश्यमृद्धिः, समृद्धिः, सन्ततिः, पशवः, सस्यानि, वृष्टिः, सत्त्वम्, ग्रामः, सुवर्णम्, गृहमिति, अथवा सर्वेषामेतेषां युगपदेवोपलब्धिरस्ति।

१, ५, ४, ४ इत्यत्र पुनराधानफलमृद्धिप्राप्तिः कथितम्—"यः पराचीनं पुनराधेयादग्निमादधीत, स एतान् होमान् जुहुयाद्यामेवादित्या ऋद्धिमार्ध्नुवन् तामेवार्ध्नोति"।

१, ७, ३, ३ इत्यत्र प्रजापतिमुद्दिश्य दर्शपूर्णमासेष्टावन्वाहार्याहुतिप्रसङ्गे शत्रुनाशो भूतिलाभश्चाहुतेर्फलमुक्तम्—

"प्रजापतेर्भागोऽसीत्याह, प्रजापतिमेव भागधेयेन समर्धयत्यूर्जस्वान्" पयस्वान् इत्याह।

२, १, १, १ इत्यत्र काम्येष्टौ वायुदेवतामुद्दिश्य श्वेतपशोः समर्पणेन समृद्धिलाभ उक्तम्, मीमांसाशास्त्रेऽर्थवादस्येदमुदाहरणम्—"वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठादेवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति"।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२, १, ५, ४ इत्यत्रापि काम्येष्टौ सकृत् प्रसवानन्तरं बन्ध्यात्वमापन्नाया गोरालम्भनमुक्तम्। इन्द्रं गर्भे धारयित्वा गौर्बन्ध्यात्वमापन्ना वर्णिता। इत्थं "सूत्वा वशा" गोरालम्भनेन य इन्द्रमुपसर्पति स्वभागसमर्पणेन सो भूतिमश्नुते। विशेषां काञ्चन देवतामुद्दिश्य तस्याभागसमर्पणं ब्राह्मणग्रन्थानां विशिष्टा शैली। ५, ७, १, १ इत्यत्र चित्यभिमर्षणप्रसङ्गे प्रचुरभूतिप्राप्त्युपायरूपेणोक्तम्—देवतानुरूपं चित्यभिमर्षणं विधेयमिति, तेन वसीयान् भवति—

"यो वा अपधादेवतमग्निं चिनुत आदेवताभ्यो वृश्च्यते पापीयान् भवति, यो यथादेवतं न देवताभ्य आवृश्च्यते वसीयान् भवति, आग्नेय्या गायत्र्या प्रथमां चितिमभिमृशेत्, त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमग्निं चिनुते, न देवताभ्य आव्रश्च्यते वसीयान् भवति"।

७, ३, ४, १, इत्यत्र चतुर्दशरात्रप्रयोगेणोभयोर्लोकयोर्भूतिप्राप्तिप्रसङ्गेनोक्तम्—

"य एवं विद्वाँसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर् ऋध्नुवन्ति, अस्मिँश्चामुष्मिँश्च।"

एतादृशा एव प्रयोगाः २, १, ६, ४; २, २, ३, ३; २, २, ४, ५; २, २, ७, ३; २, ३, १, १; ५, १, ६, ४; ५, २, १०, ५; ५, ५, १, ५-६; ६, २, ३, ५; ७, १, ६ इत्यत्रापि द्रष्टव्याः।

(आ) अपत्यानि

१, ७, ६, ५ इत्यत्राग्नीनामुपासनमन्त्रप्रसङ्गेणोक्तं मन्त्रैरेभिरपत्यहीनोऽपत्यं तेजस्विनं ब्रह्मवर्चस्विनं लभते। "तन्तवे ज्योतिष्मतीमिति ब्रुयाद् यस्य पुत्रोऽजातः स्यात् तेजस्व्येवास्य ब्रह्मवर्चसो पुत्रो जायते"। इत्थमुपयुक्तानां मन्त्राणामुच्चारणेन पुरुषोऽचिरेणैवाभिलषितं लभते।

२, १, १, २-३ इत्यत्र काम्येष्टौ नियुत्वते वायवे हविःप्रदानमपत्यलाभायोक्तम्—"अपक्रामतो योऽलं प्रजायै सन् प्रजां न विन्दते वायुमेव नियुत्वन्तं स्वेन भागधेयेनोपधावति, स एवास्मै प्राणापानाभ्यां प्रजां प्रजनयति विन्दते प्रजाम्"।

२, १, २, ७-८ इत्यत्रोक्तं प्रजाकामः सोमाय कपिशं पशुमालभेत, तथा अग्नये कृष्णग्रीवमिति। तेन हि सोमोऽस्मै वीर्यं प्रयच्छति, अग्निश्चापत्यमिति। विशिष्टेयं पशोरिष्टिः।

इत्थमेव २, १, ५, ३; २, २, १, १-२; २, २, ४, ४; २, २, ५, १-२; २, २, १०, ३; २, ६, ५, ४-५; ६, ३, ७, १; ६, ६, ४, ३; ७, १, १०, १; ७, २, ६, ३; ७, ४, ५, ४ स्थलान्यपि विलोकनीयानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MH

(इ) पशवः

२, ३, २, ८ इत्यत्राग्नेयाष्टाकपालस्य पुरोडाशस्य, इन्द्राय चैकादशकपालस्य पुरोडाशस्य निर्वाप उक्तः, येन पशुप्राप्तिः सञ्जायते। अत्र हि पशोर्व्याख्यानमपि द्रष्टव्यं भवति—"दधि-मधुघृतमापो धाना भवन्त्येतद्वै पशूनां रूपम्।" "बहुरूपा हि पशवः"।

प्रसङ्गेऽस्मिन् निम्नाङ्कितान्यपि स्थलानि द्रष्टव्यानि—१, ५, ८, १; २, २, ७, १; २, ४, ४, ३; २, ५, १०, ३; २, ६, ६, १; ३, ४, ६, १; ५, १, १, १; ५, २, ६, ४; ५, २, ७, ४; ५, २, ६, ४; ५, ३, ८, १-२; ५, ४, ८, ५; ५, ४, ६, १; ५, ४, ११, १; ५, ५, २, २; ६, १, ८, १; २, ३, ४; ६, १, ६, २-३; ६, २, ४, १; ६, २, ६, २–३; ६, ३, ३, ४, ६; ६, ४, २, ५; ६, ६, ४, १-२; ७, २, २, १।

(ई) अपत्यानि पशवश्च

१, ५, ७, १ इत्यत्राहवनीयाग्निमन्त्रानुद्दिश्य निर्दिष्टं यत् "उपप्रयन्तो अध्वरं मन्त्रं वोचे-माग्नये०" (ऋग्वेदसंहिता १, ७४, १; तैत्ति० सं० १, ५, ५, १) इत्यस्य मन्त्रस्योच्चारणेन पश्वपत्यैहिकसुखादेश्च प्राप्तिर्भवति। "उपेत्याह प्रजा वै पशव उपेमं लोकं प्रजामेव पशूनिमं लोकमुपैति"।

कथमेका बन्ध्या मेषी आविर्भूता? कथञ्च तां देवा आदित्येभ्यो वशारूपेणालभन्त? पुनश्च कथमियं पृथिवी सुविस्तीर्णा जाता? कथञ्चात्र वनस्पतयः समभूवन्नित्याद्येकमाख्यानकम् २, १, २, ३ इत्यत्र वर्तते। तत्रोक्तम्—"यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स एतामविं वशामादित्येभ्यः कामायाऽऽलभेत" इत्यादि।

५, ६, २, ३ इत्यत्र कुम्भेष्टका चरुप्रधानकृत्ये स्त्रियः पुरुषस्य चाकृतिविशेषैश्चित्रिताः कुम्भाश्च कुम्भीश्च स्थाप्यन्ते यातूद्देश्येन। तेन हि यस्य कृते कुम्भमिथुनस्य स्थापना क्रियते, स प्रजया पशुभिर्मिथुनैश्च युज्यत इत्युक्तम्। इदमनुकरणात्मकस्य यातोर्निदर्शनम्।

७, ४, ३, १ इत्यत्र त्रिंशद्-रात्रकृत्ये यातुशक्त्यात्मके समुपवर्णितं यदस्य कृत्यस्य कर्ता तथैव प्रजया पशुभिश्च युक्तो भवति, यथेयं पृथ्वी पूर्वमलोमका भूत्वा अनन्तरं वनस्पतिभिरोषधी-भिश्च संयुक्ता अभवत्।

"ऋक्षा वा इयमलोमका आसीत्—सा अकामयतौषधीभिर्वनस्पतिभिः प्रजायेयेति सैतास्त्रिंशतं रात्रीरपश्यत्" इत्यादि।

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अस्मिन् प्रसङ्गे १, ६, ६, ३; १, ७, ४, ५; २, ४, ६, १; २, ५, ११, ३; ५, २, ४, ४; ५, ६, ५, ३; ६, ३, २, ५; ६, ६, ४, २; ७, १, ६, ६-७; ७, ४, ७, ३; इत्यादयोऽपि द्रष्टव्याः ।

(उ) अन्नम्

२, १, ३, ३ इत्यत्रान्नकामस्य कृते समुपवर्णितम्—"सौम्यं बभ्रुम् आलभेतान्नकामः, सौम्यं वा अन्नं सौम्यं वा अन्नं सोममेव स्वेन भागधेयेनोपधावति, स एवास्मा अन्नं प्रयच्छत्यन्नाद एव भवति ।"

५, १, २, २, इत्यत्र तैत्तिरीयसंहितायाः ४, १, २, १ "योगे योगे तवस्तरं वाजे वाजे हवामहे; सखाय इन्द्रभूतये"—इत्यादिमन्त्रव्याख्यावसरे मृदाक्रान्तिविधावन्नलाभाय 'योगे योगे एवैनं युङ्क्ते', 'वाजे वाजे हवामहे' इत्याह । 'अन्नं वै वाजोऽन्नमेवावरुन्धे' इत्याह ।

५, १, ६, ४ इत्यत्राग्निचयनक्रियाया मुख्यजननप्रयोगे समुपवर्णितं यद् "अम्बरीषादग्निमाहृत्य उखायामवदध्यात्, तस्मै योऽन्नं कामयते" । यदा अम्बरीषे अन्नस्थापनं क्रियते; अम्बरीषस्थितान्नत्वरूपगुणोऽग्नौ संक्रामितो भवति । अयमग्निर्यजमानस्यान्नप्राप्तये भवति । इदं संसर्गियातुकर्मण उदाहरणम् ।

५, ४, ६, २ इत्यत्राग्निचयने वाजप्रसवीये होमे प्रत्येकप्रकारकान्नहोमः, प्रत्येकप्रकारकमन्नं प्रयच्छतीति प्रतिपादितम् । फ्रेजरसिद्धान्तानुसारेणायं सादृश्यमूलकस्य भावसाम्यस्यान्यथाप्रयोग इति ।

५, ६, २, ३ इत्यत्र अग्निचयनप्रसङ्गे कुम्भेष्टकाकृत्ये पात्राणामुपयोगः क्रियते । पात्राणीमानि प्रतीकभूतानि भवन्त्यन्नस्य, यतो हि पात्र एवान्नमुपभुज्यते जनैः (—"पात्राणि भवन्ति पात्रे वा अन्नमद्यते स योन्येवान्नमवरुन्ध आद्वादशात् पुरुषादन्नमत्त्यथो पात्रान्नं छिद्यते यस्यैता उपधीयन्ते" इत्यादि) ।

प्रसङ्गेऽस्मिन् १, ६, ११, ५; १, ७, २, ३; १, ७, ४, २; २, १, ६, २, ४; २, १, ७, ५; २, १, ६, १; २, २, ७, २; २, ३, ६, १-२; २, ५, १०, ३; ५, २, ३, ७; ५, ४, ४, १; ५, ४, ८, २-३; ५, ४, ६, २; ५, ५, ६, ३; ६, १, ६, ६; ७, २, २, २; ७, २, ३, २; ७ ४, ७, ३; स्थलान्यवलोकनीयानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(ऊ) वृष्टिः

२, १, ७, ३-४ इत्यत्र "मैत्रावरुणीं द्विरूपामालभेत वृष्टिकामः, मैत्रं वा अहः वारुणी रात्रिः, अहोरात्राभ्यां खलु वै पर्जन्यो वर्षति, मित्रावरुणावेव स्वेन भागधेयेनोपधावति, तावेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतश्छन्दसां वा एष रसो यद्वशाद् रस इव खलु वै वृष्टिश्छन्दसामेव रसेन रसं वृष्टिमवरुन्धे, मैत्रावरुणीं द्विरूपामालभेत०" इत्याद्युक्तम् । इयं काम्येष्टिः । गौश्छन्दसां रसस्तथा वृष्टिर्वस्तुतो रस एव । इत्थं रसेन रसस्तुष्टिः साधर्म्यसिद्धान्तस्य निदर्शनम् ।

द्विरूपाया गोर्विषये भवत्यत्रैकमाख्यानम् । तथा हि—यदा वषट्कारो गायत्र्याश्छन्दसो मूर्धानं प्रविष्टस्तदा रसो विनिर्गतः । तत्र मित्रावरुणाभ्यां गृहीतो द्वितीयो रसो द्विरूपा गौरजायत ।

"वषट्कारो वै गायत्रियै शिरोऽच्छिनत्, तस्यै रसः परापतत्, तं बृहस्पतिरुपागृह्णात्, सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः परापतत्, तं मित्रावरुणावुपागृह्णीतां सा द्विरूपा वशाऽभवत्" ।

२, १, ८, ५ इत्यत्र काम्येष्टौ, "प्राजापत्यं कृष्णो भवत्येतद्वै वृष्ट्यै रूपं रूपेणैव वृष्टिमवरुन्धे" इति वर्णितं विद्यते । मेघसम्बन्धिनि यातौ कृष्णवस्त्रादिपरिधानं कृष्णस्य पशोरालम्भनं मेघानां कृष्णवर्णत्वेनैव प्रायः क्रियते ।

२, ४, ९-१० इत्यत्र काम्येष्टीनां मध्ये कारीरीष्टिवर्णनं वर्तते । अस्यामिष्टौ कृष्णानि वासांसि धार्यन्ते, तथा बलिपश्वादीन्यपि कृष्णवर्णात्मकानि भवन्ति, फलञ्च वृष्टिर्भवति । कृत्येऽस्मिन् तैत्तिरीयसंहितायाः २, ४, ७, ८ इत्यत्रोल्लिखितानां मन्त्राणां प्रयोगो भवति । याजको जलधरतुल्यवर्णतामवाप्तुं कृष्णाञ्चलसुशोभितानि कृष्णवर्णवासांसि धारयति—

कृष्णं वासः कृष्णतूषं परिधत्त एतद्वै वृष्ट्यै रूपम् ।
सरूप एव भूत्वा पर्जन्यं वर्षयति ॥

अनन्तरं पुरोधा मन्त्रैः पूर्वस्या दिशो वायोराह्वानं करोति, तथा पश्चिमस्या दिशो वायुमपसारयति । स वायोर्नामभ्यां जुहोति । कृष्णवर्णस्य मृगस्य चर्मोपरि मधुना मिश्रिताः कारीरा यवाः स्थाप्यन्ते, तथा चर्मान्तभागाः परस्परं सम्बद्धाः क्रियन्ते । मधु जलस्य वनस्पतीनाञ्च सारः कल्प्यते, तथा करीरः सोमस्य । अत एवैतेषां वस्तूनां प्रयोगः क्रियते । यदि दिनत्रयं यावद् वर्षा न जायते, तर्ह्यग्नये सूर्याय मरुद्भ्यश्च पिष्टकाः प्रदीयन्ते, येन ते सत्यामप्यनिच्छायां पर्जन्यं प्रेरयन्ति वृष्ट्यै । पुनः "उत्तम्भय पृथिवीम्" इत्युच्चार्य वर्षाहां वृष्टिवनिं जुह्वन्ति । प्रार्थनाभिर्मिश्रितमिदं संवेदनात्मकं यातुकर्म भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

पुनः ५, ३, १, ३ इत्यत्र पञ्चानामपस्येष्टकानामुपधानं द्वितीया चितिः। अत्र वर्णितं यदिमा इष्टका वृष्टिप्रदा यदैकस्मिन्नेव स्थाने एकस्यां वा दिशि स्थापिता भवन्ति, तदैकस्मिन्नेव ऋतौ वृष्टिर्जायतेऽतोऽध्वर्युरिष्टका इमाः प्रदक्षिणं गत्वा स्थापयति, येन सर्वानृतून् वर्षति मेघः।

"वृष्टिसनीरुपदधाति वृष्टिमेवावरुन्धे। यदैकधोपदध्यादेकमृतुं वर्षेदनु परिहारं सादयति, तस्मात् सर्वानृतून् वर्षति"।

अत्र यातौ शब्दानां यौगिकोऽर्थोऽपि ससारो भवति।

प्रदक्षिणामुपक्रम्य, सायणाचार्यो वदति—पूर्वस्यां दिशीष्टकां संस्थाप्य दक्षिणस्या दिशः कृते इष्टकामेकां हस्ते गृहीत्वा प्रदक्षिणा क्रियते। पुनरग्रेऽप्येवमेव क्रमशः क्रियते।

६, ४, ५, ५–६ इत्यत्र सोमयागसम्बन्धिन्युपांशुग्रहे इत्थमुपवर्णितं विद्यते यत् सोमपात्रस्य घर्षणं यद्यधोमुखेन हस्तेन क्रियते, तर्हि वृष्टिः सञ्जायते; उत्तानेन क्रियते चेत्तर्हि वृष्टि-निरोधः सञ्जायते।

"यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचा हस्तेन निमृज्याद् वृष्टिमेव नियच्छति, यदि कामयेतावर्षुकः स्यादित्युत्तानेन निमृज्याद् वृष्टिमेवोद्यच्छति।"

अनेनेदं स्पष्टं ज्ञायते यत् प्रतीकानां सम्यक् प्रयोगेण संस्कारेण च पुरोधसः प्राकृतिकं क्रमं शासितुं प्रभवन्ति।

अस्मिन् प्रसङ्गे ५, ३, १०, १; ६, ५, ६, ५; तथा ७, २, ७, ५ स्थलानि द्रष्टव्यानि भवन्ति।

(ए) बहुकामतृप्तिः

विभागेऽस्मिन् विविधाभिलाषपूर्तये कृतानां कृत्यानां वर्णनं विद्यते।

१, ७, ३, ४ इत्यत्र दर्शपूर्णमाससम्बन्धिन्यन्वाहार्ये उक्तम्—

"···प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि···" इति मन्त्रोच्चारणेन याजकः प्राणशक्तिं पदश्च प्राप्नोतीति। इत्थं मन्त्रा यदि सम्यक् प्रयुक्ता भवन्ति, तदा नूनं मन्त्रार्थाः सफला भवन्ति।

५, ४, ७, २ इत्यत्र वाजप्रसवीये होमेऽग्निचितौ उदुम्बरस्य दर्व्या प्रत्येकं प्रकारक-स्यान्नस्याहुतिर्दीयते, ततश्चोदुम्बरस्य शक्तिप्रतीकत्वाद् याजकः शक्तिमन्नञ्च लभते।

अस्मिन् प्रसङ्गे निम्नाङ्कितान्यपि द्रष्टव्यानि भवन्ति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MH

१, ५, ४, ४; १, ६, ११, ६; १, ७, २, ४; १, ७, ३, ४; २, १, १, ६; ७, १, १, २; ७, १, ४, २; ७, १, ८, २; ७, १, ६; ७, १, १०, ४; ७, २, ३, २; ७, ३, ७, ४; ७, ३, ६, १–२; ७, ४, ३, २; ७, ४, ५, २; ७, ४, ७, १।

प्रकीर्णकम्

(१) ग्रामः—२, १, १, २; २, १, ३, २; २, १, ६, १; २, १, ७, ५-६; २, २, ५, ६; २, २, ८, १; २, २, ८, १; २, ३, ३, ४–५; २, ३, ६, २; ३, ४, ६, २; ५, ४, ११, ३। अत्र ग्रामशब्दो ग्रामण्यर्थे प्रयुक्तः।

(२) सुवर्णम्—२, ३, २।

(३) गृहमावासश्च—५, २, १०, ५–६; ५, ५, २, २; ५, ६, २, ४–५।

(ऐ) विशेषगुणस्य विशिष्टयोग्यतायाश्च प्राप्तिः

(क) २, १, ६, २–३ काम्येष्टिरस्ति। एतदनुसारं यो हि शक्तिकाम इन्द्राय लोहितं पशुं प्रयच्छति। स तस्मै प्राणान् प्रयच्छति—"ऐन्द्रमरुणमालभेतेन्द्रियकाम इन्द्रमेव स्वेन भागेनोपधावति, स एवास्मिन्निन्द्रियं दधाति"।

प्रसङ्गेऽस्मिन् २, २, १, ४–५; २, २, ३, ४; २, ३, ७, २; ५, १, ६, ५; ५, ६, ३, ४; ७, १, ४, २; स्थलान्यपि द्रष्टव्यानि भवन्ति।

(ख) तेजो ब्रह्मवर्चश्च

१, ५, ८, ३—यो हि गायत्र्या गार्हपत्यमुपतिष्ठते, तं हि गायत्री तेजसा संयुनक्ति, तत्र प्रयुक्तभर्गशब्दमाहात्म्यात्—

"···गायत्रीभिरुपतिष्ठते, तेजो वै गायत्री तेज एवात्मन् धत्ते···"।

२, १, २, ४–५ अत्र काम्येष्टौ ब्रह्मवर्चसकामस्य विषये उक्तम्—

"यो ब्रह्मवर्चसकामः स्यात्, तस्मा एता मल्हा आ लभेताग्नेयीं कृष्णग्रीवीं संहितामैन्द्रीं श्वेतां बार्हस्पत्यामेता एव देवताः स्वेन भागधेयेनोपधावति। ता एवास्मिन् ब्रह्मवर्चसं दधति, ब्रह्मवर्चस्येव भवति।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

द्रष्टव्यानि—

१, ७, ६, ५; २, १, ४, १; २, १, ७, २; २, १, ८, १; २, २, ३, ३–४; २, २, ७, २; २, २, १०, १; २, ३, ३, १–३; २, ४, ११, ५; २, ५, २, ७; २, ५, १०, ३; ३, २, ३, ३; ५, २, ६, ५–६; ५, ६, २, ६; ५, ६, ३, ६; ६, ३, ४, ३; ६, ५, ५, ३; ७, १, ४, २; ७, २, ३, १–२ ।

(ग) ज्येष्ठता

१, ६, ११, ६ अत्र हि काम्येष्टौ निर्दिष्टम्, दर्शपूर्णमासे यागे यो हीन्द्रमुद्दिश्य "महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेयम्" इत्युदीर्य जुहोति, स जेमानं महिमानञ्च गच्छति" ।

२, ३, ४, ४ इत्यत्र काम्येष्टौ हीनवर्णस्य ब्राह्मणस्य कृते बृहस्पतिमुद्दिश्य चरोर्विधानं वर्तते, येन ब्राह्मणः स्ववर्गे ज्यैष्ठ्यं लभते ।

"यो ब्राह्मण आनुजावरः स्यात्, तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेत्" ।

३, ४, ८, २ अग्निचयनकृत्येऽक्षक्रीडास्थाने 'राष्ट्रभृत्' आहुतिभिर्याजको विजयमेवाप्नोति, अक्षक्रीडास्थानं विजयप्रतीकः ।

द्रष्टव्यानि—२, ६, २, ५; ५, २, ७, १; ५, ३, ८, ३; ७, १, ३, ३; ७, २, ५, ३;

राजकर्माणि

राज्यावाप्तिः

२, १, ३, ३–४ इत्यत्र काम्येष्टौ राज्यकामुकस्य कृते सोमाय पिङ्गलवर्णस्य पशोरालम्भनमुक्तम्, यतो हि सोमो राज्याधिष्ठातृदेवता । सोमश्च बभ्रुवर्णः, अतोऽनेन विशेषोपहारेण सोमः प्रसीदति, स्वं भागमवाप्य, तथा च याजकाय प्रयच्छति—

"सौम्यं बभ्रुमालभेत यमलं राज्याय सन्तं राज्यं नोपनमेत् । सौम्यं वै राज्यं, सोममेव स्वेन भागेनोपधावति । स एवास्मै राज्यं प्रयच्छत्युपैनं राज्यं नमति, बभ्रुर्भवत्येतद् वै सोमस्य रूपम्" (२।३।४।३) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

"......यो राजन्य आनुजावरः स्यात्, तस्मा एतमैन्द्रमानुष्यूकमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागेनोपधावति। स एवैनमग्रं समानानां परिणयति, बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुन्धादेवैनमग्रं परिणयति"।

अत्र हि सवर्ग्येषु राजसु श्रैष्ठ्यप्राप्तये एकादशकपालस्य चरोरिन्द्रायोपस्थापनमुक्तम्। अनेन कर्मणाऽवरो राजा उच्चैः पदमवाप्नोति। अत्र याज्यानुवाक्ययोः 'बुध्नवती', अग्रवती' इति द्वौ शब्दौ यातूद्देश्यकौ ज्ञेयौ।

५, २, १, ४ अत्र ह्यासन्यामग्निस्थापनप्रकरणेऽध्वर्युः प्रोचारयति—"......अस्मिन् राष्ट्रमधिश्रयेति ..यं कामयेत राष्ट्रं स्यादिति तं मनसा ध्यायेद्, राष्ट्रमेव भवति"

प्रसङ्गेऽस्मिन् द्रष्टव्यानि स्थलानि—३, ४, ८, १; २, १, ३, ५; ५, ४, ६, ३।

विवादे जयः

२, १, ३, १–२ "देवासुरा एषु लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनमपश्यत्, तं स्वायै देवताया आऽलभत। ततो वै स इमाँल्लोकानभ्यजयद्, वैष्णवं वामनमालभेत स्पर्धमानो विष्णुदेव भूत्वेमांल्लोकानभिजयति-विषम आलभेत, विषमा इव हीमे लोकाः समृद्ध्या इन्द्राय मन्युमते मनस्वते ललामं प्राश्शृङ्गमा लभेत–संग्रामे संयत०" इत्यादि।

अत्र हि काम्येष्टौ स्पर्धमानेषु बहुषु यो हि क्रोधशालिने बुद्धिमते चेन्द्राय रक्तललाटं शृङ्गाग्रं पशुमेकमुपाहरति, स वादे विजयं लभत इत्युक्तम्।

एवंविधान्यन्यान्यपि निम्नाङ्कितानि स्थलानि द्रष्टव्यानि भवन्ति—२, २, ४, ५–६; २, २, २, ४; २, २, ६, १; २, २, ८, २; ३, ४, ८, ३;

राज्यस्थैर्यम्

२, २, ८, ४–५ इयमपरा काम्येष्टिः। अत्रोक्तं यो हि भ्रष्टराज्यो भ्रश्यमानराज्यो वा राज्यं स्थिरं कर्तुं कामयते, सः प्रदात्रे इन्द्राय-एकादशकपालं पुरोळाशं निर्वपेच्चेत्तस्य राज्यं स्थिरं भवतीति। २, ३, १, २ अपरुद्धस्यापरुद्ध्यमानस्य च कृते इदं काम्येष्टिविधानम्। यो हि राज्यविभ्रष्टः, स भ्रंशयितुर्पादपांसुमादायादितिं प्रार्थयेत्–"अदितेऽनुमन्यस्व" तेन हि अदितिः, अस्मै राज्यम् अनुमन्यते। अत्र अदितिः पृथ्वीस्वरूपा। भ्रंशयितुः पादपांसु राज्यशक्तिः। तस्य पांसोः स्पर्शेन राज्यभ्रष्टो राज्यमाप्नोति। इति प्रतिपादितमत्र काम्येष्टौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

३, ४, ८, २ राष्ट्रभृन्मन्त्राणां काम्यप्रयोगेऽत्र प्रतिपादितं यद् राज्याद् भ्रष्टस्य कृते यदि नाम 'युङ्ध्वम्' इत्युच्चार्य रथमुखे राष्ट्रभृत्प्रयोगः क्रियते, तर्हि राज्यमाप्नोति राज्यविभ्र इति । अत्र रथो राज्यशक्तेः प्रतीकः ।

रोगान्मुक्तिः, दीर्घायुष्यप्राप्तिश्च

प्रकरणेऽस्मिन् दीर्घस्थायिनां कृच्छ्रसाध्यानाञ्च रोगाणामपाकरणम्, कुष्ठनिवारणम्, पूर्णायुर्भोगः, यष्टरि प्राणशक्तिसंचार इत्येतेषां विषयाणां विचारः ।

२, १, १, ३–४ अत्र हि काम्येष्टौ वायुदेवतामुपधावतः पुरुषस्य दीर्घस्थायिरोगान्मुक्तिर्जायते—"वायवे नियुत्वत आलभेत ज्योगामयावी ०" ।

२, १, ४, ३ अत्र काम्येष्टौ—"यदि बिभीयात् दुश्चर्मा भविष्यामीति सोमापौष्णं श्याममालभेत" इत्युक्तम् । एतेन चर्मरोगनिवारणार्थं सोमाय पूष्णे च कृष्णवर्णस्य पशोरालम्भनं निर्दिश्यते । अत्र कृष्णवर्णस्य निर्देशो यातौ विशेषेणोपयुज्यते ।

तैत्तिरीयसंहितायाः ४, २, ६ स्थानीया मन्त्रा ओषधीनां स्तुतिपरकाः सन्ति । एतत्समाना एव ऋच ऋग्वेदेऽपि १०,९७ इत्यत्रोल्लिखिताः । मातृरूपा देवीरूपाश्चैता ओषधयो रोगाणां प्रशमाय शतधा सहस्रधा च शक्तिसम्पन्नाः—"ओषधीरिति मातरस्तद्वो देवीरुपं ब्रुवे", "शतं वो अम्ब धामानि सहस्रमुत वोरूहः । अथा शतक्रत्वो यूयमिमं मे अगदं कृत ।"

पुनश्चार्चक आत्मानं भिषजं मन्यमान ओषधीनाममोघतायां श्रद्दधानो ब्रूते—

"यदहं वाजयन्निमा ओषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ।"

अत्रैवासामोषधीनां विषये उक्तं वायुवेगेन रोगान् नाशयन्तीमा इति । पुनरग्रे प्रार्थितं विद्यते यद् यो हि नाम ओषधी खनति, यस्मै च खनति, तौ द्वावपि रोगमुक्तौ भवेताम्, तयोः पशवश्चापि रोगमुक्ता भवेयुरिति । अन्ते चौषधय उत्तरं ददति दृढम्—

मा वो रिषत् खनिता यस्मै चाहं खनामि वः ।
द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥
ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै करोति ब्राह्मणस्तं राजन् पारयामसि ॥

शेषाः स्तुतिमन्त्राः स्पष्टमेव यात्वकाः सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अपि च द्रष्टव्यम्—१, ६, ११, ६; १, ७, ४, १; २, १, ६, ५; २, १, ६, ३; २, २, १०, ३–४; २, ३, ६, ३; २, ३, ११, १–२; २, ५, ७, ४–५; ७, २, ४, ३।

(२) श्वासाः

६, १, ३, ५ सोमयागस्य यजमानेन या मेखला परिधीयते, सा त्रिगुणा भवति। इयं त्रिगुणं श्वासं प्रतिनिदधाति, यजमानस्याभ्यन्तरे च श्वासस्य स्थापनमपि प्रतिपादयति।

अपि च द्रष्टव्यम्—३, ५, ६, २; ७, ५, ८, २; ७, ५, १५, २।

(ट) प्रकीर्णानि

(१) ग्रामः—२, १, १, २; २, १, ३, २; २, १, ६, १; २, १, ७, ५–६; २, २, ५, ६; २, २, ८, १; २, २, ३, ४–५; २, ३, ६, २; ३, ४, ६, २; ५, ४, ११, ३।

(२) सुवर्णम्—२, ३, २।

निवासो गृहञ्च—५, २, १०, ५–६; ५, ५, २, २; ५, ६, २, ४–५।

(३) दृक्शक्तिः—२, २, ६, ३–४, २, ३, ८, १–२।

(४) गीष्पतिः—७, १, १०, ३।

शान्त्यभिचारसम्बद्धा विधयः

(क) दुर्दैवस्य, विध्वंसस्य, मृत्योः पराजयस्य वा परिहारः

५, १, ३, १–२ आगन्तुकस्य भयस्य दूरीकरणार्थं यातुसम्बन्धिनमुपायं निर्दिशति। मृदाक्रान्तिविधौ योऽश्वो मृत्तिकाहरणार्थं नीयते, तस्य पदव्यां पानीयं पात्यते, तदा पदव्यां सुवर्णं निक्षिप्यते, बलिश्चोत्सृज्यते। यतोऽग्निं विना कृतो निषेकोऽध्वर्युमन्नीकरोति, राक्षसैर्यज्ञं च नाशयति, अतः सुवर्णनिक्षेपोऽत्राग्नेरुद्देश्यं सम्पादयति। अग्निस्थाने सुवर्णस्य प्रतिनिधित्वोपकल्पनेनेदं निरुध्यते। इदं हि निषेधात्मकं यातुकर्म अस्ति।

५, ६, ६, १ क्षतिं निरोद्धुमग्निचयनविधावग्निमुपगच्छतः कृष्णमृगचर्मनिर्मितोपानद्द्वयधारणं प्रतिपादयति। कृष्णमृगचर्ममन्त्रेण (ब्रह्मणा) छन्दोभिश्च समानमेवेत्यत्र प्रतिपाद्यते। कोऽप्येतयोरुपानहोर्धारणेनाग्निना न पीड्यते। अयमपि निषेधात्मकस्य यातोर्विषयो विद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

५, ७, ५, १–२ यस्याग्निर्भाजने निर्वाप्यते, तं मृत्युरूपा तमिस्राऽवरुणद्धि। अत एव मृत्युम्–तमिस्राम्–अपाकर्तुमग्निं[1] काष्ठैर्जाज्वल्येत। कृष्णं परिधानं कृष्णा गौश्च दक्षिणारूपेण दीयेत। एवं हि कश्चिद् मृत्युम्, तमोयुतं मृत्युं निराकरोति। उपहाराणां कृष्णो वर्णः सादृश्यमूलकयातुना मृत्यो रक्षति।

तद्वदेव—१, ५, २, ५; ५, ५, ६, १–२; ५, ४, ४, ४; ५, ६, २, ४; ६, १, ५, ४–५; ६, ६, २, ३; ७, ४, २, १; ७, ५, १५, १–२।

(ख) वरुणपाशान्मुक्तिः

२, १, २, १–२ काम्येष्टिरस्ति[2]। कश्चनापि वरुणपाशान्मुञ्चति यदि, स एकेन श्वेतपादेन युक्तस्य कृष्णस्य पशोर्बलिं वरुणायोत्सृजेत्। एतद्भेदविशिष्टस्य पशोर्वरुण एव देवता वर्तते।

तद्वदेव—२, २, ५, १; २, ३, १३, १–२; २, ४, १३।

(ग) पापदुर्गतिभ्यां मुक्तिः

२, १, ३, ४–५ काम्येष्टिरस्ति। यो दुर्गत्याऽवरुद्धः, स शत्रुदमनायेन्द्राय चिह्नितललाटमग्रतोऽवनतशृङ्गं पशुमुत्सृजेत्। एवं स स्वस्मात् शत्रुं पापमपाकरोति।

७, ५, १० यातुसम्बन्ध्युपायेन यजमानानां दुर्गतीनां नाशं वर्णयति। महाव्रतदिने योद्धारश्चर्मशरैर्भिद्यन्ति। अत्र सादृश्यमूलो यातुर्विद्यते।

तद्वदेव—२, १, ४, ६–७; २, २, ७, ३–४; ५, ३, १२, १–२।

प्रकीर्णानि—२, १, ८, ४; ६, १, ५, ३; अविरोधमानेतुं स्तः। २, २, ३, १ : स्वसम्बन्धिभिः सह जायमानमथवा क्षेत्रविषयकं विवादमतिक्रान्तुं विद्यते।

(घ) शत्रून् राक्षसांश्च प्रति विधयः

१, १, २, क–ख रक्षसां भूतादीनां चात्र ज्वलनस्य[3] सङ्केतः प्रदर्शयति यद् दर्शपूर्णमासयागाय दर्व्याः शूर्पस्य च प्रतपनेन सह मन्त्राः सम्बद्धाः सन्ति। उपकरणानां प्रतपनम्,

---

(१) गार्हपत्यात् पुनरानीतः।

(२) यो वरुणगृहीतः स्यात्, स एतं वारुणं कृष्णमेकशितिपादमालभेत, वरुणमेव स्वेन भागधेयेनोपधावति, स एवैनं वरुणपाशान्मुञ्चति।

(३) "यज्ञस्य घोषदसि प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः"।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

राक्षसानां प्रज्वालनं प्रतिनिदधाति । १, १, ४, ८ तथा १, १, १०, ए-त्री चेत्यनयोरन्यया-गोपकरणानां प्रतपनेन सह रक्षांसि भूतादयश्च प्रज्वाल्यन्ते ।

१, २, ५, घ–ङ् सोमयागे, गोः सप्तम्यां पदव्यां किञ्चित् सुवर्णखण्डं निक्षिप्यते, तदुपरि च बलिः पात्यते । तदा पदवीं परितो मण्डलमालिख्यते, अथ चायं मन्त्रः पठ्यते— "परिलिखित ँ् रक्षः परिलिखिता अरातय इदमह ँ् रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपि कृन्तामि" । अयं विधिर्लाक्षणिको वर्तते । पदव्या आलेखनं राक्षसादीनामालेखनं लक्षयति । अयं हि सादृश्यमूलको यातुः । "इदमह ँ् रक्षसो ग्रीवा अपि कृन्तामि" इति मन्त्रो रक्षसां शत्रूणां च विनाशाय यातुसूत्रमस्ति ।

१, ३, २ क–घ सोमयागस्य हविर्धानमण्डपे शकटद्वयस्य धुरोरधस्ताद् 'उपरव' निर्माणेन सहेमे मन्त्राः सम्बद्धाः सन्ति । "क" इत्यनेन भूमिः खन्यते । अथ च, ख–घ' इत्यादिभियजमानस्य पादयोरधस्तात् खननं क्षिप्यते । एवं भूमेः खननं खननस्य प्रक्षेपणं च यातुरूपमादधाति । ईप्सितपरिणामानुकरणेन अभिचारः, तथा शत्रुभावं दधानः पुरुष इत्यु-भावपि दूरीक्रियेते ।

१, ६, २—ङ दर्शपूर्णमासयागे यदा बलिर्वेद्यां स्थाप्यते, तदैकं सूत्रमुच्चार्यते यस्य भावोऽस्ति—हे अग्ने मदीये यज्ञे यत्किञ्चिदपि दूषितम्, हे विष्णो यत्किञ्चिद्घृतं पातितम्, तेनाहमवश्यं स्वप्रतिद्वन्द्विनं निर्हन्मि; यस्य हननं कठिनमस्ति ।

१, ६, ६, १ घ अत्र हि दर्शपूर्णमासयागोपसंहारे सूर्योपस्थानादिमन्त्राः सन्ति । एवं-विधो हि मन्त्रः……"इदमहममुं भ्रातव्यमाभ्यो दिग्भ्योऽस्यै दिवोऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स यं द्विष्मः"[१] । अत्रापि यातुधानस्य ध्वनेर्भिन्नो ध्वनिर्नास्ति ।

४, ५, ११, ठ ड ढ वेदिनिर्माणानन्तरं शतरुद्रीयो बलिरुत्सृज्यते । वर्तमाना मन्त्रा अन्वारोहोत्सर्गान् सम्बध्नन्ति । रुद्रं प्रणमन् यजमानस्तस्य कृपायै प्रार्थयते, तत्क्षणमेव च स

---

(१) रक्षोहणो वलगहनो वैष्णवान् खनामीदमहं तं वलगमुद्वपामि ।
यं नः समानो योऽसमानोऽरातीयति गायत्रेण छन्दसाऽवबाढो वलगः ॥
(तै० सं० ६, २, ११, १-२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

स्वध्वनिं परिवर्तमानो यातुधानध्वनिना वदति—"यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि"[१]।

५, ३, ३, १ अस्मिन् विधावभीप्सितोद्देश्यसाधनार्थं वञ्चनोपायः स्वीकृतो वर्तते। अन्यत्र मन्त्रोच्चारणानन्तरमग्निवेद्यश्चतुर्थफलकस्य अक्ष्णयस्तोमीया इष्टका एकस्मिन् स्थाने स्थाप्यन्ते। एवं करणेन शत्रुर्वञ्चितो भवति यजमानश्चैधते।[२]

५, ४, ३, ५ अग्निवेद्याः समाचयनानन्तरं रुद्रायार्कपत्रेण सह शतरुद्रीयो बलिरुत्सृज्यते। अत्रेदमपि धार्यते यदेतद्धोमानन्तरं द्विष्टशत्रोः पशूनां मार्गे तत्पत्रं निक्षेप्तव्यम्। यः पशुरेतदुपरि पादं निदधाति स ध्वंस्यते। रुद्रदेवः खलु घोररूपेण विनाशकारी परान्तकरश्चेत्यनुमन्यते। अतो रुद्रायोत्सृष्टस्य बलेः सम्पर्केणार्कपत्रमपि क्षयकरं पीडकञ्च भवति, एतन्निकटसम्पर्कं आगतं पशुं च ध्वंसते[3]।

अपि च द्रष्टव्यम्—१, ३, ६ ग; १, ६, ५, ङ–ज, १, ६, ११, ६; १, ७, ४, ५; १, ८, ७, घ तथा छ; २, १, ४, ५; २, १, ५, ७; २, २, ६, ५; २, २, ७, ४; २, ४, १, ३–४; २, ४, २, ३–४; २, ५, ४, २–३; २, ५, ११, ६; २, ६, २, ३–४; २, ६, ६, २–३; ३, २, २, ३; ३, ५, ६, २; ५, १, २, ३, ६; ५, २, ७, ४; ५, ३, ७, २; ५, ३, ११, २; ५, ४, ४, १–२; ५, ४, ११, १–२; ५, ५, १०, क, ग; ५, ७, ३, १; ६, १, ३, ५; ६, २, २, ७; ६, २, ६; ६, २, ३, २–३; ६, २, ५, ४; ६, २, ६, १–२; ६, २, ७, ५; ६, ३, ६, २–३; ६, ३, १०, ३; ६, ५, ५, १–२; ६, ६, ४, ४; ६, ६, ६, १; ६, ६, ११, ६; ७, २, ५, २; ७, २, ५, ४।

(ङ) कस्माचित् कस्यचिद्वियोजनविधयः

स्वपशुभ्यः, साहाय्यात्, बलात्, अन्नात्, स्वासेभ्यः कञ्चिद् वियोजयितुं तथा तं निकृष्टतरं सम्पादयितुं मारयितुं बुभुक्षितादिकर्तुं चायं विभागो विधिनाऽभिव्याप्नोति। नहि कर्तव्य-

---

(१) ५, ५, १० इत्यत्र सर्पाग्न्युत्सर्गेभ्यो मन्त्रास्तथा महान्तः पड्डुत्सर्गाश्च कथनस्य तमेव ध्वनिं प्रकटयन्ति।

(२) यदक्ष्णयस्तोमीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवति।

(३) संस्पर्शजमिन्द्रजालम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

क्रमेणापि तु विपरीतक्रमेणास्य विधेः सम्पादनेनाध्वर्युः शत्रोर्दुर्दैवमानेतुं शक्नोति, अथ च तं पीडयति । एकमुदाहरणं पर्याप्तं भविष्यति ।

५, ३, १, ४ वेद्या द्वितीयस्मिन् फलके अश्विनी-ऋतव्या-प्राणभृत्-अपास्या-वयस्याख्या इष्टका यथाविधि निक्षिप्यन्ते । वयस्याख्या इष्टकाः पशवः सन्ति । यद्यध्वर्युः कञ्चन पशुविहीनं चिकीर्षति, तदा स (अध्वर्युः) तस्मै (पुरुषाय) वयस्याख्या इष्टका निक्षिपेत्, तदनन्तरञ्च अपस्याख्याः । एवं स पशुभ्यस्तं वियोजयति । स च पशुभ्यो वियुक्तो भवति ।

अपि च द्रष्टव्यम्—१, ७, १, ३; ५, १, १, १–२; ५, २, ६, ३; ५, २, ८, ४; ५, २, ६, १; ५, ४, ८, १; ६, ३, ३, ४; ६, ३, ४, ५; ६, ४, ६, ४; ६, ६, ४, २ ।

(च) अभिचारमनुतिष्ठद्भिः सम्बद्धा विधयः

२, १, ५, ७ अभिचारमनुतिष्ठन् कश्चिद् यदि ब्रह्मणस्पतये शृङ्गविहीनं पशुमुत्सृजति, तदा तस्य शत्रोर्विध्वंसो जायते । इयं काम्येष्टिरस्ति । अस्मिन् यागे स्फ्यवद् यागस्थलं निर्मीयते । काष्ठमयखड्गो (स्फ्यः) हि वज्रोऽस्ति । प्रयुक्तमास्तरणं कण्टकमयस्य शराख्यतरोर्विभीदकाख्यतरोरिन्धनस्य च भवति । शर इति शब्दः 'शृ' इति धातोः, विभीदक इति शब्दश्च 'भिदिर्' इति धातोर्व्युत्पाद्यते ।

अपि च द्रष्टव्यम्—२, १, ७, ७; २, १, ८, २; २, २, ६ १–२; २, २, १०, ४; २, २, १०, ५; २, २, ११, २–३; ३, २, ३, ४; ३, ४, ८, ५; ६, ४, ५, ६–७; ७, २, ७, ३ ।

(छ) प्रत्यभिचारानुष्ठानम्

२, २, ३, २ काम्येष्टिरस्ति । यविष्ठायाग्नयेऽष्टाकपालेऽपूपस्योत्सर्गं निर्दिशति । तस्मादग्नी रक्षांसि दूरीकरोति; स नाधः पात्यते ।

अपि च द्रष्टव्यम्—२, २, ६, २; ७, २, ७, ४ ।

२—तैत्तिरीयब्राह्मणम्

मन्त्रैर्ब्राह्मणैश्च युक्तं तैत्तिरीयब्राह्मणं तैत्तिरीयसंहितायाः सातत्यमेव वर्तते, यजुर्वेदस्यापरमूलग्रन्थानामिवात्र विषयाः सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

(१) पुष्टिसम्बद्धा विधयः

अयं विभागः पुष्टिधनपशुसन्तानान्नवर्षेत्यादिभिः सम्बद्धान् मन्त्रान् विधींश्च क्रोडीकरोति।

(क) पुष्टिर्धनानि च

१, १, २, २ यो रोहिणीमेऽग्निं स्थापयति, स एधते। स सकामान् अभीष्टान् रोहान् वा संगृह्णाति। 'रुह' इति धातोर्निष्पन्नो रोहिणीशब्दः। यतोऽभीष्टा वर्धन्ते,[१] ते रोहाः सन्ति। अग्न्याधानसमयो यातुसम्बन्धि उद्देश्यं साध्नोति।

१, १, २, ३–४ योऽपरेभ्यो दानकामो विद्यते, स पूर्वाफल्गुनीमेऽग्निं स्थापयेत्। अस्य नक्षत्रस्य देवताऽर्यमास्ति, यः सम्पत्तिदाता कथ्यते। अत एवायं कालविशेषः सर्वाः प्रजा अर्यमसदृशं करोतीति वर्ण्यते।

१, १, २, ८ य उत्तराफल्गुनीनक्षत्रेऽग्निमादधाति, स वसीयान् भवति; यतो हि स संवत्सरस्य नूतनमासारम्भे एवाग्निमादधाति[२]।

१, ३, ७, ७ वाजपेये यजमानो यूपादवतरणानन्तरं स्वकीयं वामपादमजायाश्चर्मणि निदधाति। एवङ्करणेन तस्य समृद्धिः स्थिरा, प्रजननशक्तिश्च सुदृढा भवति। इयमजा गवादिभिः पशुभिः समाना न भवति, यतोऽजा वर्षे त्रिः प्रजायते। अत इयं पुष्टिं[३] प्रतिनिदधाति। यदा यजमानोऽजाचर्मणि पादं निदधाति, तदा तस्मिन् अजायाः सर्वे गुणा अध्यारोप्यन्ते[४]।

२, ७, २, १ वैश्यसवे पूष्णा सम्बद्धं हविः पुष्टिप्राप्तौ साहाय्यं करोति; यतः "पुष् पुष्टौ" इति धातोर्निष्पन्नस्य 'पुष्टि' इत्यस्य देवकरणमेव पूषा विद्यते।

३, २, २, २ दर्शपूर्णमासयागे बर्हिषः संग्रहविधौ यज्ञियं शुष्कधान्यं सम्बोधयतः 'यज्ञस्य घोषदसि'[५] इति सूत्रस्य प्रसङ्गेनेदमुच्यते यदस्योच्चारणेनाध्वर्युर्यजमाने सम्पत्तिं निदधाति[६]।

---

(१) यो रोहिण्यामग्निमाधत्ते ऋध्नोत्येव सर्वान् रोहान् रोहति।

(२) उत्तरयोरादधाति एषा वै रात्रिः संवत्सरस्य यदुत्तरे फल्गुनी मुखत एव संवत्सरस्याग्निमाधाय वसीयान् भवति।

(३) "पुष्ट्यै वा एतद्रूपम् यदजा"।

(४) फ्रेजरानुसारेणायं संसर्गात्मको यातुः।

(५) 'घोषद्' इत्यस्य बहुविधा व्याख्याः क्रियन्ते। कीथमते 'गोपद्' इत्येवोचितः पाठः।

(६) 'गोपद्' शब्दः प्रतीकात्मकं यातूद्देश्यं साध्नोति। गौर्धनमस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

३, ६, १४, १ : योऽश्वमेधेन यजते, तस्मात् तस्य राज्याच्च श्रीरपगच्छति। अत एव द्वौ ब्राह्मणौ वीणां वादयतो गायतश्च। वीणा श्रियो रूपमस्ति, अतः सा यजमाने श्रियः प्रतिष्ठापनं सम्पादयति।

अपि च द्रष्टव्यम्—१, १, ४, ८; १, ६, ६, ५; १, ७, ८, ७; २, १, ४, १; २, ३, ३, २; २, ३, १, १-२; २, ६, ६, ४; २, ७, १०, १; ३, २, २, ८; ३, ७, १, २-३; ३, ८, ३, १; ३, ८, ३, ३; ३, ६, ७, ४; ३, ६, ८, २, ३।

(ख) सन्ततिः

१, १, ५, २ अग्नित्रयाधानेन सम्बद्धानां मन्त्राणां प्रसङ्गेन तिस्रो व्याहृतीः प्रशंसदिदं परामृशति यत् 'भूर्' इत्यस्योच्चारकः सन्ततिं जनयति।

२, २, १, १ कश्चनापि सन्ततिकामो मनसि दशहोतृमन्त्रं जप्त्वा दूर्वास्तम्बे बलिमुत्सृजेत्। प्रजापतिर्दशहोता विद्यते। एतस्यैव मन्त्रस्य जपेन स प्रजापतिर्भवति, तत्सदृशसन्ततिश्च प्रजायते।

२, २, २, ६ देवपत्नीकमन्त्रं विना यज्ञस्य यज्ञत्वं नास्ति। यजमानः सन्ततिं नैव जनयिष्यति। अतः सन्तत्यर्थमिमे मन्त्रा अवश्यं पठनीयाः। यजमानस्य पत्नी एव सन्ततिं जनयति। तदैव सा एवं कर्तुं शक्नोति, यदा देवपत्न्योऽनुरञ्जिता भवन्ति।

२, ७, ४, १ सोमसवे सोमसम्बद्धया ऋचा यजमानोऽभिषिच्यते। सोमो बीजस्य निक्षेप्ताऽस्ति। बीजं सोमो वर्तते। अत एव सौम्या ऋग् यजमाने बीजस्थापनं साध्नोति। इदं साधर्म्यमूलकस्य यातोर्निदर्शनम्।

तद्वदेव—१, ३, १४; २, २, ३, ५; २, २, ११, २; ३,२,२,६; ३, ३, ३,१; ३, ३, ४, १-२; ३, ३, ६, ३।

(ग) पशवः

१, १, २, ७-८ यदि कश्चन वैश्यः शरदि वह्निमादधाति, तदा स पशून् अधिकुरुते। २, १, ५, ५ पशुकामोऽग्निहोत्रविधानावसरे दुग्धेन सह बलिमुत्सृजेत्। पयः पशो रूपमस्ति। एवं पयस उत्सर्गस्तं पशूनधिगमयति। साधर्म्यमूलको यातुः।

३, १, ४, ४ इयं देवनक्षत्रेष्टिरस्ति। यः कोऽपि रुद्रायार्द्रक्षाय च मन्त्रसहायं प्रैयङ्गवं चरुं पयस्युत्सृजति, स पशूनामधिकारी भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

३, २, १, २ दर्शपूर्णमासयागे पर्णशाखया वत्सा नीयन्ते। यद्यध्वर्युर्वाञ्छति यद् यजमानः पशून् अधिकरोत्विति, तदा स तस्मै सपत्रोपशाखां शाखामानयति। अत्र शाखा-भेदविशेषो यातोरुद्देश्यं साध्नोति।

अपि च द्रष्टव्यम्—१, १, ४, ३; १, १, ६, ७; १, २, २, २; १, २, ५, ३; १, ३, ८, ५; १, ६, ६, ६; २, १, ३, २; २, १, ३, ५-६; ३, १, ५, ३, १२; ३, ८, १८, ३; ३, ६, २, ४; ३, ६, १०, २, ३।

(घ) सन्ततिः पशवश्च

१, १, ४, ८ यो गार्हपत्याग्निमाद्यत्वेनादधाति, स सन्ततिम्, पशून्, मिथुनं च विस्तारयति। गार्हपत्यः सन्ततिम्, पशून्, मिथुनं च विस्तारयति। गार्हपत्यः सन्ततिं पशूंश्चाधि-करोति। अत एव य इममादधाति, स इमानि वस्तूनि प्राप्नोति।

१, ३, ३, ४ वाजपेयेऽध्वर्युणा सोमस्य सुरायाश्च चषकाणां ग्रहणं यजमानकर्तृक-मिथुनाय तत्कर्तृकप्रसवाय च कल्पते। यतो हि सोमः पुरुषोऽस्ति सुरा च स्त्री। तौ संयुञ्जाते। तयोः संयोगो यजमानस्य यजमानपत्न्या सह संयोगं प्रतिनिदधाति। परिणामतः स सन्ततिमाप्नोति।

३, १, ४, ५ इयं देवनक्षत्रेष्टिरस्ति। यः कोऽपि आदित्याय पुनर्वसुनक्षत्राय च मन्त्रसहायं बलिमुत्सृजति, स सन्ततिं पशूंश्च विस्तारयति। अस्यारिष्टेर्मूलविषयिणी काचित् कथा वर्णिता विद्यते।

अपि च द्रष्टव्यम्—१, १, २, ४ (मिथुनस्य); १, ४, १०, ६; १, ६, ६, १०; २, १, २, १२; २, १, ५, १०-११; २, २, ४, ३-४; २, २, ६, १०; ३, २, ४, १; ३, २, ८, ६; ३, २, १०, ३; ३, ३, २, २, ३; ३, ६, २, ३; ३, ६, ६, ४।

(ङ) अन्नम्

१, ३, ३, २, ३ वाजपेययागे सोमचषकाणां सुराचषकाणां च प्रयोगः परमन्नेन (देवान्नेन) अवरान्नाद्यं (मनुष्यान्नं) प्रापयति[१]।

१, ३, ३, ७ वाजपेययागे मधुना परिपूर्णं सुवर्णपात्रं माधव्यो भवितुं शुल्कत्वेन दीयते[२]। इदं साधर्म्यमूलकस्य यातोर्निदर्शनम्।

---

(१) सोमग्रहांश्च सुराग्रहांश्च गृह्णाति। एतद्वै देवानां परममन्नं यत्सोम एतन्मनुष्याणां यत्सुरा परमेणैवास्या अन्नाद्येनावरमन्नाद्यमवरुन्धे।

(२) सायणो व्याचष्टे—मध्वादिभोग्यद्रव्ययुक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

१, ३, ७, ६ : यजमानस्य पुत्रपौत्रादयो यूपादवतरन्तं तम् आसपुटैर्घ्नन्ति[१]। एवङ्करणेन ते यजमानमन्नेन समर्धयन्ति। ऊषा अन्नरूपा एव सन्ति[२]। यजमानसम्पर्कागमना-देवैते तस्मिन् (यजमाने) स्वकीयान् गुणान् आदधति।

२, ७, ६, १-२ : ओदनसवनाग्नि (यज्ञे) मन्त्रोच्चारणपूर्वकं सर्वविधमन्नमुत्सृज्यते, अथ चेदं सर्वविधमन्नं प्रापयति[३]।

३, १, ४, १ : इयं देवनक्षत्रेष्टिरस्ति। यः कोऽप्यग्नये कृत्तिकर्क्षाय चाष्टाकपालेऽ-पूपमुत्सृजति स मानवेष्वन्नभोक्ता भवति।

३, ८, २, १ : अश्वमेधे ब्रह्मौदनं पक्तुं सर्वेभ्यः प्रदेशेभ्य आप आनीयन्ते। यतः सर्वत्र प्रदेशेष्वापो विद्यन्ते, अन्नं च जलमस्ति, यतश्च अद्भ्य एवान्नमुत्पद्यते, अत इमा आपोऽन्नं प्रापयन्ति।

३, ६, ५, ३ : ब्रह्मोद्ये "पिलिप्पिला काऽऽसीत् श्रीरेव पिलिप्पिलाऽस्ति[४]" इति चतुर्थ-संवादेन यजमानोऽन्नमाददाति।

अपि च द्रष्टव्यम्—१, १, ३, ५; १, १, ८, ५-६; १, १, ३, ४, १, १, २, ६; १, ३, ३, ३; १, ३, ६, २; १, ३, ६, ६; १, ३, ७, ७; १, ३, ८, १; १, ३, ८, २, ३; १, ६, ४, ५; १, ७, १, १; १, ७, ६, ५; २, २, ६, १; २, २, १०, ७, ३, ८, ६, ५, ३, ८, १०, ४; ३, ८, १४, ६; ३, ८, १८, ३; ३, ६, ४, ८।

(च) वर्षा

१, ६, ४, ५ : राजसूये नभो वर्षयितुं करीरमुत्सृज्यते। करीराणि सोमं संब्रभन्ति[५]।

---

(१) सक्षारमृत्तिकान्मरुस्थलात्खातमृत्तिकाया अश्वत्थपत्त्रैर्बद्धा इमाः पोटलिकाः सन्ति।

(२) ऊपैर्घ्नन्ति। एते हि साक्षादन्नं यद्रूपा साक्षादेवैनमन्नाद्येन समर्धयन्ति।

(३) साधर्म्यमूलको यातुः।

(४) सायणानुसारेण बालसमूहस्य ध्वनेरनुकरणं पिलिप्पिलाऽस्ति। तत्र सर्वथा सम्पन्ने गृहे बालानां बाहुल्यादेवंविधो ध्वनिः सर्वदा सुलभ एव।

वङ्गभाषायां "पिल पिल कोरे" इत्यनेन स्थानस्य संकुलीकरणम्, तथा "पिले" इत्यनेन "पुत्रः" इत्यर्थो गृह्यते।

(५) सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति। यत्करीराणि भवन्ति सौम्ययैवाऽऽहुत्या दिवो वृष्टिमवरुन्धे।

११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

सोमो नैकट्येनापः सम्बध्नाति । स स्रोतसां स्वामी वर्तते । सोऽपां गर्भोऽथवाऽर्भको विद्यते। अतोऽयमुत्सर्गो वर्षां जनयति[१] ।

३, २, ६, ३ : वेदिभूमिनिर्माणार्थं यदाऽध्वर्युर्द्वितीयवारं तृणोपरि स्फ्यमाहन्ति, तदा सः भूमेः पीडां शमयितुं वृष्ट्यर्थं वेदीं (यस्यां खनित्रेण छिद्रं निर्मितमस्ति) सम्बोधयति "वर्षतु ते द्यौः" इति । परिणामतः स वर्षां प्राप्नोति ।

३, ६, ५, २-३; अश्वमेधयागस्य ब्रह्मोद्ये प्रथमं प्रश्नोत्तरवाक्यम्, यस्मिन् 'वर्षा' आद्या 'पूर्वचित्तिः' उक्ता, वर्षा उद्देश्यं साध्नोति । इत्थं दार्शनिकविमर्शवतो मन्त्रस्यायं यातुसम्बन्धीप्रयोगो विद्यते ।

अपि च द्रष्टव्यम्—१, ७, १, १ ।

(छ) कामतृप्तिः

२, ७, १४, २ : य आप्तोर्याम्णा यजति, स तृप्तकामो भवति । यागस्य नाम्न्येव 'आप्' इति धातुः । यातूद्देश्यकस्यास्य प्रयोगे कारणमस्ति ।

अपि च द्रष्टव्यम्—३, १, ४, १५; ३, १, ५, ४ ।

(ज) ऊर्जान्नं च

१, ३, ८, २ : वाजपेययागे औदुम्बरेण स्रुवेण होमो विधीयते । उदुम्बर ऊर्जाऽन्नं च वर्तते । अत औदुम्बरेण स्रुवेण सह होम ऊर्जामन्नं च प्रयच्छति ।

२, ७, २, २ : वैश्यसवे यजमानो ऋषभचर्माधिष्ठाप्यते, ततश्च दध्ना सिच्यते । ऋषभेण[२] दध्ना च सह सम्पर्कादेव कृत्येनानेन यजमानः सन्ततिम् ऊर्जामन्नं च प्राप्नोति ।

अपि च द्रष्टव्यम्—१, २, ६, ५; १, ७, ८, ७; २, ६, ५, २-३ ।

(झ) गुणानां शक्त्यादीनाञ्च प्राप्तिः

(१) ब्रह्मवर्चस्तेजश्च

१, १, २, १ : यः कृतिकानक्षत्रेऽग्निमादधाति, स ब्रह्मवर्चोऽधिकरोति । यतः कृत्तिकानक्षत्रं षण्णां नक्षत्राणां गणो वर्तते । अत एतत्सम्भवति ।

---

(१) संवेदनात्मको यातुः ।

(२) स सन्तानोत्पादयिता विद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

२, १, ५, ५ : तेजस्कामो यदाऽग्निहोत्रं जुहोति, तदा स आज्येन यजेत्। यत आज्यं भासते, अस्योत्सर्गेण स तेज आप्नोति। संवेदनात्मको यातुः।

२, ६, ५, २ : कौकिलासौत्रामणौ यजमान औदुम्बरीमासन्दीमधितिष्ठन् अध्वर्युणा सम्पातैरभिषिच्यते। अभिषिञ्चनमिदं यजमाने तेजो ब्रह्मवर्चश्च प्रतिष्ठापयति।

२, ७, १, ४ : बृहस्पतिसवे यजमानः कृष्णमृगचर्माधितिष्ठन् आज्येनाभिषिच्यते। तदाज्यं च यजमाने ब्रह्मवर्चस्तेजश्च प्रतिष्ठापयति। कृष्णाजिनं हि ब्रह्मणो रूपमाज्यं च साक्षात्तेज एव। इदं हि संवेदनात्मकस्य यातोरुदाहरणमस्ति।

३, ६, १६, ३ : अश्वमेधप्रशंसायामिदमुक्तं यदयं यागो 'ब्रह्मवर्चसी' इति सङ्केतेनाभिधीयते। यत्र देशे यागोऽयं विधीयते, तत्रत्या ब्राह्मणा ब्रह्मवर्चोऽधिकुर्वते।

२, ७, ४, ३ : ब्राह्मणसवेऽष्टौ बलयः सन्ति। ब्रह्मवर्चोऽष्टाक्षरमयीं गायत्रीं संबध्नाति। अतो यजमानो गायत्रीच्छन्दसा ब्रह्मवर्चो निवर्तयति। एवमष्टौ बलयः प्रतीकात्मकयातूद्देश्यं साधयन्ति।

२, ७, ६, ३ : ओदनसवे यजमानस्य कर्णे, तस्मिन् ज्योतिस्तेजश्चाधातुं सौवर्णमाभूषणं बध्यते। सुवर्णं ज्योतिस्तेजश्चास्ति।

३, ६, ५, १ : इदमुक्तं यद्यः कोऽपि अश्वमेधेन यजते, स ब्रह्मवर्चस्तेजोभ्यां विवर्धते। पुनस्तस्मिन् ब्रह्मा होता च ब्रह्मोद्यं पठतः, एतद्धि ब्रह्मवर्चस्तेजोभ्यां यज्ञान् समेधयितुं वर्तते।

३, ६, ५, ४ : "क एकाकी भ्रमति ? सूर्य एकाकी भ्रमति" इति पञ्चमेन ब्रह्मोद्यसंवादेन यजमानस्तेजः प्राप्नोति। आदित्यः सूर्यो वा तेजसः प्रतीको वर्त्तते।

३, ६, १६, ३ : अश्वमेधप्रशंसायामिदमुक्तं भवति, यदयं यागो नाम 'ब्रह्मवर्चसी' इति संकेतेनाभिधीयते। यत्र देशे यागोऽयं विधीयते, तत्रत्या ब्राह्मणा ब्रह्मवर्चोऽधिकुर्वन्ति।

अपि च द्रष्टव्यम्—१, १, २, ६; १, १, ३, ११; २, १, ३, २; २, ७, १, १-२; २, ७, ७, ७; ३, १, ४, ६; ३, १, ५, १०; ३, २, ६, १-२; ३, ६, ५, २; ३, ६, ५, ४ (सप्तमं द्वादशं च प्रश्नोत्तरवाक्यम्)।

(२) ऊर्जा शक्त्यादयश्च

१, १, २, ६; यस्य शत्रवः सन्ति, स चित्रानक्षत्रेऽग्निमादध्यात्। एवं स्वशत्रूनुत्साद्य स स्वस्मिन् ओजो बलम् इन्द्रियं वीर्यं चादधाति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१, ३, २, ३–४ : यः कोऽपि सोमं वाजपेयत्वेन जानाति, अस्य वाजेन स वाजी भवति, अथ च तस्य सबलः पुत्रो जायते।

३, ८, १, १ : अश्वमेधयागेऽस्त्रं बद्धुं मौञ्जी रशना निर्मीयते। मुञ्ज ओजोऽस्ति। अत एवायमोजोऽधिकारं साध्नोति।

३, ६, १६, १ : अश्वमेधप्रशंसायामिदमुक्तं यदश्वमेधः खलु "ऊर्जस्वान्" यागो वर्तते। अत एव यत्रायं विधीयते, तत्र सर्वे ऊर्जस्विनो भवन्ति।

अपि च द्रष्टव्यम्—१, १, २, ७; १, १, ३, १०; १, १, ४, ३; १, १, ६, ५; १, १, ६, १०; १, ३, ३, २; १, ३, ५, ५; १, ३, ६, ७; १, ३, ७, १–२; १, ३, ८, ४–५; १, ६, ४, ४; १, ३, ७, १; १, ७, ६, ४; १, ७, ६, २; २, १, ५, ६; २, २, ८, २–३; २, ३, ८, २; २, ६, १, ४, ५; ३, २, १, ३; ३, २, ६, १; ३, ७, १, १–२; ३, ८, ५, २।

(३) ज्येष्ठता

१, १, २, १ : कृत्तिकानक्षत्रं नक्षत्राणां मुखं वर्तते। अतो यः कोऽपि कृत्तिकास्वऽग्निमादधाति, स सर्वेषु ज्येष्ठो भवति।

२, ७, १, २ : "यः पुरोधाकामः स्यात्, स बृहस्पतिसवेन यजेत। पुरोधामेव गच्छति।"

२, ७, ६, ४ : रोहिणीमे यदि ओदनसवो विधीयते, तदा यजमानः स्वसमानानां प्रधानो भवति। रोहिणी ब्राह्मणनक्षत्रमस्ति। यथा ब्राह्मणः सर्वास्वन्यासु जातिषु श्रेष्ठो वर्तते, तथैवास्मिन्नक्षत्रे य ओदनसवेन यजति, स (श्रेष्ठो) भवति।

तद्वदेव—१, १, २, ६–७; २, २, १०, ३; २, ७, ११, २, ३; ३, १४, १०, १४; ३, १, ५, २; ३, १, ५, ८;

(न) दीर्घायुष्यप्राप्ती रोगान्मुक्तिश्च

१, ३, ७, ७ : वाजपेये यूपादवतरणानन्तरं यजमानः शतमाने[१] सुवर्णसंयुतेऽजचर्मणि पादमादधाति। शतायुर्वै पुरुषो भवति, शतं चेन्द्रियाणि सन्ति। अतः शतमानो जीवनमिन्द्रियाणि च प्रतिनिदधातुं वर्तते। अतो जीवने बले चायं यजमानं प्रतिष्ठापयति।

१—सायणाचार्यानुसारेण पञ्चपणपरिमितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

२, ४, ४, १–२ : अथर्ववेदसंहिताया मन्त्राभ्यां (अ० वे० सं० १, २३ तथा १, २४, ३) कैश्चिद् भेदैः सहायं मन्त्रः संवदति, कुष्ठं प्रति अभिचारवच्च प्रतिभाति। रामा, कृष्णा, असिक्नी, रजनी, चेत्योषधयः संबोध्यन्ते, रात्रिजाश्चेमाः कथ्यन्ते। तासां तिरोधानस्थानि निवासस्थानानि च कृष्णानि सन्ति। कीकसजं शरीरजं वा किलासं पलितं चापाकर्तुं स्वशरीरानुरूपं शरीरं च विधातुमिमा ओषध्यः प्रार्थ्यन्ते। चतुर्थे मन्त्रे ऋषिरुद्घोषयति यत् स ब्रह्मबलेन शरीरात् किलासमन्तर्धापयामास। उपर्युक्तानामोषधीनां कृष्णो वर्णो महत्वपूर्णो वर्तते। स्वकीयवर्णेन किलासं परिष्कर्तुं हि स (वर्णः) वर्तते। संवेदनात्मकस्य यातोरिदमुदाहरणं विद्यते।

३, ६, ५, ४ : अश्वमेधयागे ब्रह्मोद्यस्य षष्ठं वाक्यं[1] यजमानस्य कृते दीर्घायुष्ट्वं साध्नोति। "जायते" इत्यत्र "जन्" धातुर्जीवनं प्रतिनिदधाति। अत एव जनो जीवनमाप्नोति। दार्शनिकभावात्मकस्य मन्त्रस्यायं यातुसम्बन्धी प्रयोगो विद्यते।

अपि च द्रष्टव्यम्—१, ४, ३, २; १, ७, ६, २; १, ७, ७, ५; १, ७, ८, २; १, ८, ६, ५; २, १, ६, ३; २, २, ६, ६; २, ५, ७, २; २, ७, ७, ७; ३, ८, ३, ३; ३, ८, ५, ४; ३, ८, १५, ३; ३, ८, १६, २; ३, ६, ६, १; ३, ६, ६, ३; ३, ६, ७, ४; ३, ६, १६, ३, (अश्वमेधस्यैकादशो गुणो द्रष्टव्यः) ३, ६, २१।

(ट) राजकर्माणि

१, ३, २, ३ : वाजपेयकर्ता स्वकीयं राज्यमधिगच्छति, स्वसमानेषु च श्रेष्ठो भवति।

१, ३, ५, ४ : वाजपेये यजमानस्य त्रयो विष्णुविक्रमास्त्रैलोक्यविजयाय कल्पन्ते। पादन्याससमये स आत्मानं विष्णुमनुभवति। विधिरयं प्रतीकात्मको यातुमयश्च वर्तते।

१, ७, ८, ५ : राजसूये राजानम्, यस्य चरणयोरधस्तात् सुवर्णम्, शिरसि च सौवर्णपद्ममस्ति, "त्वं क्षत्रियाणां राजासि" इत्यर्थकेन सूत्रेणाध्वर्युरभिषिञ्चति। एवं करणेन स तं क्षत्रियाणां क्षत्रपतिं निर्मिमीते।

२, ७, ६, ३ : गोसवे यजमानोऽभिषेकमन्त्रेणाभिषिच्यते[2], एवञ्च स स्वाराज्येन सह राज्यमधिगच्छति।

१—क उ स्विज्जायते पुनरित्याह चन्द्रमा वै जायते पुनः।

२–रेवज्जातः सहसा वृद्धः......प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अपि च द्रष्टव्यम्—१, ७, ८, ७; २, ७, ६, २; २, ७, ११, २; ३, १, ४, ३; २, १, ५, १४; ३, ८, ५, १; ३, ६, ४, ३; ३, ६, ४, ५; ३, ६, ७, १.

(१) प्रकीर्णानि

१, ५, २, ३ : नक्षत्रेष्टकामन्त्राणां व्याख्यानप्रसङ्गेनेदमुच्यते, यद् यदि कश्चन 'मदीया पुत्री पतिप्रिया भवेत्' इति कामयते, तदा स शुभे स्वातीनक्षत्रे तां प्रदद्यात्। एवञ्च सा पत्युरेतावती प्रिया भविष्यति, यत् पतिप्रेमकारणादेव पितृगृहमपि न साक्षात्कर्तुं चिकीर्षिष्यति।

तद्वदेव—१, ३, ३, ७ (आयुस्तेजश्च), १, १, ३, ४–५ (बधिरत्वहानिः), १, ३, २, ५ तथा १, ३, ६, २–३ (वाक्शक्तिः)

शान्त्यभिचारसम्बद्धा विषयः

(क) वरुणपाशादिभ्यो विमुक्तिः

२, ६, ६, ४ : कौकिलासौत्रामणाववभृथोत्सवप्रसङ्गेन यजमानः सर्वपापेभ्यो विमुक्त्यर्थं "यद्देवा देव हेळनम्" इत्यारभ्य "यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च" इत्यन्तेन मन्त्रेण सह पञ्च वलीन् प्रथममुत्सृजति। तदनन्तरं स जलं प्रविशति, कथयति च—"वरुणपाशः प्रतियुतः, वरुणपाशः प्रत्यस्तः" इति। जलं हि वरुणं तत्पाशञ्च प्रतिनिदधाति। अद्भ्यो निष्क्रमणेन सहैव स वरुणपाशादुन्मुक्तो भवति। अत्राभीप्सितः परिणामोऽनुकरणरूपेण प्रतिनिधीयते।

३, ६, १५, १ : इदमुक्तं यद् योऽश्वमेधेन यजति, तस्य मृत्योः परिहारार्थं सर्वाभ्यो मृत्युभ्यो[१] मन्त्रोच्चारणेन[२] सह वलय उत्सृज्येरन्। एवं यजमानो मृत्योर्विमुक्तो भवति।

तद्वदेव—१, ६, ४, १; १, ६, ४, ५; १, ५, ६, ७ (वरुणपाशः); २, १, ३, १; २, १, ३, ६; २, १, ७, ५ (मृत्युः) १, २, ३, १–२; १, ६, १, २; ३, १०, १०, २–४ (आर्तिः)

१—उदाहरणार्थम्–रोगजन्यक्षुज्जन्येत्यादयो मृत्यवः।

२—मृत्यवे स्वाहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(ख) पापात् विमुक्तिः

१, ३, ३, ३–४ : वाजपेयेऽध्वर्युर्यजमानस्य शमलं पापपूर्णं भागं च[1] सुराचषकग्रहण-द्वाराऽन्नशमलेन[2] तस्मादपहन्ति। सुराऽन्नस्य शमलमस्ति।

३, ८, १, २ : अश्वमेधे केशश्मश्रुमुण्डनम्, नखच्छेदनम्, दन्तप्रक्षालनम्, स्नानम्, नूतनवासःपरिधानं च यजमानात्पापानि दूरीकुर्वते।

३, ८, ४, १ : चतुरक्षं श्वानमश्वञ्च स्नापनानन्तरं "यः कश्चनाप्यश्वं जिघांसति, तं वरुणो हिनस्ति" इति शब्दैरध्वर्युः श्वानं हन्तुं दासीपुत्रमादिशति। "मर्तोऽतिदूरं गच्छेत्, श्वा (अतिदूरं गच्छेत्)" इति शब्दैर्दासीपुत्रः श्वानं हिनस्ति। श्वहिंसया वस्तुतः स यजमानस्य शत्रुरूपं पापं हिनस्ति। पापं हि सम्भवतो मृत्योः पापमस्ति। विधिरयं प्रतीकात्मको यातुश्चास्ति।

तद्वदेव[3]—१, ४, ३, २, १, ५, ६, ६; १, ६, १, ३; २, ७, १८, ४; २, ७, १८, ५; ३, ८, १६, २; ३, ८, २०, १; ३, ६, १५, २; ३, ६, १८, २.

(ग) शत्रूणां रक्षसां चोच्छेदः

सोमयागेऽध्वर्युः प्रतिप्रस्थाता च, ययोः प्रत्येकं काष्ठखण्डौ एकोऽभिषिञ्चितोऽन्यस्त्वा-सिञ्चितः, गृह्णाति, यथाक्रमं शुक्रं मन्थिचषकञ्चाकर्षतः। "शण्डो[4] दूरं प्रक्षिप्यते, मर्को दूरं प्रक्षिप्यते" इत्यर्थकेन मन्त्रेण तौ वेद्या बहिरनभिषिञ्चितं खण्डं प्रक्षिपतः। पुनरेतौ पुरोहितौ काष्ठस्याभिषिञ्चितेन शकलेन चषकान् आच्छादयतः, अथ च तौ शण्डमर्कयोः प्रतीकभूतानां चषकाणां धूलिमनभिषिञ्चितेन शकलेन शिरस आरम्भ-आमूलं "शण्डमर्कावपनुत्तौ"[5] इति शब्दैः परिमार्जयतः। एवं हि प्रतीकात्मकविधिसम्पादनेनाभीप्सितः परिणामोऽवाप्यते[6]।

१, १, ५, ५ : अग्न्याधानोत्सव आहवनीयस्य सम्मुखं एकोऽश्वो नीयते। एवङ्करणेन सोऽश्वो यजमानस्योत्पन्नान् शत्रून् नाशयति। तदा सोऽश्वस्तेनैव पथा परावर्त्यते, इदं (परा-

(१) सुराग्रहान्गृह्णाति अन्नस्य वा एतच्छमलं यत्सुरा, अन्नस्यैव शमलेन शमलं यजमानादपहन्ति।

(२) तथैव यथा विषस्य विषमौषधं भवति।

(३) ३, ८, २०, १ तथा ३, ९, १५, २ भ्रूणहत्यया सम्बद्धौ।

(४) उत्तरकाले शण्डमर्कौ असुराणां पुरोहितौ जातौ स्तः।

(५) "निरस्तः शण्डः" इत्यादेः प्रथममन्त्रात् पूर्वमेवायं मन्त्रो गृह्येत।

(६) शुक्रस्य मन्थिचषकाणां चाकर्षणसम्बन्धे शण्डमर्कयोरपनोदनाया यदपि द्रष्टव्यम्—तै० सं० ६, ४, १०–१२ तथा वा० सं० ७, १२–१८ च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वर्तनम्) उत्पत्स्यमानानां शत्रूणां ध्वंसं साध्नोति। अश्वो वज्री वर्तत इयमेवात्र युक्तिर्भवेत्। मेघगर्जनस्य विद्युतश्च ऋग्वेदीयाऽपानपाद्देवताऽश्वत्वेनावधारिता विद्यते।

२, १, ३, ४ : अग्निहोत्रे ज्वलत्तृणानां पर्यग्निकरणं रक्षसां विध्वंसनं साध्नोति।

२, २, ३, २ : कोऽपि यजमानं घातयितुकामः तस्मै चतुर्होतृमन्त्रैः कृष्णपक्षे यजेत[1]।

२, २, १ ७ : योऽभिचारमभ्यस्यति, स दशहोतृमन्त्रैः प्राकृतिके मरुस्थलेऽथवा पृथिव्या विदारणे विवरे वा यजेत। निर्ऋत्युपसृष्टानि खल्विमानि स्थलानि विद्यन्ते। इयं शत्रुं गृह्णाति। दशहोतृमन्त्रैर्यजनेन स सर्वैस्तस्य श्वासैः संहतरूपं शत्रुं प्रत्यभ्यस्यति। कस्मिंश्चिदपि मनुष्ये नव श्वासाः भवन्ति, दशमश्च नाभिरेव। एवं स स्वशत्रोः श्वासानभिहन्ति। शत्रोरुच्छेदनार्थमेव स परुषया भाषया[2] "वषट्" इत्युच्चारयति।

२, ७, १, ८, १ : विघनएकाहयागस्योत्पत्तिवर्णनावसरे इदमुच्यते, यद् यो विघनएकाहेन यजते, सः स्वकीयानि पापानि नाशयति। "हन् हिंसायाम्" इति धातोर्निष्पन्नो "विघन" इति शब्दः साभिप्रायो वर्तते।

३, २, ५, ५ : दर्शपूर्णमासयागेषु यज्ञसामग्रीणां संशोधनान्तरं मृगचर्म, यस्मिन् संपीडनयन्त्राणि, संचूर्णनयन्त्राणि वाऽऽधीयन्ते, "रक्षांसि निरस्तानि, भूतादयो निरस्ताः" इत्यर्थकैः शब्दै रक्षसां विध्वंसार्थं प्रचाल्यते। विधिरयं प्रतीकात्मको यातुरस्ति।

३, २, ५, १० : अत्र शूर्पेणान्नस्य तुषाणां विशोधनं रक्षसां भूतादीनां च[3] निराकरणं प्रतीकायते।

३, २, ६, १–६ : स्तम्बयजुर्हरणेनायं विधिर्व्यवह्रियते। "देवस्य त्वा सवितुः प्रसवे" इत्यादिना··· "मन्त्रेणाध्वर्युः खनित्रं गृह्णाति, प्रक्षिपति चेदं तृणस्थापितायां वेद्याम्। तदनन्तरं स "हे सवितृदेव! योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः, तान् शतेन पाशैः पृथिव्या अस्या

---

(१) शुक्लकृष्णपक्षसम्बन्धि किञ्चिदाख्यानकमेवं प्रस्तूयते—यदा प्रजापतिना त्रिवृत्तस्तोम उत्पादितः तदायं पञ्चदशस्तोमेन शकलद्वये खण्डितः। तौ खलु भागौ शुक्लपक्षत्वेन कृष्णपक्षत्वेन च परिणतौ। यतो हि स कृष्णपक्षनिर्माणपूर्वकमेवासुरान् निर्ममौ, अतो यः कृष्णपक्षे यजते, स पापीयान् वसीयसो विपरीतः भवति।

(२) अरण्यकाण्ड एवं हि परुषा वाचः परिगण्यन्ते—खट् फट् जहि छिन्धि भिन्धि हन्धि फट्। इति वाचः क्रूराणि।

(३) परापूतं रक्षः परापूता अरातयः। रक्षसामपहत्यै।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

दूरतमेऽन्तिमे भागे बधान" इत्यर्थकैः शब्दैरुत्करोपरि पुरीषं प्रक्षिपति। राक्षसोऽररुः शत्रुर्विद्यते। अत एव प्रथमेन स्तम्बयजुर्हरणेन स पृथिव्या अररुं निराकरोति। तस्यैव विधेर्द्वितीययाऽऽवृत्त्या वायोस्तृतीयया चाकाशाच्छत्रून् निराकरोति। चतुर्थावसरेऽसौ परिमिताल्लोकात् तं निराकर्तुं तमेव स्तम्बयजुर्हरणविधिं तूष्णीमावर्तयति[१]।

तद्वदेव १, ५, ६, ५; १, ५, ६, ७; १, ६, ६, ६; १, ७, ८, १–२; २, १, ४, ४; २, १, ५, ११; २, ७, १८, ३, ४; ३, २, २, २; ३, २, ३, १२; ३, २, ४, २, ३; ३, २, ६, १; ३, २, १०, १; ३, ३, १, १; ३, ८, १५, १; ३, ८, १७, १; ३, ६, ११, २–३।

(घ) पशुविहीनता

३, २, १, २ दर्शपूर्णमासयागेषु पर्णशाखया गोर्वत्सा दूरं नीयन्ते। यद्यध्वर्युर्यजमानं पशुविहीनं चिकीर्षति, तदा स तस्मै पर्णरहितां शुष्काग्रिमभागां च शाखामानयेत्। एवं हि यजमानोऽपशुर्भवेत्। अयं खलु शाखाविशेषः किञ्चिद् यातुकर्मकमुद्देश्यं साध्नोति। हरितपर्णघासादिमयं हि गवां भोजनं भवति। शुष्कशाखया वत्सानां नयनेन स पशून् स्वभोजनविहीनान् करोति; परिणामतस्ते मरिष्यन्ति, यजमानश्च पशुविहीनो भविष्यति। सपत्रप्ररोहा शाखा हि यजमानं पशुधनमधिगमयति॥

—:o:—

(१) स्तम्बयजुर्हरणेन 'अररु' नाम्नो राक्षसस्य निराकरणं खलु, वा० सं० १, २४, २६ तथा तै० स० १, १, ९, १–एफ, इत्यत्रापि वर्ण्यते, परन्तु तत्र त्रिरावृत्तिरेव प्रतिपादिता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

चतुर्थोऽध्यायः

शुक्लयजुर्वेदे यातुसम्बन्धिसामग्रयः

काण्वमाध्यन्दिनशाखाद्वयात्मको हि शुक्लयजुर्वेदोऽस्माकं समक्षं सुरक्षितो वर्तते। शाखयोरनयोर्माध्यन्दिनशाखा सर्वेषां सुविदितैव। शाखाया अस्याः संहिता ब्राह्मणं चेत्येतदुभयमपि साङ्गोपाङ्गं प्रकाशितं विद्यते। माध्यन्दिनशाखाया उव्वटकृतं प्राचीनं भाष्यम्, महीधरकृतं सविस्तरं नूतनं भाष्यं च प्रकाशिते स्तः; काण्वशाखायाः सायणकृतं भाष्यम्, हरिस्वामिकृतं भाष्यं चोपलभ्येते। अत्र शुक्लयजुर्वेदस्य माध्यन्दिनशाखैव प्रतिनिधित्वेन मया गृहीता।

तैत्तिरीयसंहितातैत्तिरीयब्राह्मणयोर्विषया इव माध्यन्दिनसंहितामाध्यन्दिनशतपथब्राह्मणयोर्विषया अपि समस्वभावा एव वर्तन्ते। क्रिया मन्त्राश्च बहुधा संगच्छन्ते।

१—माध्यन्दिनसंहिता

(१) पुष्टिसम्बद्धा मन्त्राः

(क) पुष्टिधनान्नसन्ततीत्यादयः

१, १ दर्शपूर्णमासयागस्य प्रथमे दिने पलाशस्य शम्या वोपशाखा, या गोर्वत्सान् दूरीकर्तुं छिद्यते, सा किञ्चिद् यात्विकमुद्देश्यं साध्नोति। यथा—इदं हि यजमानद्वारा अन्नं बलञ्च[1] प्राप्तुं वर्तते। अपि च द्रष्टव्यम्—२०, ३ (ख)।

१, २२ दर्शपूर्णमासयागे यदाऽद्भिस्तण्डुलो मिश्र्यते, तदा "प्रजात्यै त्वां[2] संबध्नामि" इत्यर्थकं सूत्रं पठ्यते। अत एवात्र मिश्रणं वंशस्य सन्तानस्य वा प्राप्तिं साध्नोति। पुनरग्नयेऽग्नीषोमाय चोत्सृज्यमानमपूपं कपालेषु विस्तार्यते; अथ च विस्तृतं तदपूपं तथा सम्बोध्यते, यथा यजमानः (पुत्रपौत्रादिभिः) आत्मानं विस्तारयेत् (इयं पुष्टिरस्ति)[3], कपालेषु विस्तारः सहानुभूतिकयातुन्यायेन यजमानं प्रभावयेत्।

---

(१) "इषे त्वोर्जे त्वा" (यजुर्वेदसंहिता, स्वाध्यायमण्डलम्, औंध, विक्रमसंवत् १९८४)।

(२) अत्रान्यत्र च ग्रिफिथमहोदयस्यानुवाद एवोद्धृतः।

(३) उरु प्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

५, ४३ (बी) यूपनिर्माणप्रसङ्गेन समुचितं वृक्षं छेत्तुं तक्षकेण सहाध्वर्युर्गच्छति, यत्र च प्रथमा च्छिदा क्रियमाणा वर्तते, तत्र दूर्वादलं प्रक्षिपति। यथा वृक्षः पतति, शतेन शाखाभिः सहैधितुं[1] स स्थाणुं सम्बोधयति, येन स स्वयमपि तत्सदृश एवैधेत, अर्थात् स सन्ततिभिः पशुभिश्च स्वं विस्तारयेत्; एवञ्च स पुष्टिमधिगच्छेत्। शतेन प्ररोहैः स्थाणोरभिवर्धनेन सह यजमानोऽप्युपचेष्यतेऽथ चैधिष्यते। अत्रापि सहानुभूतिकयातुन्यायो विद्यते।

८, ६० यज्ञद्वारा सर्वेभ्यो मण्डलेभ्य आकाशात्, वायोः, पृथिव्यास्तथाऽन्तरिक्षात् प्राणिभ्यश्च धनप्राप्त्यर्थं यातुमन्त्रवदयं प्रतिभाति। भावानुवाद एवं पठ्यते—'(यतो) देवान् नभश्च यज्ञो गतवान् वर्तते, अतो धनानि मामागच्छत। मनुष्यान् वायुं च यज्ञो गतः, अतो मां धनान्यागच्छत' इत्यादि।

९, ५-६ (ख) वाजपेययागे [2]रथधावनमनुष्ठीयते। पञ्चमेन[3] मन्त्रेण सहाध्वर्यू रथं सम्बोधयति, षष्ठेन[4] मन्त्रेण च स धनान्यानेतुं धनप्रदातृजलेन गृहानभिषिञ्चति। एतादृग्धन-विजेतृरथेन योजिता एतादृग्धनप्रदातृजलेनाभिषिञ्चिताश्चाश्वा अवश्यं धनान्यानयन्ति।

९, २२ वाजपेययागे सर्वमासेभ्यः सर्वर्तुभ्यश्च बलेरुत्सर्गानन्तरमौदुम्बरमासनम्, यत्राजाचर्मास्तीर्यते, उद्दिशन्नध्वर्युस्तत्र यजमानम्—"इदं ते स्वाराज्यम्, त्वं शासकोऽसि, त्वं दमयिताऽसि, त्वं दृढोऽचलश्चासि। ते भूमिकर्षणम्, ते शान्तिः निरुपद्रवश्च, ते धनम्, तेऽस्मत्पदार्थाभिवर्धनम्" इत्यर्थकेन सूत्रेण सहोपवेशयति। अध्वर्युद्वारा यजमानस्योपवेशन-मिदं स्वकीयां पुष्टिं प्रापयति।

९, ३१ वाजपेययागे वाजप्रसवनीयबलिपूर्वकमध्वर्युर्यागसामग्रीणामवशेषेण यजमान-मभिषिञ्चति, तमुज्जितीश्च पाठयति, यासु विभिन्नाक्षरमयानां छन्दसां[5] द्वारा प्राणवायुं त्रैलोक्यं पशुं चावाप्तुमभिलाषः प्रकटितः।

---

(१) अतस्त्वं देव वनस्पतये शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम।

(२) यजमानायोत्कर्षं विजयं स्वाराज्यं च प्रदातुं रथधावनं याज्ञिकं विधानं विद्यते।

(३) "त्वं धनविजेता, इन्द्रस्य वज्रश्चासि, त्वया सहायं मनुष्यो धनानि विजयेत्" इत्यादि।

(४) "अपि! धनप्रदात्र्यो वेगेन धावन्त्यः, उच्चैः प्रोन्नता दिव्या आपो या काचन युष्माकं लहरी विद्यते, ततोऽयं मनुष्यो धनानि विजयेत्" (भावानुवादोऽयम्)।

(५) "अग्निरेकाक्षरेण प्राणमुदजयत् तमुज्जेषमश्विनौ" इत्यादि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१०, २१ राजसूययागे दीक्षानन्तरं यजमानो वाजपेयाख्यं रथं योजयति, अथ च "इन्द्रस्य वज्रोऽसि······अव्यथायै त्वा स्वधायै त्वा" इत्यर्थकेन मन्त्रेण सह अव्यथां स्वधां चावाप्तुं तमारोहति। अयमपि सहानुभूतिको यातुर्वर्तते।

२०, २३ सौत्रामणियागे "एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि" इति मन्त्रेण सह यजमान आहवनीयाग्नौ काष्ठशकलं प्रक्षिपति। अत्र दग्धकाष्ठाय प्रयुक्तः शब्दः श्लिष्टो वर्तते। यथा—'एध्' इत्यस्य वर्धनम्, उन्नतिकरणं चार्थौ भवतः। शब्दानां धात्वर्थोऽपि यातुरूपेणाभीष्टोद्देश्यपूर्तये कल्प्यते। अत्र सहानुभूतिकयातुर्वर्तते।

(ख) वर्षा

८, ४८ अदाभ्यग्रहाकर्षणपूर्वकं यजमान आहवनीयाग्निस्थानमुपगच्छति—"व्रेशीनां त्वा पत्मन्ना धुनोमि। कुकूननानां पत्मन्ना धुनोमि" इत्यादिना मन्त्रेण सह सीमोपशाखाभिर्निग्राभ्याख्यं[१] जलञ्च विक्षोभयति। सोमशाखाभिरपां विक्षोभो जलपूर्णस्य मेघस्य सञ्चालनं प्रतिनिदधाति। एवं हि स (मेघः) सञ्चालितो भूत्वाऽवश्यं वर्षिष्यति।

(२) वीर्यम्, ब्रह्मवर्चः, यश इत्यादीनि

१, ३० अध्वर्युः "अदित्यै रास्नासि" इति मन्त्रोच्चारणपूर्वकं यजमानस्य पत्नीं त्रिगुणया मौञ्ज्या रसनया वेष्टते, तदनन्तरं च स ग्रन्थिं बध्नाति, तथा "विष्णोर्वेष्पोऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि" इत्यादिना मन्त्रेण सह तां यजमानपत्न्याः स्कन्धे प्रतिष्ठापयति। एवं हि रसनायां ग्रन्थिकरणं प्रासङ्गिकेनोर्जाप्राप्तिसाधनत्वेन कल्पितमस्ति।

१०, २५ राजसूययज्ञे रथादवतरणानन्तरं राजा "इयदस्यायुरस्यायुर्मयि धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेहि" इति मन्त्रेण सह रथाश्रयस्य दक्षिणे चक्रे बद्धयोरन्यतरं सुवर्णफलकं स्पृशति। तदनन्तरम् "ऊर्गस्यूर्जं मयि धेहि" इत्यादिमन्त्रं पठन् स चक्रमार्गेऽन्तर्हितामुदुम्बरशाखां स्पृशति। वर्चो हिरण्यं संबध्नाति, ऊर्जा चोदुम्बरम्। एवं चानयोर्वस्तुनोः स्पर्शेन मन्त्रप्रभावेण च सहानुभूतिकयातुन्यायेन राजा तान् गुणान् स्वस्मिन्नादधाति।

२०, ३ सौत्रामणियज्ञे "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहूभ्यां पूष्णो हस्ताभ्याम्। अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि" इति मन्त्रेण सह वपाहुतिभ्योऽवशिष्टेना-

(१) होत्रचमके स्थापिता वसतीवर्याप एव निग्राभ्याख्या आपो वर्तन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ध्वर्युर्यजमानं प्रोक्षति। आगन्तुकरूपेण यागविशेषस्यास्य विधानसमनन्तरमेव तेजो ब्रह्मवर्चो वीर्यं यशश्चावाप्यन्ते।

एवमेव ४, १०; १६, ६, ६ इत्यत्रापि द्रष्टव्यम्।

(३) दीर्घायुष्ट्वरोगविमुक्तिसंबद्धा मन्त्राः

१, २० दर्शपूर्णमासयागे कृष्णमृगचर्मोपरि स्थापितेऽधरोपले यदौदनमुत्सृज्यते, तदा प्राणवायुं दीर्घायुष्ट्वं चावाप्तुम् "धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा—" इत्यादिर्मन्त्रः पठ्यते। अयं यागो यातवमुद्देश्यमागन्तुकरूपेण प्रतिपादयितुं विधीयते। अपि च द्रष्टव्यम्—१८, २,

१०, २५ तद्वदेव राजसूययागे यजमानः "इयदस्यायुरस्यायुर्मयि धेहि····· " इति मन्त्रेण सह रथाश्रयस्य दक्षिणे चक्रे बद्धयोरन्यतरं सुवर्णफलकं स्पृशति। आगन्तुकतयैव दीर्घायुष्ट्वमवाप्यते।

१२, ७५–१०२ अग्निवेद्या भूमिं संस्कर्तुमध्वर्युस्तत्कर्षणसिञ्चनानन्तरं विभिन्नानां वृक्षाणामोषधीनां च बीजानि वपति, प्रस्तुतैर्मन्त्रैश्च तान् संबोधयति। ७५ पञ्चसप्ततितमादारभ्य ९६ षण्णवतितममन्त्रपर्यन्तं सर्वे ऋग्वेदतः (१०, ९७)[१] गृहीताः सन्ति। ९७ सप्तनवतितमान्मन्त्रादारभ्य १०२ द्व्युत्तरशततमं मन्त्रं यावत् सर्वेषु मन्त्रेषु, बलासस्यार्शसो विस्फोटस्य पाकारोर्यक्ष्मणां[२] शतस्य च नाशयित्रीरूपेणौषधिः संबोध्यते, अथ च शत्रून् पृतनायतश्च सोढुं तथा पाप्मानमपाकर्तुं[३] प्रार्थ्यते। रोगानपाकर्तुम् ऋद्धिं[४] दीर्घायुष्ट्वं चावाप्तुं शत्रून्[५] पराभवितुमिमे यातुमन्त्राः सन्ति।

(४) राजकर्मसंबद्धा मन्त्राः

१०, २–४ राजसूययागस्याभिषेकोत्सवं संपादयितुं विभिन्नेभ्यः स्रोतोभ्योऽध्वर्युरपः संगृह्णाति, ताश्चैकत्र संमिश्रयति। "वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा" इत्यादिना द्वितीयेन मन्त्रेण सह स तडागाद् जलं गृह्णाति। तदनन्तरं तृतीयेन मन्त्रेण कस्याश्चित् सरित आपो गृह्णाति। स ओजस्वतीरूपेणापः परिवाहिणीरूपेण च सरितं संबोधयति। एतादृग्जलेनाभिषिञ्चितो यजमानो वीर्येण धनेन च समन्वितो भवति। ततः स सूर्यदीप्त्या देदीप्यमानह्रदात्, स्रोतसः, कूपाद् इत्यादेरप आनयति, विभिन्नेभ्यो देशेभ्य आनीता आपो बहुविधान् गुणानधिकुर्वन्ति, यैश्च ताः (आपः) यजमानाय प्रतिपादयन्ति। प्रत्येकस्मिन् सूक्ते यजमानाय राज्यप्रदानार्थं प्रार्थनाः कृताः सन्ति। अत्र वयं सहानुभूतिकयातुं पश्यामः।

---

१. एतद्विषयप्रतिपादनार्थम् "ऋग्वेदे यातुसामाग्री" इति द्वितीयोऽध्यायो द्रष्टव्यः।

२. मं० ९७। ३. मं० ९९। ४. मं० १००। ५. मं० १०१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२०, १० सौत्रामणियागे "प्रतिक्षत्रं प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु। प्रत्यङ्गेषु प्रतितिष्ठामि" इत्यादिना मन्त्रेण सह यजमानः कृष्णमृगचर्मणि पादन्यासं करोति। विधिरयं प्रतीकात्मको यातवश्च वर्तते।

(२) शान्त्यभिचारसंबद्धा मन्त्राः

(क) मृत्योर्विद्युतश्च निरसनम्

२०, २ सौत्रामणियज्ञे—"निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः। मृत्योः पाहि विद्योत्पाहि" इति मन्त्रेण सह आसन्द्यां यस्यां कृष्णमृगचर्म प्रस्तृतं विद्यते यजमानः उपविशति, अथ च रजतफलकं वामपादस्य सुवर्णफलकञ्च दक्षिणपादस्याधस्तान्निक्षिपति। अत्र रजतफलकं सुवर्णफलकं च मृत्योर्विद्युतश्च संरक्षणाय कल्प्यते।

अविरोधभावार्थं द्रष्टव्यम्–७, २५।

(ख) वरुणपाशः

५. ३६ सोमयागप्रसङ्गेनाहवनीयाग्नौ हवेरुत्सर्गानन्तरमध्वर्युः शकटे कृष्णमृगचर्मास्तृणाति "एतत्त्वं देव सोम देवो देवाँ उपागाऽइदमहं मनुष्यान्त्सह रायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये" इति मन्त्रेण सह च तदुपरि वरुणं स्थापयति। प्रसङ्गवशाद्वेवास्याः क्रियाया विधानावसरे रायस्पोषप्राप्तिर्वरुणपाशविमुक्तिश्चावाप्येते।

अपि च द्रष्टव्यम्—८, २३।

१, ७ दर्शपूर्णमासयागे स्रुवस्य शूर्पस्य च प्रतपनं रक्षसामरातीनां च ज्वलनं प्रतिनिदधाति। सहानुभूतिकयातूनामीप्सितः परिणामोऽवाप्यते।

१, २५–२६ दर्शपूर्णमासयागे वेदिनिर्माणावसरेऽध्वर्युर्मध्ये दर्भदलं स्थापयन् स्फ्येन[१] भूमिमाहन्ति। तदनन्तरं स "बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्" इति मन्त्रेण सह स्फ्येनोत्खातां मृत्तिकामुत्करोपरि प्रक्षिपति। अथ स पुनर्द्वितीयवारं स्फ्यमाहन्ति। एवं च स प्रतीकरूपेण पृथिव्या अररुनामानं राक्षसं निःसारयति। विधिरयं साधर्म्यमूलकस्य यातोरुदाहरणं विद्यते। रक्षोभिः सह शत्रवोऽपि विध्वस्यन्ते।

---

१. भूमौ रेखालेखनार्थमन्ययज्ञियोद्देश्यार्थं वा खड्गाकृत्या निर्मितं काष्ठमयं साधनम् 'स्फ्य' इति कथ्यते। इदमिन्द्रस्य वज्रमेवेति प्रतिपाद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अपि च द्रष्टव्यम्—१, ८, १, २६।

२, २५ दर्शपूर्णमासयागे यजमानो विभिन्नैश्छन्दोभिस्त्रीन् विष्णुपादन्यासान् सम्पादयति। एवं च स प्रतीकरूपेणाकाशात्, वायोः, पृथिव्याश्चेति[1] त्रिभिः प्रदेशैः शत्रुमुत्सादयति। अथ च तस्य शत्रुरन्नेन विश्रामस्थानेन च विरहितो भवति।

५, २२-२३ सोमपेषणध्वनिं वर्धयितुं भूमौ क्रियमाणैरुपरवैः सह संबद्धा इमे प्रस्तुता मन्त्राः सन्ति। खनित्रं गृह्णन्नध्वर्युरुपरवाणां बाह्यरेखामालिखति। यतो हि राक्षसानां ग्रीवाच्छेदनस्य प्रतीकरूपेणेयं क्रिया प्रतिपाद्यते। तस्या यातवं रूपमिदं मन्यते। "अहꣳ रक्षसां ग्रीवा अपि कृन्तामि"। पुनस्तस्योपरवाणां खननं निखातस्य वलगस्य खननं प्रतिनिदधाति। "रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि। यं मे निष्ट्यो यममात्यो निंचखानेदमहं तं वलगमुत्किरामि" इत्यादि मन्त्रं स कथयति। साधर्म्ययातोरियं स्थितिरिति सुस्पष्टम्।

५, २६ सोमयागे सदसः=यत्र पुरोधस उपविशन्ति=मध्ये औदुम्बरयूपस्थापनावसरेऽध्वर्युर्यूपस्योपरवस्य चाभिषेकजले यवान् विकिरति। अथ चौपरवे कुशानां फलकमास्तृणाति। "यवोऽसि यवयास्मद्द्वेषो यवयारातिर्दिवे" इत्यादिना मन्त्रेणायं विधिः संबद्धो विद्यते। अमिश्रणार्थकाद् 'यु' धातोर्निष्पन्नस्य 'यव' शब्दस्य व्युत्पत्तिर्यातवमुद्देश्यमिदं साध्नोति।

७, ३ यदि यजमानः स्वकीयं शत्रुमभिशप्तुमिच्छति तदोपांशुग्रहलेखनावसरे—"देवेभ्यस्त्वा मरीचिपेभ्यो देवाꣳशो यस्मै त्वेळ तत्सत्यमुपरिप्लुता भङ्गेन हतोऽसौ फट् प्राणाय त्वा व्यानाय त्वा" इति मन्त्रं पठति। स शत्रोर्नामोपाहरति।

६, ३८ अपामार्गबीजानां भूतापसारकोऽयं बलिर्विद्यते। उत्सर्गसम्पादनावसरेऽध्वर्युणा यत्र बलिरुत्सृज्यते तत्स्थानाभिमुखम्—"उपाꣳशोर्वीर्येण जुहोमि हतꣳरक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः" इति मन्त्रेण सहावगाहिकां दर्विं प्रक्षिपति। तत्र खल्वपामार्गशब्दस्यैव व्युत्पत्तिजन्यं किञ्चिद् वैशिष्ट्यं वर्तते। एतस्य मूलं हि 'अप' पूर्वको 'मृज्' धातुर्यस्यापसरणमर्थः। रक्षोभिः सह मनुष्यारातयोऽपि वधार्थमन्विष्यन्ते।

१०, १४ राज्याधिरोहणात्मके राजसूययागे सार्वलौकिकं स्वाराज्यमधिगन्तुमूर्ध्वस्याकाशस्य च चत्वारः प्रदेशा विधीयन्ते। ऊर्ध्वारोहणावसरे "प्रत्यस्तं नमुचेः शिरः" इति मन्त्रोचारण-

---

(१) दिवि विष्णुर्व्यक्रꣳस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

पूर्वकं व्याघ्रचर्मणः पश्चाद्भागे स्थापितं सीसखण्डं राजा पादेन प्रहरति। यागविशेषोऽयं यातवः प्रतीकात्मकश्च वर्तते। सीसखण्डः खलु नमुचेः शिरः प्रतिनिदधाति।

अपि च द्रष्टव्यम्—११, ७७-८० ७, १३, १७ तथा १८।

२ शतपथब्राह्मणम्

(१) पुष्टिसंबद्धा विषयः

(क) पुष्टिः प्रचुरता

१, १, २, ६ दर्शपूर्णमासयागे स्रुवस्य शूर्पस्य च गार्हपत्याग्नावधिश्रयणानन्तरं यज्ञियोद्देश्यतापूर्त्यर्थं यजमानः शकटाद् व्रीहिं गृह्णाति। तेन यजमानः परिपूर्णतामुपगच्छति, यतो धान्यपरिपूर्णो हि शकटः परिपूर्णतां प्रतिनिदधाति। अयं सहानुभूतिकयातुर्वर्तते।

१, २, २, ८ दर्शपूर्णमासयज्ञे पात्रकदम्बे यथाक्रममपूपपरिवेषणावसरे "विश्वायुरुरु-प्रथाऽऽउरु प्रथस्वोरु ते यज्ञपतिः प्रथतामग्निष्टे त्वचं मा हिꣳसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधिनाके" इति मन्त्रमुच्चारयति। यजमानस्य पुष्ट्यर्थमेव स इममाशीर्वादं सम्बोधयति। अपूपपरिवेषणं हि यातवेन रूपेण यजमानं प्रभावयति, स च यजमान आत्मानं विस्तारयिष्यति पुष्टिं चाधिगमिष्यति।

२, १, २, २ अग्न्याधानप्रसङ्गेनेदमुक्तं यद् गार्हपत्याहवनीयौ प्रधानावग्नी कृत्तिकास्वादधीत। कृत्तिकानां संख्या नक्षत्रेषु सर्वेष्वधिकतमा[1] वर्तते। अत एव यजमानस्तथाविधेन कर्मणा परिपूर्णतामवाप्नोति।

२, १, २, १२ मह्यमन्यैः प्रदीयेतेति यः कश्चनापि वाञ्छति स हस्तर्क्षेऽग्नीनादधीत। एवं यत्किञ्चिदपि हस्तेनोत्सृज्यते, तत्सर्वं तस्मा एव प्रदीयते[2]। हस्तर्क्षं हि संवेदनात्मकयातुद्वारा हस्ते (करे) सर्वान् गुणानावहति।

३, ३, ३, ८ अग्निष्टोमे "तपसस्तनूरसीति तपसो ह वाऽएषा प्रजापतेः सम्भूता यदजा·········सहस्रं भूमानं गच्छानीत्येवैतदाह" इति। यजमानेन प्रतीचीमुखीमजां प्रति पठ्यमानेनानेन मन्त्रेण सोमविक्रेत्रे सोमायाजा प्रतिदीयते। अजा हि परिपूर्णतां प्रतिनिदधाति, यतः सा वर्षे त्रिः प्रजायते। आशीर्वचनमिदं संवेदनात्मकस्य यातोर्नियममावृणोति।

---

(१) एता एव भूयिष्ठा यत्कृत्तिकास्तद्भूमानमेवैतदुपैति।

(२) हस्तेऽग्नीन् आदधीत। य इच्छेत्प्र मे दीयेतेति तद्वा अनुष्ठ्या यद्धस्तेन प्रदीयते प्र हैवास्मै दीयते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

११, ४, ३, १८ प्रजापतेरुत्पन्ना श्रीः "मित्रविन्देष्टि" विधानेनाग्निसोमेत्यादिदेवेभ्यः स्वसुन्दरशरीरान्नराज्यशक्तिस्वाराज्यपुष्टीत्यादीनि कथं पुनः प्रावत्? इत्याख्यानस्य पूर्वस्मिन् खण्डे सविस्तरं वर्णनानन्तरमिदमुक्तं यदस्य विधानेन यजमानो विराजमधिगच्छति। यागः खल्वयं दशभ्यो देवेभ्यः दशभिर्हविर्भिः विधीयते। तत्र च दशाहुतयो दशदक्षिणाश्च प्रोक्ताः। एवं ह्ययं दशदशाक्षरमयेन विराजा सह संवदति। विराट् श्रीरस्ति। अतो यजमानो विराजि पुष्टावन्ने चाधिष्ठितो भवति।

अपि च द्रष्टव्यम्—१, ६, २, ३३; ३, ६, १, १७; ३. ७, १. २१; ३. ६. १. १७; ११, ४, २. ८; १२. ७. ३. १३; १२, ८ १. २१; १३. २, ६, ७; १४, १. ३, २२।

(ख) सन्ततिरुत्पादकमिथुनञ्च

१, २. २, ३ दर्शपूर्णमासे पात्र्याम् पिष्टतण्डुलपातनानन्तरमध्वर्युराग्नीध्रेणानीताभिरद्भिः सह पिष्टतण्डुलं संमिश्रयति। संमिश्रणावसरे स "यथा श्रियेऽन्नाद्यायेमाः प्रजा यजमानाय यच्छेदेवं वै तत्संयौति" मन्त्रमिमं पठति। इदं कर्म यातवं प्रतिनिध्यात्मकं च महत्त्वमादधाति। इदं हि यजमानस्य कृते सन्ततिं श्रियमन्नं च साध्नोति।

१. ३, १. १८ दर्शपूर्णमासयागे यजमानपत्न्या योक्त्रबन्धनानन्तरमध्वर्युस्तस्याः समक्षम् अध्वर्युः घृतपूर्णं पात्रं स्थापयति। यदा सा तदवेक्षते, तदा तस्या अवेक्षणं किञ्चिद् यातवमुद्देश्यं साध्नोति। घृतं बीजमस्ति पत्नी च स्त्री। एवं ह्युत्पादकमिथुनमुत्पद्यते।

१, ८ १, ११ पुरा सन्ततकामो मनुः पाकयज्ञं विदधौ। सोऽप्सु घृतं तक्रं दधिमण्डं दधि चास्राक्षीत्, तेनैका स्त्री उत्पन्ना। तद्द्वारैव मनुरिमां मनुष्यजातिमुत्पादयामास। मनोः पुत्रीयम् 'इळा' इति नाम्ना प्रसिद्धा। यः कोऽप्येवं करोति, स स्ववंशं विस्तारयति। तत्प्रतिपादको मन्त्रो यथा—"स यो हैवं विद्वानिळया चरत्येताꣳ हैव प्रजातिं प्रजायते यां मनुः प्राजायत यां वेनया कां चाशिषमाशास्ते साऽस्मै सर्वा समृध्यते" इति।

२. २, ४, ७ यः कश्चनाग्निहोत्रमादधाति, स स्वसन्ततिद्वाराऽऽत्मानं विस्तारयति, यथैकदा मनुरात्मानमुत्पादयामास। किञ्च, सोऽग्निजान् मृत्योरपि स्वमभिरक्षति।

३, ३, १, ११-१२ अग्निष्टोमे सोमक्रयणीगोपदव्यामुत्सर्गानन्तरं यजमानस्य पत्न्यै पदविधूलिप्रदानानन्तरञ्च "वृषा वै सोमो योषा पत्न्येव वाऽअत्र सोमो भवति यत्सोमक्रयणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

मिथुनमेवैतत्प्रजननं क्रियते। तस्मादेनां क्रयणी मिथुनमेवैतत्प्रजननं क्रियते तस्मादेनां सोमक्रयण्या संख्यापयति" इति यजमानपत्न्या पठ्यमानेन मन्त्रेण सा (यजमानपत्नी) सोमक्रयण्या गवा प्रदर्श्यते। सोमः पुमान् पत्नी च स्त्री वर्तते। एवं ह्यनयोर्मिथुनं प्रवर्तते। अत्र केवलं तया सोमक्रयण्या सह सम्बन्धेनैव पत्नी आत्मनि प्रजननशक्तिं धरति।

५, २, १, २४ वाजपेये यूपाद् यजमानस्य तत्पत्न्याश्चावतरणानन्तरं द्वावप्यौदुम्बरासन आस्तीर्णेऽजाचर्मण्युपविशतः। यतोऽजा प्रतिवर्षं त्रिः प्रजायते, तत्रापि चैकस्मिन् काले द्वित्रान्, अतोऽजः प्रजापतिरेव। एवं हि प्रजानामजः स्वामी विद्यते। अजाचर्मसम्पर्केण यजमानोऽपि प्रजापतिर्भवति, सन्तानानि चोत्पादयति। अयं हि संस्पर्शजो यातुर्वर्तते।

८, ४, ३, २० चतुर्थास्तरणाय सप्तदशानां सृष्टिकेष्टकानामुपधानद्वारा यजमानः प्रजापतिना प्राणिनो जनयति। इष्टकानां यातवे प्रयोगे खलु 'सृष्टिका' इत्यस्य मूलभूतः 'सृज्' इति धातुरेव कारणम्।

१३, १, १, ४ अश्वमेधयागे ब्रह्मौदनेन सहर्त्विग्भ्यः सुवर्णमपि दीयते। यतो हि ब्रह्मौदनं सुवर्णमित्येतदुभयमपि बीजमस्ति, अतोऽध्वर्युर्बीजद्वाराऽश्वे यजमाने च बीजं स्थापयति।

सन्ततयेऽपि च द्रष्टव्यम्—

२, २, ४, १०; २, ४, १, ४; ३, ८, ४, १३; ३, ८, ५, ६; ८, २, २, ७; ८, ७, १, १६; ८, ७, ४, १६; ६, २. ३, ५०।

उत्पादयितृमिथुनाय च द्रष्टव्यम्—

२, ४, ४, ७; ८. ६, १०; १४, १, ४, १६।

(ग) पशवः

१, ४, १, ६ दर्शपूर्णमासयागे प्रथमः सामिधेनीमन्त्रः 'हविष्मन्तः' इति पदं धरति। हविषि (दुग्धनवनीतघृतादिषु) पशवो धनानि च सन्ति। अत एव मन्त्रस्यास्य पाठो यातवेन रूपेण पशुप्राप्तिं साध्नोति।

१, ७, १, ७ दर्शपूर्णमासयागप्रसङ्गेन मातृष्वेकस्या वत्सात् पृथक्करणानन्तरमध्वर्युः "ध्रुवा अस्मिन् गोपतौ स्यात बह्वीरित्यनपक्रमिण्योऽस्मिन् यजमाने बह्वयः स्यातेत्येवैतदाह" इति मन्त्रेण सह तां स्पृशति। तत एव "अस्मिन् यजमाने बह्वयो भवत" इति स (अध्वर्युः) विवक्षति।

३, ३, १, १ हिरण्यावतीहवनानन्तरं सोमक्रयणी गौरुत्तरावर्तेन तत्स्थानं नीयते, यत्र सोमो विक्रीयते। तस्याः सप्तपदानि यजमानोऽनुविक्रामति। तस्येमानि पदानि तां गामधिकार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यन्ति । विधिरयं प्रतीकात्मको यातवश्च वर्तते । सोमक्रयण्या गोः पदमिदं न केवलं पदमेव, अपि तु साक्षाद् गौरेव । तस्याः पदवीं पादाभ्यां पीडयन् यजमानः स्वभावादेव तां स्वशक्त्यधीनां करोति ।

३, ३, १, ६-६ अग्निष्टोमे सोमक्रयण्या गोः सप्तम्यां पदव्यां हवनानन्तरमध्वर्युः पदवीं सर्वतः परिच्छेत्तुं येन केनापि तां नोल्लङ्घयेत्, तां परितः स्फ्येन रेखाः करोति । तदनन्तरं स सम्पूर्णायां पदव्यां विलिखति, तथा "अस्मासु तव ज्ञातिरस्ति" इत्यर्थकैः शब्दैः शिथिलां धूलिं भाजने क्षिपति । एवं करणेन यजमानस्तस्या ज्ञातिं प्राप्नोति । अथाध्वर्युः—"त्वे राय इति पशवो वै रायस्त्वयि पशवः" इति मन्त्रेण सह यजमानाय पदव्या धूलिं ददाति । अत्र 'रायः' इत्यस्य पशुरर्थः । यजमानः खलु "मे राय इति पशवो वै रायो मयि पशवः" इत्यनेन मन्त्रेण सह प्रतिगृह्णाति । तदनन्तरमध्वर्युरात्मानं पशुस्वामित्वादव्यावर्तयन् स्वयम् "मा वय ᳫं रायस्पोषेण वियौष्मेति" इति मन्त्रेणोपहृदयमुपस्पृशति । अत्र संस्पर्शजो यातुर्विद्यते ।

गोः पदव्या धूलिर्गोगुणस्य तत्त्वमधिकरोति । सा गौर्येन गृह्यते, तं पुरुषं पशून-धिकारयति । अभीप्सितः परिणामो हि प्रतीकत्वेनानुकरणात्मके रूपे उपस्थापितः ।

३,८४,१६ पशुयागे हि पुनर्हवनविधानावसरे "छन्दा ᳫंसि गच्छ स्वाहेति" इत्यादिर्मन्त्रः सप्तानां ग्राम्याणां सप्तानामारण्यानामुभयविधानां च पशूनामुत्पादनं साध्नोति । तत्र च्छन्दांसि सप्त सन्ति । एवं सप्तसंख्या हि सप्त ग्राम्यान् सप्तारण्यांश्च प्रतिदधाति । अनेन प्रकारेणाध्वर्युरेत-न्मन्त्रपाठेनोभयविधान् पशूनुत्पादयति ।

४, १, १, १६ प्रातरभिषवस्योपांशुग्रहप्रसङ्ग इदमुच्यते यदध्वर्युः पञ्चकृत्वः पशुकामस्या-भिषुणुयात् । पशुर्हि पञ्चभागमयो भवति, अतोऽभिषवविशेषोऽयं यजमानस्य कृते पशून् साधयेत् ।

४, १, ४, ८ मैत्रावरुणग्रहकर्षणानन्तरमध्वर्युर्यजमानं पशुभिः संयोजनार्थं पयसा सह सोमं यौति । सोमसंपीडनेन यजमानः पशुविरहितो भवति । अतः सोमेन सह पयोमिश्रणेनैव स पुनर्यातवेन प्रभावेण तं पशुभिः संयोजयति । पयश्च पशून् प्रतिनिदधाति ।

५. २. ५. ५-६ राजसूयप्रसङ्गेन त्रिषंयुक्तः पुरोडाशो[१] दीयते, येन पशोर्धारणं साध्यते । युक्तिरत्र दीयते यदग्निः खलु पशूनां दाता, पूषा च स्वामी वर्तते । एतेषां देवानां प्रसादनं हि यजमानाय पशून् सम्पादयति ।

---

१. अयं हि पूष्णे चरुम्, इन्द्रावरुणाभ्यां चरुम्, अग्नापूषभ्यां चैकादशकपालेऽपूपनिर्माणमुत्सर्गं चावधारयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

५, ४, ३, १९ राजसूये पशूनां सम्पादनार्थं राजा वराहचर्मनिर्मिते उपानहौ दधाति। अत्र युक्तिः प्रदत्ता विद्यते यद्वराहः खलु देवैरग्नौ स्थापितात् घृतपात्रादुत्पद्यते। घृतपात्रोत्पन्नत्वादेव स स्थूलो भवति, यतो हि घृतं गवां सत्त्वमनुमन्यते। यतो गौर्वराहे स्वकीयतत्त्वम् 'वसां' पश्यति, अत एव च तं परिचिनोति। अत्र सहानुभूतिको यातुर्वर्तते, परन्तु सर्वथा विलक्षणया युक्त्या।

७, १, १, ६ गार्हपत्याग्निस्थाननिर्माणार्थं पलाशशाखया भूमिः परिमार्ज्यते, ततश्चाग्निकुण्डोपरि क्षारमृत्तिका परिक्षिप्यते। गार्हपत्यः संसारोऽयं विद्यते लवणश्च पशुः। एवं करणेन स संसाराय पशून् वितरति।

८, २, ३, ८ अग्निवेद्या द्वितीयास्तरणे छन्दस्येष्टकानां प्रत्येकं पार्श्वे निक्षेपः, यतश्छन्दांसि पशवः सन्ति, सर्वत्र पशूनां व्यापकत्वं साध्नोति। यस्येष्टकानां पार्श्वे एव स इमा इष्टकाः स्थापयति। एवंकरणेन च स पशूनामभिवृद्ध्यर्थं तानापो निकषा स्थापयति। यदा देवो वर्षति, तदैव पशवोऽभिवर्धन्ते। इष्टकायाः 'अपस्' इति प्रातिपदिकात् साधितम् 'अपस्या' इति नाम किञ्चिद् यातवमुद्देश्यं साध्नोति।

११, २, ३, ४ दर्शपूर्णमासयागे प्रधानाहुत्याः पूर्वं गायत्रीच्छन्दसि अनुवाक्या पठ्यते, तदनन्तरं याज्या, तदनन्तरमन्ते च वषडिति। वर्तमाने खण्डे इमानि त्रीण्यपि यातवमुद्देश्यं साधितुं वर्तन्ते, यथा—पशूनां प्राप्तिरिति। गायत्र्यनुवाक्यापाठेन यजमानो लोकान् स्थापयति। तदा त्रिष्टुब्याज्यया अग्नौ बलेरुत्सर्गेण चैतेषु लोकेषु पशून् सम्पादयति। यतो हि चतुष्पादमय्यनुष्टुब्चतुष्पादमयान् पशून् प्रतिनिदधाति। तदनन्तरमक्षरद्वयमयो हि वषट् त्रिष्टुम्मन्त्रान्ते पठ्यमानो द्विपादं मनुष्यं प्रतिनिदधाति। एवं हि स आत्मानं लोकेषु पूर्वत एव दृढेषु पशुषु द्रढयति।

१३, १, ६, ३ अश्वमेधे "आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम्" (वाज० सं० २२, २२) इत्याशीर्वादमयस्य मन्त्रस्य पाठेनाध्वर्युर्गवे पयः प्रतिपादयति। इयं हि सहानुभूतिकस्य यातोरवस्थितिर्वर्तते।

अपि च द्रष्टव्यम्—१, ७, १, ८; १, ६, ३, १६; २, ३, ४, ३; २, ३, ४, २७; २, ४, १, ५; ३, ८, ४, ८,; ३, ६, १, १०; ४, ६, ६, ८, ६; ५, ३, ७; ५, ४, ३, २७; ७, ४, २, १६; ८, ७, ४, १२; ११, ७, १, १,; ११, ८, ३, ४; १२, ७, २, १५; १३, ३, ६, ४; १४, ३, २, २५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(घ) सन्ततिः पशवश्च

२, १, २, ६ यः कोऽपि रोहिणीमेऽग्नीन् आदधाति, स पशुभिः सन्ततिभिश्च वसीयान् भवति। पुराऽस्मिन्नेव नक्षत्रे प्रजाकामः प्रजापतिरग्नीनादधौ। प्रजापतिना सृष्टाः प्रजा एकरूपा उपस्तब्धास्तस्थुर्वेत्रलतावत्। गौ रोहिण्यस्ति, अत एव गोः रोहिण्याश्च स्वभावः समान एव।

२, १, ३, ८ अथ यः कामयेत प्रजया पशुभिश्च बहुः स्यामिति स वर्षासु आदधीत। प्रदत्ता युक्तिरियमस्ति यद् वर्षर्तुर्वैश्योऽ (विश्) स्ति, वैश्यश्चान्नं प्रयोजयति। एवं हि यो वर्षासु आधत्ते स प्रजया पशुभिश्च बहुर्भवति।

३, ६, १, ५ यः कोऽप्येकादशिन्या यजेत, स वै प्रजया पशुभिश्चाप्याययत। तेन सह प्रजास्तस्य श्रियेऽन्नाद्याय च सन्तिष्ठन्ते[1]। एवमेकादशिनी खलु कमपि यातवं प्रभावमधिकरोति।

अपि च द्रष्टव्यम्—१, ६, ४, ६; १, ७, ३, १८; १, ८, १, १४; २, १, २, ७; २, ३, ४; ३२–३३; ३, ६, १, २०; ११, ८, १, ३; १२, ३, १, १६; १२, ३, ३, ४; १४, १, ३, २०।

(ङ) अन्नम्

१, ४, १, ६ दर्शपूर्णमासेष्टयामग्निप्रज्वालनसमये सामिधेनीमन्त्राः पठयन्ते। प्रथमेऽग्निप्रज्वालनमन्त्रे 'वाज' इति शब्दो दृश्यते, यस्यार्थोऽन्नमिति। अतः केवलमस्य पाठेन यजमानोऽन्नं प्राप्नोति। इयं सहानुभूतिकस्य यातोरवस्थितिः।

३, ७, १, १६ पशुयागे यजमानस्य नाभिपर्यन्तं नग्नतामाच्छादयितुं यज्ञियराशिः कुशरज्ज्वाऽऽबध्यते। स्थानविशेषपर्यन्तमाबन्धनमिदं यजमानशरीरमध्ये यातवेन रूपेणान्नं स्थापयति, यतो हि यत्रान्नं तिष्ठति तदिदमेव स्थानं विद्यते।

३, ६, १, ८ एकादशिन्याः प्रसङ्गेनेदमुच्यते यत् सोमाय यज्ञपशोरुत्सर्ग आत्मनेऽन्नप्रजासाधनं विदधाति। सोमोऽन्नमस्ति; सोमायोत्सर्गेण यजमानोऽन्नेन परिपुष्टो भवति। अथ च तदेवान्नं परिवर्तयत्, तस्य प्रजा भवति।

---

१. एकादशिन्येष्ट्वा प्रजापतिः पुनरात्मानमाप्याययतोपैनं प्रजाः समावर्तन्तातिष्ठन्तास्य प्रजाः श्रियेऽन्नाद्याय स वसीयानेवेष्ट्वाभवत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

५, १, ५, २५ वाजपेययागे रथधावने विजयप्राप्त्यनन्तरं रथादवतीर्य यजमानः "आ मा वाजस्य प्रसवो जगम्याद्येमे द्यावापृथिवी विश्वरूपे। आ मा गन्ता पितरा मातरा चा मा सोमोऽअमृतत्वेन गम्यात्०" (वाज० सं० ६, १६) इति मन्त्रेणारण्यधान्यचरुं स्पृशति। अनेन प्रकारेण चरुस्पर्शद्वारा स आत्मन्यन्नमादधाति।

५, २, १, २३ वाजपेये यजमानतत्पत्नीद्वारा यज्ञियभूम्यारोहणोत्सवानन्तरं यजमान उदुम्बरकाष्ठमये सिंहासने समुपवेश्यते। उदुम्बरोऽन्नमस्ति, अतोऽस्मिन् तस्योपवेशनमन्नप्राप्तिं साध्नोति; उदुम्बरस्यान्नगुणो यजमाने प्रविशति, येन सोऽन्नमधिकरोति।

५, २, २, १२ अध्वर्युर्वाजप्रसवीयस्यावशिष्टान्नेन यजमानमभिषिञ्चति, एवं च स यजमानायान्नं प्रतिपादयति। सहानुभूतिको यातुः।

६, १, २, ५ शतरुद्रीयबलेरुत्सर्गानन्तरमग्निचयनप्रसङ्गे कलशाद्भिरग्निवेदीमभिषिञ्चति। तदभिषिञ्चनं हि स स्वदक्षिणकुक्षिस्थापितेन प्रस्तरेण प्रारभते। तदा स "अश्मन्नूर्जं पर्वते शिश्रियाणाम्०" (वाज० सं० १७ १) इति मन्त्रेण प्रस्तरे कलशं स्थापयति। तदनन्तरं च स "तां नऽइषमूर्जं धत्त" इति मन्त्रेण कलशं धरते, येनात्मन्यन्नमादधाति। स एतत्त्रिः प्रतिपादयति। अत्र कलशे स्थापिता आपः सत्त्वं प्रतिनिदधाति। एवं हि स आत्मन्यन्नमादधाति। अत्र स्पष्टार्थप्रतिपादनाय मन्त्रस्य प्रारम्भिको भाग उद्ध्रियते—"अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्यऽओषधीभ्यो वनस्पतिभ्योऽअधि सम्भृतं पयः। तां नऽइषमूर्जं धत्त मरुतः सꣳरराणाऽअश्मँस्ते क्षुन्मयि" इत्यादि।

१२, ७, ३, १६ सौत्रामणौ यातवमुद्देश्यमुररीकृत्य पयोग्रहाः सुराग्रहाश्च गृह्यन्ते। पयोग्रहा ग्राम्याः पशवः, सुराग्रहाश्चारण्याः। उभयविधाभ्यां चषकाभ्यां यजमान उभयविधान् पशूनवाप्नोति। पुनः स पयश्चषकान् ग्राम्यान्नारण्यान्नाद्याभ्यां संयौति। ग्राम्याः पशवः खलूभयविधं ग्राम्यान्नमारण्यान्नञ्च सम्पादयन्ति। अतोऽत्र प्रतीकात्मकस्य कार्यस्य तादात्म्यात्मकानामथवा प्रतिनिध्यात्मकानां वस्तूनां च साहाय्येन यातवान्युद्देश्यानि प्राप्यन्ते।

अपि च द्रष्टव्यम् १, ६, ३, ३७; २, ३, २, ६; १०, १२, १५; ३, ६, १, ६; ४, ६, ४, ३; ५, २, १, १६; ५, २, २, २; ३, ४, २; ३, ५, ४; ३, ५ १२; ७, ५, १, १२; ८, ७, ४, ४–५; ६, ३, ३, १७; ११, ४, २, ११; १२, ८, ३, १७; १३, २, ६, ८; ८, ७, ७; १४, ३, १, २४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(च) वर्षा

१, ७, १, २ दर्शपूर्णमासेष्ट्याम् "इषे त्वोर्ज्जे त्वेति" इति मन्त्रेण सहाध्वर्युरमायां गोर्वत्सानपाकर्तुं पर्णशाखां छिनत्ति। तदनन्तरं सः "ऊर्ज्जे त्वेति" इति मन्त्रेण सह शाखायाः प्रशाखा अपनयति, तां चर्व्वीं करोति। अत्र स वृष्ट्यै "इषे त्वोर्ज्जे त्वेति, तथा वृष्टेर्जायमानायोग्र-रसायेषेत्वोर्ज्जे त्वेति" पठति। एवं गोर्वत्सानपाकर्तुमेव केवलमध्वर्युणा शाखा न च्छिद्यते, अपि तु वर्षां तज्जायमानमन्नसत्त्वं चापि प्राप्तुम्।

८, २, ३, ५ द्वितीयास्तरणार्थमपस्येष्टकानां सर्वेषु पार्श्वेषु निक्षेपः खलु सर्वासु दिक्षु वृष्टिं साध्नोति। अत्रापशब्दान्निष्पन्नेऽपस्याशब्दे एव किञ्चिद् वैशिष्ट्यं वर्तते।

८, ३, २, ५ अग्निवेद्यास्तृतीयास्तरणे द्वे ऋतव्येष्टके—नभनाम्नी नभस्यानाम्नी चावकौषधीनामुपर्याधीयेते; अथ चावकौषधिभिरेवाच्छाद्येते। इमा ओषध्य अपः प्रतिनिदधति। एवं स तद्दतौ जलं प्रतिपादयति, यतः पूर्णरूपेण देवो वर्षति। अतः समुचितस्य प्रतीकात्मकस्य विधेर्विधानेनार्त्विकवर्षां नियन्त्रयति।

अपि च द्रष्टव्यम्—१, २, २, ५; ८, ३, २, ६; १३, १, ६, १०; १३, २, ६, १४; १४, ३, २, २२।

(छ) सर्वाभिलाषाणां निष्पत्तिः

१, ३, ५, १० अग्न्याधानसमये इष्टिं सम्पादयितुं सप्तदश सामिधेनीमन्त्राः पठ्येरन्। एकस्मिन् वर्षे द्वादशमासाः पञ्च ऋतवश्च भवन्ति। इदं हि सप्तदशगुणां प्रजापतिं प्रतिपादयति। यतः प्रजापतिः सर्वो वर्तते, तस्य प्रत्येकमभिलाषः परिपूर्णो भवति। इष्टिः खलु निम्नस्वरेण सम्पाद्येत "अथ यच्चतुर्ध्रुवायां गृह्णाति। सर्वस्मै तद्यज्ञाय गृह्णाति, तत्तदनादिश्याज्यस्यैव रूपेण गृह्णाति। कस्मा उद्यादिशेद्यतः सर्वाभ्य एव देवताभ्योऽवद्यति, तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति" इति। सहानुभूतिको यातुर्विद्यते।

४, २, ४, २१ ध्रुवग्रह आकर्षणानन्तरं यातवोद्देश्यार्थं संरक्ष्यते। ग्रहोऽयं गायत्रीच्छन्दसो वत्सोऽस्ति। गायत्रीच्छन्दश्च यज्ञेन सह तादात्म्यं बिभर्ति। द्वादशभिः शास्त्रैर्द्वादशभिः स्तोत्रैश्च सह यागोऽयं चतुर्विंशतिमात्रामयेन गायत्रीच्छन्दसा साम्यं भजते। अतो ग्रहोऽयं दोहनार्थमेव संरक्ष्यते। त इमं संरक्षन्ति, येन गायत्री यजमानस्य कामान् प्रपूरयेत्।

६, २, ३, ३८ वेद्यामग्न्याधानान्तरं शमीवैकङ्कतोदुम्बराणां खण्डानि तत्र स्थाप्यन्ते। "ता सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम्। यामस्य कण्वोऽदुहत्प्रपीनाँ सहस्र-धारां पयसा महीं गाम्।" (वाज० सं० १७, ७४) इति मन्त्रेण प्रथमं शमीकाष्ठं निक्षिप्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

९, ३, २, ६ अग्निवेद्यां पूर्णतां प्राप्तायां वैश्वानरमरुतापूपानामुत्सर्गानन्तरं वसोर्धाराख्य उत्सवो राजरूपस्याग्नेः संस्काररूपो विधीयते। पुरा देवा वसोर्धारयाऽनयाऽग्निमभिषिच्य तमभीष्टान् याचयामासुः, अग्निश्चोत्सर्गेण सन्तुष्टोऽभिषक्तश्च भूत्वा तेषामभीष्टान् साधयामास। एवमेव तथाकरणेन यजमानोऽपि स्वकीयान् सर्वानभीष्टानग्नेः प्रतिपादयति। अत्र स्वाभीष्टसाधने देवस्तुतिरपि साहाय्यं करोति।

११, १, ६, २० दर्शपूर्णमासोत्सर्गप्रशंसायां प्रतिपादितं यद्यः कश्चनोद्देश्यविशेषार्थमिमान् बलीन् विदधाति तस्य तदुद्देश्यं परिपूर्णं भवति। अयं यागो हि कामपराख्यो यागः कथ्यते।

१३, ३, ७, ३ अश्वमेधप्रशंसायामिदमुच्यते यदयं यागो हि व्यष्ट्याख्यो वर्तते, येन सर्वाणि वस्तूनि प्राप्यन्ते।

अपि च द्रष्टव्यम्—१, ३, २, १५; २, ४, ४, १८; ४, २, ४, २२; ४, ६, ६, १७; ५, १, ५, २८; ६, ४, २, ९; ६, ४, ४, १; ६, ५, २, ७; १०, २, ४, २; १२, ८, २, ३१, ३६; १३, १, ५, ६; १३, ४, १, १, ५, १२; १३, ६, १, ३; १३, ६, २, १०।

गुणविशेषस्य शक्तिविशेषस्य वाऽवाप्तिः

(१) ब्रह्मवर्चस्तेजो यशः श्रीश्च

२, १, २, ८ यो मृगशिरस्यग्निमादधाति, स श्रियमवाप्नोति। मृगशीर्षं हि प्रजापतेः शिरो वर्तते, शिरश्च श्रियं प्रयोजयति। एवं च स श्रियमधिगच्छति।

२, १, ३, ६; कश्चनापि ब्रह्मवर्चस्कामो वसन्तर्तावग्निमादधीत। वसन्तो ब्रह्मास्ति, अतः सोऽ (यजमानः)वश्यमेव ब्रह्मवर्चसा पुरस्कृतो भवति।

२, ३, २, १३ यदि कश्चन प्रदीप्तेष्वङ्गारेष्वग्निहोत्रबलिमुत्सृजति, तदा स ब्रह्मवर्चसमधिकरोति। यतो हि स एवाग्निर्ब्रह्मवर्चसं प्रतिनिदधाति। यथा नाम तथा फलम्।

५, ३, ५, ३ अभिषेकोत्सवेऽभिषेकजलनिर्माणानन्तरम् "सोमस्य त्विषिरसि[1] तवेव मे त्विषि भूयात्" (वाज० सं० १०, ५) इति मन्त्रेणाध्वर्युर्मैत्रावरुणस्थाग्निकुण्डसमक्षं शार्दूलचर्मोपस्तृणाति। एवङ्करणेन स शार्दूलत्विषमेव यजमान आदधाति।

६, ३, ४, १४ वसोर्धारोत्सवानन्तरं वाजप्रसवीया बलय उत्सृज्यन्ते, येन पुनरप्येकदाऽग्निरभिषिच्यते। तदनन्तरमवशिष्टेभ्यो यज्ञियपदार्थेभ्यो यजमानोऽभिषिच्यते। एतत्प्रसङ्गेन

---

१. "यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत्, तेन सोमस्य त्विषि" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

इदमुच्यते यद् ब्रह्मवर्चस्कामो हि कृष्णमृगचर्मण्यभिषिच्येत। अयं चर्मविशेषो हि ब्रह्मवर्चसः प्रतीकरूपो वर्तते, अत एतन्निकटसम्पर्कं आगमनेन यजमाने चर्मणो गुणा आधीयन्ते। गुणाश्चेमे ब्रह्मवर्चांसि सन्ति। संस्पर्शजो यातुरयम्।

५, २, ५, ६ राजसूये त्रिषंयुक्तबलिरुत्सृज्यते। यजमानं यशः प्रापयति। विधानस्य वर्णनं यथा—"अथापरेण त्रिषंयुक्तेन यजते। सोऽग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपत्यैन्द्रा-सौम्यं चरुꣳसौम्यं चरुं तेन त्रिषंयुक्तेन यजते। वर्च एव तद्देवा उपायंस्तथोऽएवैष एतद्वर्च एवोपैति।" तत्र प्रदत्ता युक्तिरियमस्ति यत्—अग्निः खलु दाता सोमश्च यशो वर्तते। एवमग्निस्तस्मै यशो ददाति—इत्यादि।

१३, १, ५, १ योऽश्वमेधेन यजते, तस्माच्छ्रीरपसरति। अत एव द्वौ ब्राह्मणौ वर्षं यावद् वीणां वादयतो गायतश्च। वीणा हि श्रीरूपा एवास्ति। एवं तौ यातवेन रूपेण यजमाने श्रियमाधत्तः।

१३, २, ६, ६ योऽश्वमेधेन यजते, तस्माद् ब्रह्मवर्चस्तेजसी दूरमपगच्छतः। अत एव होता ब्रह्मा चर्त्विजावन्तरा यूपं स्थापयित्वा ब्रह्मोद्यं (परमार्थविद्याविचारम्) वदतः। यजमानो वै यूपः, आग्नेयो वै होता बार्हस्पत्यश्च ब्रह्मा भवति। अग्निस्तेजो वर्तते बृहस्पतिश्च ब्रह्मा। अतो द्वावपि ऋत्विजौ यजमाने ब्रह्मवर्चस्तेजश्चाधत्तः।

अपि च द्रष्टव्यम्—

२, १, ३, ७; २, १, ४, ६; २, ३, १, ३१; २, ३, २, ११, १३; २, ३, ३, १३; ४, १, १, १४; ४, ५, ४, ५; ४, ६, २, २; ५, ३, २, ३; १०, १, ४, १४; ११, २, ७, ११; १२, ७, ३, १४; १२, ८, ३, १; १३, १, ५, ३, ५; १३, १, ६, १; १३, २, ६, १०; १३, ३, ७, ८; १४, १, १, १२।

(३) ऊर्जो वीर्यं च

३, १, ३, ८ दीक्षणीयेष्ट्याम् "महीनां पयोऽसि वर्चोदाऽअसि वर्चो मे देहि। वृत्रस्यासि कनीनकश्चक्षुर्दाऽअसि चक्षुर्मे देहि।" (वाज० सं० ४, ३) इति मन्त्रेण मण्डपस्य पूर्वस्यां दिशि तिष्ठन् यजमानो नवनीतेनाभिषिच्यते। इदं नवनीतं हि न घृतं वर्तते, नापि फाण्टम्; अपि तूभयमपि। अतोऽस्य मन्त्रस्य पाठेनायातयामवस्त्वभिषेकेण चाध्वर्युर्यजमानमयातयामं प्रतिपादयति। सहानुभूतिको यातुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

३, २, १, १० अग्निष्टोमे यजमानः कृष्णमृगचर्मण्यभिषिक्तो भूत्वा "ऊर्गस्याङ्गिरस्यूर्णम्रदाऽऊर्जं मयि धेहि।" (वाज० सं० ४, १०) इति मन्त्रेण मेखलयाऽऽत्मानं वेष्टते। मेखलेयमूर्जोऽस्ति। अनया स आत्मनः शरीरमध्ये ऊर्जं आदधाति; अथ च पूर्णतामधिगच्छति। सदयो यातुः।

४, ५, ४, ४ "नो ह वाऽइदमग्रऽइन्द्रऽओज आस। यदिदमस्मिन्नोजः सोऽकामयतेदं मय्योजः स्यात्" इति, ततः "अस्मिन्नेतदोज आस" इति मन्त्रेण यस्मा अतिग्रहचषका आकृष्यन्ते, स ओजस्वी भवति।

५, २, ३, ८ राजसूये ऐन्द्राग्नस्य द्वादशकपालस्य पुरोडाशस्य निर्वपनं तस्येष्टिपद्धत्या यजनं च यजमानमूर्जः शक्तिश्चाधिकुर्वतः।

५, ४, ४, ६-१३ अभिषेकोत्सवेऽभिषिक्तो राजा—"आ ब्रह्मन्" इत्यामन्त्रयते, तदनन्तरमितरः प्रत्याह—"त्वं ब्रह्मासि त्वं सवितासि सत्यप्रसवः।" अस्य परिणामश्चायं भवति यत् स एतस्मिन् वीर्यमादधाति, सवितारमेव सत्यप्रसवं करोति। एवमेव पुना राजा चतुः "आ ब्रह्मन्" इत्यनेनर्त्विजमामन्त्रयते, ऋत्विक् च प्रतिवचनरूपेण मन्त्रविशेषान् पठति, येन स यजमाने बलमूर्जश्चादधाति।

५, ४, ४, १५-१६ उपर्युक्तोत्सवानन्तरम् (५, ४, ४, ६-१३) कश्चन ब्राह्मणः (अध्वर्युः, राज्ञः पुरोहितो वा) "वज्रोऽसि तेन मे रध्येति" इति मन्त्रेण सह राज्ञे स्फयं प्रयच्छति। एतेन वज्रेण स ब्राह्मणो राजानमात्मनोऽबलीयांसं तदमित्रेभ्यश्च बलीयांसं कुरुते। स्फयश्च वज्रोऽस्ति। तं राजाऽऽत्मभ्रात्रे उपर्युक्तेन मन्त्रेणैव सह प्रयच्छति, येन राजा राजभ्रातरमात्मनोऽबलीयांसं कुरुते। राजभ्राता सूताय स्थपतये वा प्रयच्छति। स सूतः स्थपतिर्वा ग्रामण्ये प्रयच्छति। स ग्रामणीः सजाताय प्रयच्छति। स्फयस्येदमन्योन्यदानं हि समाजे वर्गेवोचितां व्यवस्थां सम्पादयितुं विधीयते। अत्र स्फयः कामपि यातवीं शक्तिमधिकरोति, यया स एतद् दातृग्रहीत्रोर्दातारं बलीयांसं विदधाति।

१३, १, ५, ६ राजन्यस्य विषयाः संवत्सरायाश्वमेधे यागे गीयन्ते। ते "स सङ्ग्रामो यमयुध्यत, स सङ्ग्रामो यमजयत" इति वर्तन्ते। एवं सङ्ग्रामसंबद्धानां गीतानां गानेन स यजमाने वीर्याण्याधत्ते, यतो हि सङ्ग्रामो राजन्यस्य वीर्यं वर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तद्वदेव—१, ८, १, १४-१५; ३, ६, १, १५, १६; ५, ३, ५, ७; ५, ४, २, २; ४, ५; ५, ४, ३, २६; ६, ७, ४, १, २; ११, ६, १, १३; १३, ७, ३, ६, १०; १३, ३, ७, १, ६; १४, १, ३, २३।

३—अधीनता ज्येष्ठतेत्यादयः

२, ४, ४, ५ देवभागः (श्रौतर्षिः) दाक्षायणाख्यं यागमीजे। स राज्यद्वयस्य पुरोहित आसीत्। राज्यद्वयपौरोहित्यावाप्तिर्महत्याः प्रतिष्ठाया विषयो विद्यते। इदं तत्त्वमधिगच्छन् य एतेन यजते, स महतीं प्रतिष्ठामवाप्नोति।

३, ६, १, १३ पशुयागे विश्वदेवार्थं यज्ञपशुर्यजमानस्याधिकारे सर्वाणि वस्तूनि करोति। स (यजमानः) बलीयान् भवति, प्रत्येकं वस्तु तमुपगच्छति, तेनाधिकृतं च भवति। 'विश्वदेव' शब्दे 'विश्व' इत्यस्य 'सर्व' इत्यर्थः। एभिर्देवैः सह यागेन सहानुभूतिकयातुद्वारा सर्वाण्यभीष्टानि सिद्धानि भवन्ति।

४, ५, ४, १-२ द्वादशाहप्रसङ्गेनेदमुच्यते यद् यस्मै सोमस्यातिग्राह्याश्चषका आलिख्यन्ते, स तथा ज्येष्ठो भवति यथाऽग्नीन्द्रसूर्यास्त्रयोऽपि देवा एतेषां चषकाणां प्रयोगेण सर्वेषु देवेषु ज्येष्ठा अभूवन्।

५, ४, १, ३-८ राजसूयस्याभिषेकोत्सवे माध्यन्दिनसंहितायाः (मा० सं० १०, १०-१४) "अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु" इति मन्त्रैः सह यजमानो यज्ञस्थल आरोप्यते, इदं खलु तं सर्वोत्कृष्टस्थाने स्थापनार्थमेव। यज्ञस्थलारोहणेन स प्रतीकरूपेणर्तून् संवत्सरानारोहति। एवं च सर्वेषां वस्तूनां श्रेष्ठो भवति, सर्वाणि वस्तून्यवराणि भवन्ति। इयं हि सहानुभूतिकस्य यातोरवस्थितिर्वर्तते।

१२, ८, २, २८ सौत्रामणौ यजमान एकाकी ऐन्द्रं चषकं भक्षयति। भक्षणेन यजमानः स्वेषु श्रेष्ठो भवतीति प्रतिपादको मन्त्र एवोद्ध्रियते—"एकाक्यैन्द्रं यजमानो भक्षयति। एकधा वाऽएषा प्राणानाᳬ श्रीर्यद्वागेकधैव वाचᳬ श्रियमात्मन् धत्ते, तस्मात् सौत्रामण्येजानऽएकधा स्वानाᳬ श्रेष्ठो भवत्यथो यऽएवमेतद् वेद।"

१३, ६, १, १ पुरुषमेधप्रशंसायामिदमुच्यते यद् यः पञ्चरात्रं पुरुषमेधेन यजतेऽथवा यो वैतदेवं वेद, स सर्वाणि भूतान्यतितिष्ठति, अथ चेदं सर्वमपि भवति।

तद्वदेव—३, ६, १, ११; ५, ३, ३, ६; ५, ४, २, ६; ११, २, ३, ५; १२, २, ३, १०; १२, ८, ३, २; १३, ७, १, १, २।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१—आयुष्यविधयः

श्वासाः दीर्घायुष्ट्वञ्च

१, १, २, १४ दर्शपूर्णमासेष्ट्यां शकटारोहणानन्तरमध्वर्युरस्यां घृतं हविः प्रेक्षतेऽथ च "अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिह्वार्षीत्। विष्णुस्त्वा क्रमतामुरु वातायापंहतꣳ रक्षो यच्छन्तां पञ्च" इति मन्त्रं च शंसति। अध्वर्युरेतत्कर्मण उद्देश्यमधोलिखितरूपेण वर्ण्यते—यतो वायुः श्वासमभिदधाति, अतः प्रार्थनयानया स वायोर्यजमानस्य श्वासार्थं स्वच्छन्दं क्षेत्रं प्रभावयति।

१, २, १, १६ दर्शपूर्णमासेष्ट्यामधस्तेन पेषणप्रस्तरे हविर्निक्षेपान्तरम्—"प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषे धामिति प्रोहति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वेति" इति मन्त्रेण सहाध्वर्युः पिनष्टि। एवं स्पष्टतोऽध्वर्युस्तण्डुलपेषणेन यवपेषणेन वा सह किञ्चिद् यातवमुद्देश्यं सम्बध्नाति। स यजमानाय श्वासान् दीर्घायुष्ट्वं चावाप्तुं पिनष्टि।

१, ४, १, ५ दर्शपूर्णमासेष्टौ सामिधेनीमन्त्राः 'आ' तथा 'प्र' इति सहिताः पठ्यन्ते। 'आ' इत्यस्य उदानवायुः, 'प्र' इत्यस्य च प्राणवायुरर्थो भवति। अतः स यजमानाय प्राणवायुमुदानवायुं च साध्नोति। अतो हेतोरेव 'आ' तथा 'प्र' इति पठति।

४, ३, ४, २४ माध्यन्दिनसवने चतुर्धा दक्षिणा दीयन्ते। तास्वेका सौवर्णी विद्यते। सा यदा दीयते, तदाऽध्वर्युणा "अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्त्वमशीयायुर्दात्र········दात्रऽएधि वयो मह्यं प्रतिग्रहीत्रे" (वाज० सं० ७, ४७) इति मन्त्रेण सह गृह्यते। सुवर्णं हि जीवनमस्ति, अतः शुल्कत्वेन सुवर्णदानेन यजमानः स्वकीयं जीवनं त्रायते।

५, २, ४, १० पञ्चवातीयेन कृत्येन रोगाणां चिकित्साप्यपि कर्तुं शक्यते। यतो हि योऽयं सामान्येन पवमानो वायुः स प्राणः, यश्चास्माकं शरीरे श्वासभूतः स महान् प्राणशक्तिस्वरूपः। यद्यप्युभावेकरूपौ, तथापि मनुष्यान्तःप्रविष्टो वायुर्दशधा विभक्तो भवति। अस्मिन् पञ्चवातीये च दश एवाहुतयो भवन्तीत्थमत्राध्वर्युर्दशवातैः प्राणशक्तिभिश्च पूरयति। तं यस्य प्राणाः प्राणवायव उत्क्रान्ता भवन्ति, अथ च स गतासुरिव भवति। एवमत्र दशभिराहुतिभी रोगाक्रान्तो रोगमुक्तः स्वस्थः सबलश्च जायते, इत्युक्तमिति रोगविनाशनेऽपि यातुकर्मणः प्रभावः स्पष्ट एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

५, ४, ३, २५ अभिषेककर्मणि रथादवतरणानन्तरं शालाया दक्षिणे भागे स्थापितस्य रथवाहनस्य दक्षिणे चक्रे बद्धौ शतमानौ शतरक्तिकानिर्मितौ सौवर्णौ मणी यजमानो नृपतिः स्पृशति पठति च मन्त्रमिमम्—"इयदस्यायुरस्यायुर्मयि धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेहि, ऊर्गसि ऊर्जं मयि धेहि०" (वाज० सं० १०-२५) इति। अस्यायमाशयो यद् हे रुक्म त्वमियदसि, अर्थादेतावत्परिमाणं शतरक्तिकापरिमितमसि। आयुरसि जीवनमसि, तस्मादायुः शताब्द-परिमितं मयि धेहि। यो हि यदात्मको भवति स तद्दातुमुत्सहते। यतस्त्वं शतमानमसि, ततः शताब्दपरिमितमायुर्मयि रोपयेत्यादि।

अत्रेदमवधेयम्—"आयुर्हिरण्यम्" इति भगवती श्रुतिः। तथा च शतमानं सुवर्णमत्र शताब्दस्यायुषः प्रतीकं भवति। इत्थं साधर्म्यमूलकमिदं यातुकर्म ज्ञेयम्।

११, ८, ३, ६ अत्रोक्तमुत्पन्नं पुत्रमकृत्तनाभिं यदि पञ्च ब्राह्मणा अनुप्राणितं कुर्वन्ति, तर्हि स शिशुः पूर्णमायुषं भुङ्क्ते इति।

१२, ७, ३, १६ सौत्रामण्यां सुरापात्रं दुग्धपात्रं च विशेषरूपात्मकं यातूद्देश्यं साधयतः, "प्राणा वै पयोग्रहाः, शरीरं सुराग्रहाः" इत्युक्तत्वात्। अत्राध्वर्युः पात्रद्वयमाकृष्य संयुनक्ति, यस्यायमाशयो यत् सः प्राणैः शरीरे सन्दधाति। इत्थमत्र यातुकर्मप्रभावः स्पष्टः, येन यजमानः प्राणशक्तिसंपन्नो भवति। अत्रत्यं ब्राह्मणम्—"प्राणा वै पयोग्रहाः, शरीरं सुराग्रहाः। यदव्य-तिषक्तान् गृह्णीयात् शरीरं प्राणेभ्यो व्यवच्छिन्द्यात् प्राणान् शरीरात्। प्रमायुको यजमानः स्यात्। व्यतिषक्तान् गृह्णाति शरीरमेव प्राणैः सन्दधाति। तस्मात् सौत्रामण्येजानः सर्वमायुरेत्यथो य एवमेतद् वेद।"

१३, २, ६, ११ अत्र हि अश्वमेधप्रसङ्गेन प्रवृत्तो ब्रह्मोद्यो धार्मिको विवादो यातूद्देश्यं साधयति। अत्रोक्तम्—"क उ स्विज्जायते पुनरिति चन्द्रमा वै जायते पुनरायुरेवास्मिँस्तद् धत्तः" इति।

इत्थमत्र द्वौ ब्राह्मणौ यजमानाय आयुः प्रयच्छतः।

१३, ३, ८, २ प्रायश्चित्तात्मकमिदं यातुकर्म। अश्वमेधयागे यदि यज्ञियोऽश्वो रोगा-क्रान्तो भवति, तर्हि अध्वर्युः पूष्णे चरुं प्रयच्छति, येन प्रसन्नः पूषा अश्वं नीरुजं करोति—"पूषा वै पशूनामीष्टे स यस्यैव पशवो यः पशूनामीष्टे तमेवैतत् प्रीणात्यगदो हैव भवति" इति।

एवम् १, २, १, १६; १, ६, ३, ४१; १४, १, ३, २१; (नेत्रशक्तिः) (प्राणशक्तिर्दीर्घायुष्ट्वं च) १, २, २, ७; १, ३, १, ७; १, ३, ६, १३; १५, १,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

४, ३, ३; १, ६, ३, १८; २, १, ३, ४; २, ४, २, ६; २, ५, २, ८; ३, ८, ४, १४; ४, १, १, १८; ४, १, १, २४; ४, १, १, २६, २७; ४, १, २, ३, २४, २७; ४, ३, ४, २५; ५, २, २, ४; ५, २, ३, ६; (ओषधीनां वनस्पतीनाञ्च रोगवारणम्) ५, ५, ५, १५; ६, ४, २, ५; ७, ४, २, १८; १०, २, ६, १६; १०, ४, ३, २; १०, ६, १, ८; १०, ६, ५, ८; ११, ४, ३, २०; १२, ३, ४, ११; १२, ६, १, १०, ११; १३, १, १, ४; १३, १, ५, ६; १३, ४, १, १५; ४, २, १०; १४, १, ३, १६।

राजकर्माणि

१, ३, ४, १५ दर्शपूर्णमासेष्टौ परिधिं कृत्वाऽग्नेर्विसर्जनानन्तरमध्वर्युर्जुहूं प्रस्तरोपरि निदधाति। इतराः स्रुचो जुह्वा उत्तरे पार्श्वे बर्हिषामुपरि जुह्वा अधः स्थापयति, येन परस्परं स्पर्शो न भवेत्। एवं कृत्वा स क्षत्रं विडपेक्षया श्रेष्ठमिति प्रस्तौति। अत्र जुहूः क्षत्रस्थानीया भवति, स्रुचश्च विट्स्थानीया भवन्ति।

२, ४, ४, ६ यो दाक्षायणं यज्ञं करोति, स राज्यमवाप्नोति—"राज्यमिव ह वै प्राप्नोति" य एवं विद्वानेतेन यज्ञेन यजते। अस्य यज्ञस्य पुष्टौ कथ्यते यद् दक्ष इमं यज्ञं कृतवान्। अस्य यज्ञस्य फलस्वरूपमेवेदानीमपि दाक्षायणा राज्यमिवैव प्राप्ताः भवन्ति।

५, १, १, १३ राजा वै राजसूयेनेष्ट्वा भवति। सम्राड् वाजपेयेनेत्यत्रोक्तम्। तथा चानयोर्यज्ञयोर्यात्विकी शक्तिरुद्घोषिता भवति।

५, २, १, २५ वाजपेययज्ञेऽध्वर्युर्यजमानायोदुम्बरकाष्ठफलकोपर्यजर्षभस्याजिनमास्तृणाति मन्त्रं च पठति—"इयं ते राट्" इति, अनन्तरम् "यन्तासि यमन" इत्युच्चार्य यजमानं तस्योपर्यासादयति। अनेन स तं प्रजानां यन्तारं यमनं च करोति। पुनः "ध्रुवोऽसि धरुण" इत्युदीर्य स एनमस्मिन् लोके ध्रुवं दृढं च करोति। पुनर्यदा स मन्त्रं पठति "कृष्यै त्वा, क्षेमाय त्वा, रय्यै त्वा, पोषाय त्वा" इति, तदा तस्यायमाशयो भवति यत् स प्रजानां स्वस्तये तं तत्रासादयतीति।

अत्र वयं पश्यामो यदुपयोगिमन्त्राणामुच्चारणेनाध्वर्युर्यजमानाय तत् सर्वं साधर्म्यमूलकेन यातुकर्मणा साधयति यत् स मन्त्रशब्दैरभिव्यनक्ति।

५, ४, ४, १–४ अभिषेककर्मण्येका खादिरी वितृण्णा वर्ध्रव्यूता आसन्दी आनीता भवति। इमामासन्दीं मैत्रावरुणस्य धिष्ण्यं पुरतो व्याघ्रचर्मोपरि स्थापयन्ति। तदुपर्येकमास्तरणमास्तीर्य मन्त्रं पठन्ति—"क्षत्रस्य योनिरसि" इति। पुना राजा तस्योपरि निषीदति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मन्त्रश्च पठ्यते—"स्योनामासीद सुषदामासीद" इति। एवमत्राशयो यदेनमुपर्यासीनमधस्तादिमाः प्रजा उपासते। अनेन कर्मणा यजमानः क्षत्रस्य योनौ राज्ये प्रतिष्ठितो भवति।

६, ४, १, ५ अत्र राष्ट्रभृद्धोमप्रसङ्गः। अस्मिन् द्वादशगृहीतेनाज्येन द्वादश-राष्ट्रभृदाहुतयो दीयन्ते। प्रथमं तावत् पुंदेवतामुद्दिश्यानन्तरं स्त्रीदेवतामुद्दिश्य, इत्थं मिथुनहोमः क्रियते। अस्येदं फलं भवति यद् राजा अथवा यजमानः प्रजोत्पादने दक्षो भवति। यतो यो हि प्रजोत्पादने समर्थः, स एव राजा भवति। इत्थमत्र द्वादशराष्ट्रभृत्संज्ञका आहुतयो राज्यसंवर्धनाय भवन्ति।

१३, २, २, २ अश्वमेधयागे द्वितीये सोमदिवसे एकोऽश्वः, एकः शृङ्गरहितोऽजः, तथैको गोमृग इत्येते त्रयो यूपे बद्धा भवन्ति। यस्यायमाशयो भवति यदनेन कर्मणा यजमानसैन्यस्याग्रभागो भीष्मो भविष्यति। इत्थमत्र यातुकर्मणा राज्ञः सैन्याग्रभागोऽत्यन्तं प्रबलो भवति।

१३, ३, ३, १० : संवेदनात्मकस्य यातुकर्मणोऽत्रोदाहरणम्। तत्राश्वमेधे एकविंशोऽग्निर्भवति, एकविंशं स्तोम, एकविंशतिर्यूपाश्च। एतास्तिस्रः ककुदः सन्ति। ता य एवं वेद स राज्ञां ककुद् (श्रेष्ठः) भवति।

एवम् ५, २, २, १४; ५, ३, ५, २०–२३, २७, २८, २९; ६, ३, ४, ८, ९; ६, ४, ३, ३; ६, ४, ३, ४, १९; १३, २, २, ५, ७, ८; १३, ३, ७, ९; १३. ४, ४, १।

प्रकीर्णकम्

१. समृद्धिरित्यादि

१, ३, ४, ७ प्राणिनां सस्यानां च संवर्धनं परिपाकश्च।

१, ६, ३, १५ विभूतिर्यशोऽन्नं भोजनं च।

२, ४, ४, २ प्रजोत्पत्तिः समृद्धिश्च।

१३, १, ७, २ समृद्धिः प्राणबलं च।

२. अन्नं पश्वादयश्च

६, ३, ३, १०–११ अन्नं वृष्टिः प्राणिनां प्रभुत्वं च।

६, ४, २, १२, १५ पशुर्जीवनं च।

१२, ७, ३, १८ पशुरन्नं च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२—शान्त्यभिचारौ

(अ) क्षतिमृतिविपद्दौर्भाग्यादिभ्यो मुक्तिः

१, १, २, १० अत्र दर्शपूर्णमासेष्टावध्वर्युः—"धूरसि धूर्व्व धूर्व्वन्तं धूर्व्व तं योऽस्मान् धूर्व्वति०" इत्यादिमन्त्रं पठन् धुरमभिमृशति। तदनन्तरमग्निमनुकूलयितुं धुर्यमग्निं स्तौति। परिणामस्वरूपं चाग्निस्तमतियन्तं न हिनस्ति।

१, २, ४, ७ अत्र दर्शपूर्णमासेष्टावध्वर्युः काष्ठस्य खड्गं निशितं कुर्वन् "द्विषतोव्वध" इत्यादि पठति, तथा शितेन खड्गेन नात्मानमुपस्पृशति, न पृथिवीम्; यतो हि खड्गो वज्रं भवति। अस्मिन् कर्मणि निषेधात्मकस्य सांसर्गिकस्य च यातोरुदाहरणमस्ति।

२, १, ४, २० अग्निर्यदा गार्हपत्यादाहवनीयं नीयते तदायं तथा नेयो यथाऽस्य धूमो यजमानाभिमुखं भवेदिति। यतो हि "अग्निर्वै प्राणः" इत्युक्तम्। यदि स पराङ्मुखो भवति, तर्हि तस्य यजमानस्य "पराङु है वास्मात् प्राणो भवति" इत्युक्तत्वात् प्राणोऽपि तस्मात् पराङ्मुखो भवति। तस्मिन्नवसरे यदि नाम कश्चन तं शत्रुमुद्यतो भवति—यदस्य प्राणाः पराङ्मुखा भवन्त्विति, तदा तत् सत्यमापद्यते। अतः स्वजीवनस्य विपद्वारणाय धूमस्य यजमानाभिमुखीभवनमावश्यकम्। इदं साधर्म्यसम्बन्धिनो यातोरुदाहरणम्।

३, ३, ३, १५-१६ सोमक्रयणानन्तरं यजमानः—"प्रतिपन्थामपद्महि, स्वस्ति गामनेहसम्। येन विश्वा परि द्विषो वृणक्ति विन्दते वसु" (वा० सं० ४, २९) इति मन्त्रेण पन्थानं स्तुवन् शकटं प्रति गच्छति। एकदा देवा मन्त्रेणानेन रक्षांस्यपहत्य कुशलं धनं चावाप्नुवन्, तथैवात्र यजमानोऽपि मन्त्रमिमं पठन् क्षेमं वसु निर्भयत्वं च प्राप्नोतीत्यत्र प्रसङ्गः। अत्र मन्त्रस्य क्षेमस्य निःसपत्नत्वस्य च मध्ये कश्चन यात्विकः सम्बन्धः स्थाप्यते।

५, ४, १-१ अभिषेककर्मणि सदःसमीपोपविष्टस्य दीर्घकेशनरस्य मुखे ताम्रं क्षिपन्ति, मन्त्रश्च पठ्यते—"अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु०" इत्यादि। यतो हि यो राजसूयं करोति स मृत्योर्मुक्तो भवति, दन्दशूकाद् मुक्तो भवति। संक्षेपतः स सर्वापद्भ्यो मुक्तो भवति।

इत्थं यातुकर्मद्वारा सर्वापद्भ्यो मृत्योश्च मुक्तिरुक्ता भवति।

५, ५, ३, १ अभिषेकानन्तरं राजा वर्षपर्यन्तं केशान् न मुण्डयति। यतो हि कर्मण्यस्मिन् तस्योपरि तीर्थेभ्य आहृतानां जलानामभिषेकः क्रियते यच्च बलं भवति। ततश्च बलहानिर्मा भूयादित्येतदर्थं स केशान् धारयति क्षौरकर्म न कारयति। अत्रेदमभावात्मकस्य यातोरुदाहरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

७, २, १, १२ अग्निचयनक्रियायां निर्ऋति-वेदि-निर्माणावसरे निर्ऋतीष्टकानां स्पर्शो वार्यते।

एवम् १, २, २, १६; २, १, ४, २१; २२, २३; २, ३, ३, ६; २, ३, ४, २०-२१; ३, २, १, ३१; ४, १, १, २०; ४, २, ४, २०; ४, ५, ३, १३; १४, १५; ५, २, ३, ३; ५, ४, १, १२, १३; ५, ५, ३, ६; ६, ८, २, ११; ६, ४, २, १३; यजमानः शत्रोरधीनो यथा न स्यात् ६, ४, २, १४; कृमिभक्षितो न भवेत्; ११, ५, ४, २, ३, ४, ५; ११, ७, २, ४; ११, ८, १, ३; १२, ५, १, १४-१६; १२, ७, १, १४; १३, १, ३, ८; १३, २, ४, ४; ग्रामस्य, मार्गस्य, वनस्य च संरक्षणम्, १३, ३, ५, १, ३; १३, ८, ४, ७; द्रष्टव्यानि भवन्ति।

(आ) पापाद् वरुणस्य पाशाच्च मुक्तिः

१, ३, १, १४ दर्शपूर्णमासेष्टौ यजमानस्य पत्नी परिधानोपरि योक्त्रेण परिवेष्टिता भवति। तदानीं तस्याः परिधानं वीरुद्रूपेण योक्त्रं वरुणपाशरूपेण च परिकल्प्यते पाशान्तः पतिता इमा वीरुधो यजमानस्य पत्न्या वरुणपाशाद् रक्षां कुर्वन्ति। यतो हि लतान्तरितं यजमानस्य पत्न्याः शरीरं वरुणपाशेन स्पृष्टं न भवति, इत्थं सा वरुणपाशान्मुच्यते।

३, ६, ४, १७ अत्र देवहत्यायाः मुक्तिर्यथा स्यात्तथैकस्या युक्तेर्वर्णनमस्ति। यदा प्रातः सवनार्थं सोमस्य निष्पीडनं क्रियते निष्पीडनप्रस्तरेण, तदा सः "यं द्विष्यात्तं मनसा ध्यायेदमुष्मा अहं प्रहरामि न तुभ्यमिति …… यद्यु न द्विष्यादपि तृणमेव ध्यायेत् तथो अनेनस्यं भवति" इत्थं मनसा ध्यानेन स वस्तुतः शत्रुं निष्पीडयति, न सोमम्; तथा च सोमात्मकस्य देवस्य हत्यया मुक्तो भवति।

४, ६, ६, १३ अत्र सत्रोत्थानसम्बन्धे दक्षिणस्य हविर्धानस्य "अधोऽधोऽक्षं सर्प्पन्ति स यथाहिस्त्वचो निर्मुच्येतैवं सर्वस्मात् पाप्मनो निर्मुच्यन्ते" इत्युक्तम्। इत्थं सर्पो यथा बाह्यां जीर्णां त्वचं जहाति, तथा यजमानः स्वीयमघादिकं जहाति।

७, २, १, १४ मन्त्रार्थः स्पष्टोऽतो मन्त्र एव लिख्यते—

"तिस्र इष्टका उपदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत् पाप्मानं निर्ऋतिमपहते।"

अत्र नैर्ऋतीष्टकाभिर्वेदिनिर्माणकालेऽध्वर्युस्तिस्र इष्टका उपदधाति। तेन कर्मणा सोऽग्नेर्मात्रातुल्यमेव पापमपहन्तीत्युक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

७, २, १, १६ अग्निचयनकृत्ये निर्ऋतिवेदिनिर्माणाय तिस्र इष्टका भवन्ति, आसन्दी, शिक्यम्, रुक्मपाशस्तथा द्वे कोमले आस्तरणे सर्वमेतन्मिलित्वा संख्यायामष्टौ भवन्ति। गायत्र्यां छन्दस्यप्यष्टौ मात्रा भवन्ति। गायत्री चाग्निसम्बन्धा। इत्थमत्रापि कर्मणि यजमानः पाप्मानमापदं च हन्ति।

"तिस्र इष्टका भवन्ति। आसन्दी शिक्यं रूक्मपाशऽइण्ड्वे तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत् पाप्मानं निर्ऋतिमपहते" ॥

८, ५, १, ७ असपत्नेष्टकाभिर्देवाः पाप्मानं सपत्नं दूरमकुर्वन्, तथैव यजमान आ सामिष्टकानां वेदेः पञ्चमस्तरमभितः स्थापनेन सपत्नमभितो दूरीकरोतीत्यत्रत्यः प्रसङ्गः।

११, १, ५, ८ दर्शपूर्णमासयागे वैश्वानरायाग्नये यो द्वादशकपालं पुरोडाशं ददाति स इन्द्रो यथा पाप्मानं वृत्रं हतवान् तथैव, स्वकीयं सर्वं पाप्मानं संदहति स्वल्पमपि पापं तत्र नावशिष्यते "यो हैवं विद्वानेतयेष्ट्या यजते न हास्याल्पश्चन पाप्मा परिशिष्यते।"

एवम् १, ६, ४, १३; २, ४, ४, १५; २, ५, २, ४; ३, ८, ५, १०; ३, ६, १, २१; ३, ६, ४, १८; ५, २, ४, २; ६, ३, ३, ७; ७, २, १, ४; १५, १७; ८, ४, २, २; १२, १३; ८, ५, १, ६, १०, ११, १४, १५, १६, १७; १२, ७, ३, २२; १२, ८, १, ३०; १३, ३, ५, ४; (ब्रह्महत्या) १३, ६, २, ४, १५।

(ग) शत्रूणां राक्षसानां च प्रतिकूलानि कृत्यानि

१, १, २, २ दर्शपूर्णमासयागेऽध्वर्युः शूर्पमग्निहोत्रहवणीं चादाय गार्हपत्याग्नौ प्रतपन् मन्त्रमुच्चारयति—"प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः। निष्टप्तं रक्षो निष्टप्ता अरातयः। उर्वन्तरिक्षमन्वेमि" (वाजसनेयसं० १, ७)

एवं प्रतपनेन स यज्ञीयमासस्य प्रारम्भकालादेव राक्षसानरातींश्च दहति। अत्र द्वयोर्वस्तुनोः प्रतपनं राक्षसादिप्रतपनं भवतीतीदं संवेदनात्मकस्य यातोर्निदर्शनमस्ति।

१, १, ४, १७ अध्वर्युर्यदा हविष्कृतमाह्वयति तदैको दृषदुपले समाहन्ति शङ्कुना। तेनाहतेन यो ध्वनिः समुत्थितो भवति, सोऽसुराणां शत्रूणां च विनाशाय भवति। अत्रोक्तं यस्मै ध्वनिरयं क्रियते, तस्य शत्रवः पापीयांसो भवन्ति (दुर्दशामाप्नुवन्ति)।

अत्र ध्वनिरेव विशिष्टां शक्तिं गृह्णाति येन शत्रवो नश्यन्ति।

वागियं कथमुत्पन्नेत्यवलम्ब्य शतपथब्राह्मण एकमाख्यानकं वर्तते—यत् पुरा मनोरेको वृषभ आसीत्। तस्मिन्नसुरघ्नी सपत्नघ्नी वाक् प्रविष्टा। तस्य श्वसथाद् रवथादसुररक्षांसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मृग्यमानानि यन्ति । तदा तेऽसुरा मनोः समीपं गत्वा अवदन्—"पापं व्रत नोऽयमृषभः सचते कथं नु इमं दभ्नुयाम इति" अथ मनोरनुज्ञां लब्ध्वा तैः स ऋषभ आलब्धः । आलब्धे तस्मिन् ऋषभे सा वाक् मनोर्जायां प्रविवेश । तथ च पुनर्व्याकुलीभूय पूर्ववन्मनोराज्ञया तस्य जाया यज्ञेऽसुरैरालब्धा । तदा सा वाग् यज्ञं यज्ञपात्राणि च प्रविवेश यस्माद्धि तेऽसुरास्तां वाचं निर्हन्तुं नैव समर्था बभूवुः । अतो दृषदुपलोत्पन्ना वागसुरघ्नी सपत्नघ्नी च भवति ।

१, १, ४, २१ दर्शपूर्णमासेष्टौ "अध्वर्युः" मुसलेन निस्तुषीकृतान् तण्डुलान् शूर्पे धृत्वा निष्पुनाति मन्त्रञ्च पठति—"परापूतं रक्षः परापूता अरातय" इति । अनन्तरं स भूमौ पतितान् तुषान् उत्थाप्य प्रक्षिपति, पुनः पठति च—"अपहतं रक्षः" इति । एवं प्रतीकात्मकेन प्रयोगेण सोऽभीष्टं फलमवाप्नोति । संवेदनात्मकमिदं यातुकर्म ज्ञेयम् ।

१, ३, ५, ७ अत्रेयं प्रकृतं यद् दर्शपूर्णमासेष्टौ समिध्यमानायामग्नौ एकादश सामिधेन्य ऋचः पठ्यन्ते । तत्र प्रथमायास्त्रिरुच्चारणं क्रियते, उत्तमायाश्च त्रिः । एवं पञ्चदश सामिधेन्यः संपद्यन्ते । अत्रोक्तम् 'पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्यमेवैतत् सामिधेनीरभिसंपादयति । तस्मादेतास्वनूच्यमानासु यं द्विष्यात्तमङ्गुष्ठाभ्यामवबाधेतेदमहममुमवबाध इति तदेनमेतेन वज्रेणावबाधते ।' मन्त्रेणानेनेदं स्पष्टं यत् पञ्चदश सामिधेनीनामृचां समुच्चारणकाले उच्चारयिता वज्रतुल्यो भवति, पृथ्वी च शत्रुरूपा । ततश्चाङ्गुष्ठनिपीडनेनैव स शत्रुं ध्वंसयति । प्रतीकमादाय संवेदनात्मकमिदं यातुकर्म ज्ञेयम् ।

१, ४, १, ४० अत्रायं प्रसङ्गो यदेकादशसंख्याकासु सामिधेनीष्वन्तिमास्तिस्र ऋचोऽध्वर शब्दयुक्ताः सन्ति । अध्वरशब्दो यज्ञापरपर्यायः, यतो ह्यसुरा देवान्नाशयितुं नाशक्नुवन् यदा देवा यज्ञमकुर्वन् । तत इदं भवति यद् यः कोऽपि यस्मै अध्वरशब्दयुक्ता इमास्तिस्र ऋचः पठति, तस्य शत्रुः पराभूतो भवति, यजमानश्च तत्फलमवाप्नोति यत् सोमयागे कृते लभ्यते । ऋचामयं यात्विकः प्रयोगोऽध्वरशब्दमाहात्म्याद् विशेषार्थं प्रतिपादयति, यस्यार्थः "अक्षतः" इति व्युत्पत्तिलभ्यो भवति । यातुमाहात्म्यादेव यजमानो महतः सोमयागस्य फलं लभते ।

१, ४, ३, ११–२१ अत्रायं प्रसङ्गो यद् यदि नाम कश्चन सामिधेनीनामृचामुच्चारयितारं विद्वांसं होतृपुरोधसं तस्योच्चारणकाले शप्तुं वाञ्छति, तर्हि स स्वयमेवार्तिं प्राप्नोति । यतो हि सामिधेनीनामृचां माहात्म्यात् सोऽनवधृष्यो भवति । तथा च यदि तदानीं होता प्रतिब्रवीति, प्रतिशापं ददाति तत् सत्यं भवति । पूर्वं तावत् प्रथमायां सामिधेन्यां वर्तमानः प्र इत्यक्षरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

प्राणस्य प्रतीकः, तथा च शस्ता प्राणैरेव संकटमवाप्नोति—"स यद्येनं प्रथमायां सामिधेन्या-मनुव्याहरेत् तं प्रति ब्रूयात् प्राणं वा एतदात्मनोऽग्नावाधाः प्राणेनात्मन आर्तिमारिष्यसीति तथा हैव स्यात्"।

इत्थं होतुर्द्वितीयादिप्रतिवचनेषु शस्ता स्वयमपानेन, उदानेन चार्तिं प्राप्नोति। पुनश्च क्रमशो बधिरः, मूकः, मोमुघः (मनसो विपरिलोपः, तेन गृहीतः) अन्धः, ऊर्ध्वश्वासः, क्लीबः, अपिनद्धो भवति, तथा सर्वात्मना विनश्यति च। अत्र यातुप्रभावः स्पष्टः।

१, ६, ३, २८ अत्रोक्तम्—दर्शपूर्णमासयागे द्वे स्तुती मन्त्रोच्चारणेन अर्थादुपांशु पठितव्ये भवतः, किन्त्वन्ते वषडित्युच्चैः पठ्यते। वषट्कारश्च वज्रं भवति। तेनास्य यजमानस्य शत्रवो विनश्यन्ति। "वज्रेण वषट्कारेण हन्ति तस्मादुपांशुयाजं यजति।" अत्रोच्चैर्वषट्कार-प्रयोगे यातुप्रभावः स्पष्टः।

१, ६, ३, १० विष्णुपादबुद्ध्या स्वपादस्य भूमौ प्रक्षेपा विष्णुक्रमा भवन्ति। तत्र दर्शपूर्णमासयागे यो हि यजमानः "दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः" (वाज० सं० २–२५) इत्यादि मन्त्रेण विष्णुक्रमान् त्रिः करोति। तेन तस्य शत्रुस्त्रिभ्यो लोकेभ्यः प्रच्युतो भवति। संवेदनात्मकस्य यातोरिदमुदाहरणम्।

२, १, २, १७ अत्रोक्तं यो हि चित्रानक्षत्रेऽग्निमाधत्ते स स्वशत्रुनाशने समर्थः संजायते। क्षत्रियस्तु विशेषेण चित्रायामेवाग्निमादधीत। इत्थमत्र चित्रानक्षत्रं यातुप्रभावं स्पष्टं करोति।

३, २, १, १३ अग्निष्टोमे दीक्षाविधौ यजमानो मुञ्जेन निर्मितां मेखलां धारयति, येन तस्य शत्रवो विघ्नकारकाश्चान्ये नश्यन्ति। तदानीं मुञ्जशर एव वज्रं भवति।

३, २, १–३२–३३ अग्निष्टोमे दीक्षिताय पुरुषायाध्वर्युरौदुम्बरं दण्डं प्रयच्छति, येन राक्षसा अपहता भवेयुरिति। अत्रोक्तमौदुम्बरो दण्डो वज्रं भवति, बलमन्नञ्च प्रयच्छतीति।

३, ५, ४, ५–१३ सोमयागे उपरवाः, अर्थात् कूपकाः खन्यन्ते; तेषां खननार्थमध्वर्युः प्रथमं तावत्तेषामाकारप्रकारादि स्फ्येन परिलिखति, मन्त्रं चोच्चारयति—"इदमहं रक्षसां ग्रीवा अपि कृन्तामि" इति। इत्थमत्राध्वर्योः स्फ्येन भूमौ परिलेखनं रक्षसां ग्रीवाकर्तनस्य प्रतीकमिव भवति, स्फ्यश्च वज्रस्य। अनन्तरं यदा परिलेखनानुसारमुपरवखननं सम्पन्नं भवति, तदा खननेनोत्कीर्णां मृत्तिकामुद्धृत्य दूरे क्षिपन्ति। क्षेपणावसरे मन्त्रोऽयं पठ्यते—

रक्षोहणं बलगहनं वैष्णवीमिदमहं तं बलगमुत्किरामि, यं मे निष्ट्यो यममात्यो निच-खानेदमहं तं बलगमुत्किरामि, यं मे समानो यमसमानो निचखानेदमहं तं बलगमुत्किरामि, यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मे सबन्धुर्यमसबन्धुर्निचखानेदमहं तं बलगमुत्किरामि, यं मे सजातो यमसजातो निचखानोत्कृत्यां किरामि" इति।

पराजयं प्राप्य पलायमानैरसुरैरिन्द्रादिवधार्थमभिचाररूपेण भूमौ निखाता अस्थि-केश-नखादिपदार्थाः कृत्याविशेषा वलगा उच्यन्ते।

इत्थमत्र वयं पश्यामो यदध्वर्योर्गर्त्तखननं मृत्तिकाया दूरे प्रक्षेपश्च समानैरसमानैर्वा शत्रुरूपैर्बान्धवैरबान्धवैश्चाभिचरद्भिः संपादिताया बलगरूपायाः कृत्याया विनाशरूपार्थं प्रक्षेपरूपं वा प्रयोजनं च साधयति। तथा च स्पष्टं भवति यद् यज्ञिया विविधाः क्रिया अपि यातुसम्बधिनमर्थं साधयन्ति।

३, ६, १, १०-११ सोमयागे सदसो निर्माणावसरे यवमत्यः प्रोक्षण्यो भवन्ति। यतः "आपो ह वा ओषधीनां रसः, ओषधय उ ह अपां रसः" इत्युक्तम्। देवाश्च सर्वासामोषधीनां रसं यवेष्वदधुः। एतैर्यवैः सर्वा सपत्नानामोषधीरयुवत, यदयुवत तस्माद् यवा इति नाम जातम्। एभिर्यवैर्यजमानोऽपि सर्वेषां स्वशत्रूणामोषधीराकर्षति।

एते यवाः "यवोऽसि यवयास्मद् द्वेषो यवयारातीः" इत्यादिमन्त्रेण जलेन मिश्रिताः क्रियन्ते। अत्र यव-शब्दो मिश्रणामिश्रणार्थकाद्'यु'धातोरचि प्रत्यये निष्पन्नः संयोगार्थको वियोगार्थकश्च वर्तते। तेन पक्षे सपत्नौषधीनामाकर्षणं शत्रुभिरसंयोगश्च जायते।

५, २, ४, १४-२० राजसूये पिशाचानां राक्षसानां च विनाशाय अपामार्गहोमः क्रियते। एतदर्थमन्वाहार्यपचनसंज्ञकाद् दक्षिणाग्नेः अग्ने सहस्व पृतना अभिमातीरपास्य। दुष्टरस्तरन्नरातीर्वर्चोधा यज्ञवाहसि" इति मन्त्रेणोल्मुकमादायाग्निं प्रज्वाल्यापामार्गहोमः क्रियते। अस्मिन् होमे पालाशो वैकङ्कतो वा स्रुवो भवति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। उपांशोर्वीर्येण जुहोमि हतं रक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षो वधिष्मामुमसौ हतः इति होममन्त्रोऽत्र पठ्यते।

अत्रायं विशेषो यत् पालाशः स्रुवो भवति चेत्तर्हि ब्रह्मणा रक्षसां नाशो भवति, "ब्रह्म वै पलाशः" इत्युक्तत्वात्। अथ वैकङ्कतः स्रुवो भवति, चेत्तर्हि वज्रेण रक्षसां हननं जायते, "वज्रो वै विकङ्कतः" इत्युक्तत्वात्। अत्र पूर्वां दिशं प्रति गत्वा यदि जुहोति, यजमानस्तर्हि स स्रुवं पूर्वस्यां दिशि प्रक्षिपति। अथ यद्युत्तरां गत्वा जुहोति, तदा "अवधिष्म रक्षः" इत्युक्त्वा स्रुवमुत्तरस्यां दिशि प्रक्षिपति।

Nepal Sanskrit University, Balmeeki Campus. Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यदि कश्चन यजमानोऽस्यापार्गहोमस्य फलं प्रतीचीनं वाञ्छति, तर्हि स शत्रोर्दिशं प्रति पश्यन् शत्रोर्नाम गृहीत्वा "अवधिष्मामुमसौ हतः" इति मन्त्रमुच्चार्य जुहोति। एतेन हि कर्मणा यः कश्चनास्मै यजमानाय तत्र किञ्चित् करोति, तमेव तत् प्रत्यग् धूर्वति, प्रतीचीनफलो ह्यपामार्ग इत्युक्तत्वात्।

५, ५, ५, १४ अत्रोक्तं त्रैधावतीष्ट्या अभिचरेत्। अस्या इष्टेः प्रयोगेण आरुणि-जातशत्रोः पुत्रं भद्रसेनमभिचचार। अनया इष्ट्येन्द्रो वृत्रस्यास्थानमच्छिनत्। अतः शत्रु-नाशायानयेष्ट्याऽभिचरेत्। अस्यामिष्टावैन्द्रावैष्णवं द्वादशकपालं व्रीहियवाणां हविर्भवति। प्रथमं तावद् व्रीहिमयं पिण्डमधिश्रयति यजमानः, तद् यजुषां रूपं भवति। अथ यवमयं तद् ऋचां रूपं भवति, पुनश्च व्रीहिमयं पिण्डमधिश्रयति यजमानो यत् साम्नां रूपं भवति। एवमेतत् त्रय्या विधायाः स्वरूपं भवति। इत्थं त्रिधातुरिवैषा विद्या त्रैधातवी इत्युच्यते। अस्यामिष्टौ महद् वीर्यं भवति। इत्थं महत्या वीर्यवत्याऽनयेष्ट्या शत्रुनाशः सर्वथा संभवति।

७, ४, १, ३४ आहवनीयाग्निवेदिनिर्माणप्रसङ्गे एकः स्वर्णमयः पुरुषो वेद्या मध्यभागे स्थाप्यते। पुरुषोऽयं सुवर्णपात्रमधितिष्ठति, सुवर्णपात्रं च कमलपत्रम्। ततः पञ्चगृहीतेन आज्येन यजमानः स्वर्णमयपुरुषोपरि अग्नेः प्रत्येकस्मिन् पार्श्वे आहुतीर्जुहोति। यत आज्यं वज्रमित्युक्तम्, अतो यजमानो वज्रेणेत्थं रक्षःपिशाचान् नाशयति। पुनश्च अग्निवेद्यां पञ्चस्तराः पञ्चर्तुरूपा भवन्ति, पञ्चर्तवश्च संवत्सरो भवति। संवत्सरश्चाग्निः। अतो यावानग्निर्यावती चास्य मात्रा तावता एव यजमानो राक्षसान् पिशाचांश्चापहन्ति।

१३, १, २, ६ अश्वमेधयागे "प्रजापतये त्वा जुष्टं प्रोक्षामि" इत्यादिमन्त्रेणाश्वप्रोक्षणा-नन्तरं चतुरक्षं श्वानं हत्वा "परो मर्तः परः श्वा" इत्युदीर्य अश्वस्याधस्पदं कुर्वन्ति। यस्य शुनश्चक्षुषोः समीपे पुण्ड्रे स्तः, स चतुरक्षः श्वा कथ्यते। अयमश्वमेधकर्त्तुर्दुष्टः प्रतिस्पर्धी कल्प्यते, अत एवोपर्युक्तः प्रयोगः क्रियते, येनाश्वमेधकर्त्तारं दुष्टः शत्रुर्न पराजयेत्। अत्र "अश्वः वज्रम्" इत्युक्तम्, येन यज्ञकर्ता स्व शत्रुं पाप्मानं नाशयति।

अत्र शुनो हननं प्रतीकात्मकं यात्विकं च भवति। यमस्य श्वानश्चतुरक्षाः सन्ति। नेत्रोपरि बिन्दुयुक्तस्य शुनो वधेन शत्रुर्यमाय दीयते। अनेन कर्मणा अश्वमेधकर्त्रे द्रुह्यमाणाय दीयमानो दण्डः परिलक्षितो भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

एवम् १, १, १, १७; १, १, २, १५; १, १, ४, ४; १, २, १, ७-११; १, २, ४, १-२१ (स्तम्बयजुर्हरणम्); १, २, ५, ७, २२; १, ३, १, ४; १, ४, १, ३५; १, ८, ३, १, ३-४; २, १, १, १०-११, २, १, ४, १६; २, ४, ४, १५; ३, १, ३, ११, १३, १५; ३, २, १, १३, २४; ३, ५, ४, ३; ३, ६, ४, १५-१६; ३, ७, २, १; ४, १, १, २६; ४, २, १, १४; ४, ३, ३, ५; ४, ६, ४, ४; ५, २, ३, ७; ५, २, ४, ३, ७; ५, ४, १, ६; ६, ३, १, २६; ७, ४, २, २३; ८, २, ४, १४; ६, १, २, १२; ६, ५, २, ३, ४; ११, १, ६, १२; ११, २, ७, २१-२३; १२, ७, ३, ४; १२, ६, २, ६; १३, ३, ४, २; १३, ६, १, १६; १३, ८, ४, ५; १४, ३, १, २७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

पञ्चमोऽध्यायः

सामवेद-संहिता

कौथुमः, जैमिनीयः, राणायनीयः, इति तिसृषु शाखासु विभक्तः सामवेद उपलभ्यते। तत्र कौथुमशाखैव सुविदितचरा सुलभा च। सायणमाधवयोर्व्याख्यानसहिताऽस्य वेदस्य संहिता अन्ये चापि ग्रन्था मुद्रिता विलोक्यन्ते। जैमिनीयशाखायास्तु केवलं संहिता-ब्राह्मण-गृह्यसूत्राण्येव मुद्रितान्युपलभ्यन्ते। अतः परं राणायनीयशाखाया ग्रन्थानां विषयेऽस्माकं ज्ञानमल्पमेव विद्यते, अतोऽस्मिन् निबन्धे मया सर्वे सन्दर्भाः कौथुमशाखाया एव गृहीताः।

सामवेदसंहितायां स्तुतिपरका मन्त्राः सन्ति, यानुद्गातारस्तस्यानुयायिन प्रयुञ्जते। यदा सोमरसस्य परिष्करणं दुग्धादिभिः सह मिश्रणञ्च कृत्वा सोमरसो विभिन्नाभ्यो देवताभ्यः समर्प्यतेऽन्यासु च क्रियासु गृह्यते तदैतेषां साममन्त्राणां गीतिः, उद्गातारस्तस्यानुयायिनश्च कुर्वन्ति। तत्र केवलं पञ्चसततिमन्त्रवर्जमन्ये सर्वेऽपि मन्त्रा ऋग्वेदतो गृहीता वर्तन्ते। तथा च यातुसम्बन्धिनो विषया यदि नाम ऋग्वेद एव नातिप्रचुराः समुपलभ्यन्ते, तर्हि सामवेदे तेषां यातुविषयाणां समुपलब्धिन्र्यूनतरा भवेच्चेत्, तत्सामयिकमेव स्यात्। इदानीं सामवेदस्थयातु-विषयकाणां स्थलानां विमर्शः किञ्चित् प्रस्तूयते।

२, २, २, १ (१–३) एते मन्त्राः सोमपवमानं सम्बोधिताः सन्ति। तत्र प्रथमे मन्त्रे उक्तम्—इमे प्रवाहिताः सोमबिन्दवः परिष्कारिण्या चालन्या परिष्कृता अस्मभ्यमानन्दप्रदा भवन्तु। अत्र सोमप्रवाहस्य यद्यपि यज्ञियोऽर्थः; तथापि प्रकृतिसाम्यात् संवेदनात्मकेन यातुना इमे भूतिप्रदा भवन्ति। अत्र सोमप्रवाहो वृष्टिप्रवाहेण सह साम्यं भजते। वृष्ट्या च यथा अन्नमैश्वर्यञ्च जायते तथैव सोमरसप्रवाहेणापि सम्भाव्यते।

२, ४, १, २ (१–२) सोमप्रशंसापराविमौ मन्त्रौ। मन्त्रयोरनयोरयमाशयो यद् वीराणाम्, गवाम्, अश्वानाञ्च कृते जायमानानामस्माकं मनोरथानां मध्ये इमे वीर्यवन्तो दीप्तिमन्तो वेगवन्तश्च सोमरसप्रवाहाः प्रवहन्ति। पवित्रैः पुरुषैः सुसंस्कृताः, द्वाभ्यां हस्ताभ्यां निर्मलीकृता इमे सोमबिन्दव ऊर्णवस्त्रान्तरेण निर्गच्छन्ति। इमे सोमरसप्रवाहा भूमेः स्वर्गादन्त-रिक्षाच्च निखिला निधयो यजमानायार्पयिष्यन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पूर्वं यदुक्तं तदत्रापि घटते ।

२, ५, २, ८ सौमपवमानमुद्दिश्येयमुक्तिः । अत्र पवमानसूक्तप्रशंसायामुक्तं यद् यो हीमान् सूक्तान् पठति सो मातरिश्वनेन मधुरमन्नाद्यं भुङ्क्ते । तस्मै सरस्वती जलं घृतं दुग्धादिकं सर्वं प्रभूतं ददाति ।

सोमयागोद्देश्यकानां पवमानसूक्तानां पाठेन प्रचुरमन्नाद्यं पेयं च प्राप्नोतीत्यतः स्पष्टं संवेदनात्मकं यातुरहस्यम् ।

यद्यप्युदाहरणानीमानि पर्याप्तानि, तथाप्यत्र तेऽपि त्रयो मन्त्राः स्मरणीयाः पुरोधसा प्रयुक्तानां येषां मन्त्राणां प्रभावेणेन्द्रो वृत्रं हन्तुं प्राभवत् । ते मन्त्राः सन्ति—१, ५, २, १, ३; २, १, १, २३, २; २, ५, १, १०, १, ३ ।

एतेन मन्त्राणां यातुसम्बन्धिनी महती शक्तिर्द्योत्यते ।

पञ्चविंशब्राह्मणम्

तत्र कौथुमशाखायां सामवेदे चत्वारि वृहन्ति, चत्वारि अल्पीयांसि इत्यष्टौ ब्राह्मणानि सन्ति । वृहत्सु प्रथमं तावत् ताण्ड्यम्, प्रौढमथवा पञ्चविंश-ब्राह्मणम्; द्वितीयं षड्विंश-ब्राह्मणम्; तृतीयं सामविधानब्राह्मणम्, तथा चतुर्थमार्षेय-ब्राह्मणमस्ति । एतेषु केवलमाद्ये द्वे एव सामवेदस्य श्रौतैः संस्कारैः सम्बद्धे तृतीयन्तु साम्नामन्यैर्विधिभिः क्रियाभिश्च सम्बद्धम् । अल्पीयःसु तावत् प्रथमं देवताध्यायब्राह्मणम्, द्वितीयमुपनिषद्ब्राह्मणम्, तृतीयं संहितोपनिषद्-ब्राह्मणम्, चतुर्थं वंशब्राह्मणम् । तत्र षष्ठस्य ब्राह्मणस्याद्ये भागे केवलं गृहसंस्कारैः सम्बद्धा मन्त्राः । अत एव 'मन्त्रब्राह्मणम्' इत्यपि तस्य संज्ञा, द्वितीयस्य भागस्य तु छान्दोग्योपनिषत्' संज्ञा एतेषामुपरिनिर्दिष्टानामष्टानां ब्राह्मणानां गणना सायणाचार्यैर्दैवतब्राह्मणादिभाष्यारम्भे कृता—

अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम् ।
षड्विंशाख्यं तृतीयं स्यात् ततः सामविधिर्भवेत् ॥
आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रन्था अष्टावुदीरिताः ॥

इतरब्राह्मणग्रन्थानपेक्ष्य वृहत्त्वाद् निखिलसोमयागतदङ्गस्तोत्रादिविधायकत्वाच्च प्राधान्यमादिमत्त्वं प्रौढत्वञ्च ताण्डयस्य । अत्र च पञ्चविंशतिरध्यायाः, अत एव पञ्चविंशब्राह्मणमित्यपि व्यपदेशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अष्टस्वेतेषु ब्राह्मणेषु तत्राद्येषु त्रिषु तथा मन्त्रब्राह्मणे एव मदीयो निबन्धविषय उपलभ्यत इति कृत्वा मयाऽत्र निबन्धे तेभ्य एव सामवेदस्य ब्राह्मणेभ्यो निदर्शनानि गृहीतानि।

१—पुष्ट्या सम्बद्धानि कृत्यानि

(क) अन्नम्

१, १, ६ अत्र हविर्धानमण्डपं प्रविशन्त उद्गातारो मन्त्रं जपन्ति "इष ऊर्ज्जं आयुषे वर्चसे च"।

इडन्नम्, ऊर्गासः क्षीराज्यादिः, आयुः प्रसिद्धम्, वर्च्चो वेदशास्त्राणि विज्ञतत्त्वरूपं ब्रह्मवर्चसम्, चकारात् पुत्रपौत्रादयः। सर्वसम्पत्त्यर्थं हविर्धानं प्रविशाम इत्यर्थः। अस्मिन् प्रसङ्गे उद्गातॄणां प्रवेशरूपं कर्म अन्नोपलब्धिरूपं यातूद्देश्यं साधयति।

१, ३, ६–७ अत्र हि उद्गाता अध्वर्युणा दत्तेन प्रस्तरेण (घाससमूहेन) स्वकीयां दक्षिणां जङ्घामुपहत्य मन्त्रोच्चारणं करोति—

अन्नं करिष्याम्यन्नं प्रविष्याम्यन्नं जनयिष्यामि। (६)

अन्नमकरमन्नमभूदन्नमजीजनम्। (७)

(स्तोत्रसामर्थ्यमन्नसमृद्धेर्निश्चितत्वाद् भूतार्थप्रयोगः—इति सायणाचार्यः)।

अत्रोद्गाता मन्त्रशक्त्या बहुप्राण्युपकाराय प्रभूतमन्नमुत्पादयति। ४, ८, ४ गौश्चायुक्त-स्तोमौ भवतः, तत्रानयोः पञ्चशतसङ्ख्याका मन्त्राः स्तोत्रीया भवन्ति। तत्रोभयत्र दशसंख्यया विभागेन विराट् संपादने सति गोष्टोमायुष्टोमौ वैराजौ भवतः—"दशाक्षरा विराट्" इति श्रुतेः। विराट् चान्नमस्ति। ततश्च सत्रस्यास्य संपादनेन सम्पादयिता अन्नाद्ये प्रतितिष्ठति–अन्नमवाप्नोति।

"वैराजो भवतोऽन्नं व्विराडन्नाद्य एव प्रतितिष्ठन्ति"।

१४, ५, २७–२८ विभिन्नानां साम्नां गानं विभिन्नान्युद्देश्यानि पूरयति। अत्रोक्तम्—

"जराबोधीयं भवत्यन्नाद्यस्यावरुध्यै"।

जराशब्दयुक्तायां योन्यामुत्पन्नं साम जराबोधीयम्। तत्राऽन्नाद्यस्यादनीयस्यान्नस्य अवरुध्यै अवरोधनाय लाभाय भवति।

"अन्नं वै जराबोधीयं मुखं गायत्री मुख एव तदन्नं धत्तेऽन्नमत्ति" तथा च गायत्र्यां जराबोधीयस्य गानाद् मुखे आस्ये एव तद् अन्नं धत्ते धारयति। यस्मादेवं तस्मादेतेन साम्ना स्तुवन् अन्नमत्ति–लब्धान्नः सन् भोक्तृत्वं लभते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

एवमेव —

३, १३, ३; ४, ८, ६; ८, ८, १८; १३, ६, २७; १४, ३, १८-१६; १४, ५, ५, १५; १६, १३, १०-११; १७, ६, १; १६, २, १; २०, १०, १०; २०, ३, ४; २३, १४, ३; २३, १७, १; २३, २६, १; २५, ६, ३; इत्येतान्यपि द्रष्टव्यानि भवन्ति ।

(ख) पशुः

१, २, ६ अत्र उद्गाता ग्रावाणामुपरिष्टाद् द्रोणकलशं पश्चादारम्य प्राञ्चं दक्षिणत आरम्योदञ्चं वा स्थापयति मन्त्रं च पठति—

"इदमहममुं यजमानं पशुष्वध्यूहामि पशुषु च मां ब्रह्मवर्चसे च"

कलशाध्यूहनप्रसादाद् मया यजमानेन च पशवो लभ्यन्तामित्यर्थः । न केवलं पशुलाभः । किन्तु ब्रह्मवर्चसनिमित्तमप्येतदध्यूहनं भवतु। इत्थमत्रोद्गातुः कृत्यविशेषो विशेषं यातूद्देश्यं साधयति ।

२, १४, २ पुरुषः, गौः, अविः, अजः, गर्दभः, अश्वः, अश्वतर इति सप्त ग्राम्याः पशवः सन्ति। यो ह्येकविंशस्तोमस्य सप्तसप्तिनीं विष्टुतिमुपयुंक्ते स एतान् सप्त पशून् अवाप्नोति। अत्र 'सप्त' शब्दो यातुसम्बन्धिनं कञ्चन विशेषार्थं प्रतिपादयति। अपरञ्च सप्तशीर्षण्याः प्राणा मुखनासिके अक्षिणी कर्णाविति इन्द्रियाणि तदधिष्ठानत्वात्। अत इन्द्रियाण्येवैतया सप्तसप्तिन्याऽऽप्नोति। ४, ८, ७ इदं समानः समानं जनयतीति साधर्म्यमूलकस्य यातोरुदाहरणम्। अत्र हि दशाहकृत्ये षडहानन्तरं सप्तमोऽष्टमो नवमश्चेति त्रयो दिवसाश्छन्दोमा भवन्ति, ते च पशुसाधनत्वात् "पशवो वै च्छन्दोमाः" पशुष्वेव प्रतितिष्ठन्ति । इत्थं सत्रिणः प्रयोगेणानेन पशूनाप्नुवन्ति। यतः कारणगुणाः कार्यमाश्रयन्ति ।

४, ६, ३ पत्नीसंयाजान् कृत्वा प्राङ्मुखा उद्गातारोऽतिच्छन्दसा गीतेनाहवनीयमुपतिष्ठन्ते। यत एतद् विराट्छन्दसो रूपं गौः। गोमान् हि लोके विराजति यद्वा गोप्रभवं यदेतत् क्षीरादिकमेतद् विराट् "अन्नं वै विराट्" इति श्रुतेः। अतोऽनेन विधानेनान्नरूपे विराज्येव प्रतितिष्ठन्ति ।

५, ४, ६ वसिष्ठस्य निहव आह्वानं वैश्वदेव्यामृचि भवति, विश्वरूपं बहुरूपं हि पशूनां रूपं तत्तेन वैश्यदेव्याः करणेन पशूनेव जयन्ति। अतः सामगानमिदं सत्रानुष्ठात्रे पशून् प्रयच्छति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

६, ३, ३ अत्रोक्तं द्वादश स्तोत्राण्यग्निष्टोमो द्वादशमासाः सम्वत्सरः। सम्वत्सरं पशवोऽनुप्रजायन्ते तेन पशव्यः अस्य यज्ञस्याग्निष्टोमाख्यस्य करणेन पशुभिः सहैश्वर्यकारको भवति।

एवमेव २, ७, ८; ३, १, ३; ३, ४, ३; ३, ८, २; ३, ११, ४; ३, १२, २; ५, ४, ६, ८; ६, १०, १६; ७, १, १, ४; ७, ७, १, ४; ८, १, ३, ६; ८, १०, १३, ४; १२, ४, २६; १३, ३, १७; १३, ११, १४; १४, ११, ३१; १५, १०, ८; १६, १०, २; १७, ७, १; १८, ४, ३; ६, ९-११; १६, ५; १६, ७; १६, १६, ३; २०, ९, ११; २१, १०, १०; २२, ६; २२, १३, १; २२, १६; २३, १५, १-२; २३, २८, १; २४, ५, १-२; २४, ८; इन्येतान्यत्र प्रसङ्गे द्रष्टव्यानि भवन्ति।

(ग) प्रजाः पशवश्च

२, ३, २ कुलायो नीडं पक्षिणां निवासस्थानं तद्यथा व्यस्ततृणादिनिर्मितम्। एवं कल्यासयुक्ता ऋचः कुलायास्तैस्तद्वती कुलायिनो एतत्संज्ञा, त्रिवृत्स्तोमस्य विष्टुतिरियम्। अत्रोक्तम्—कुलायिन्या विष्टुत्या स्तुवानः प्रजानां पशूनां चाश्रयभूतो भवत्येव, इत्थं विष्टुतिरेषा व्यक्तेरेकस्या विशेषमभिलाषं पूरयितुमुपवर्णिता।

तथा च मूलम् –

"प्रजाकामो वा पशुकामो वा स्तुवीत प्रजा वै कुलानाय पशवः कुलायङ्कुलायमेव भवति।

२, ४, २ पञ्चदशस्तोमस्य तिस्रो विष्टुतयो भवन्ति, तेष्वाद्या "पञ्चपञ्चिनी"। अत्र एकैकस्मिन् पर्याये पञ्चर्यो भवन्ति, अतो ह्येषा विष्टुतिः 'पञ्चपञ्चिनी' इत्युच्यते। अस्या विष्टुत्याः फलं प्रजायाः पशोश्चावाप्तिरिति। अत्र हेतुरुक्तम् —

"पाङ्क्तः पुरुषः पाङ्क्ताः पशवः, तया पुरुषञ्च पशूंश्चाप्नोति।"

अस्यायमाशयो यत् पंक्त्याख्ये छन्दसि पंचसंख्या विद्यते, तस्य पञ्चभिः पदैरुपेतत्वात्। पुरुषेऽपि द्वौ हस्तौ द्वौ पादौ शिरश्चेति पंचसंख्या विद्यते, पशुष्वपि चत्वारः पादाः पुच्छं चेति पंचसंख्यास्ति। अतः संख्याद्वारा पुरुषष्य पशूनां च पंक्तित्वं विद्यते। विष्टुतेरपि पंचसंख्यायोगात् पांक्तत्वमस्ति। तस्मादेतया विष्टुत्या पुरुषं च पशूंश्चाप्नोति यजमानः।

इदं समानः समानं जनयतीति हेतोः साधर्म्यमूलकस्य संवेदनात्मकस्य वा यातोः स्पष्टं निदर्शनम्।

६, ६, ४-५ अत्र हि स्तोत्राणां प्रतिपद् विचारप्रक्रमेणोक्तं यद् यो हि यजमानः प्रजां कामयते तस्मै उद्गाता "जात" शब्दोपेतां त्रिस्तृचं बहिष्पवमानस्तोत्रं पठेत् –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

"उप वै प्रजा तां जातमित्येवाजीजनत्"

अत्र "जात" शब्दप्रयोगो यातुसम्बन्धिनं विशेषार्थं द्योतयति।

८, २, ३; अत्र हि प्रजार्थिनः कृते ब्रह्मसाम्नो विधानं विहितम्—"वशिष्ठस्य जनित्रं प्रजाकामाय ब्रह्मसाम कुर्यात्"

पूर्वं हतपुत्रो वशिष्ठः प्रजात्यर्थमेतत् सामापश्यत्तदेव प्रयुज्य प्रजापशुसमृद्धोऽभूत्, अतः प्रजार्थिभिरेतत् कर्तव्यम्। अत्रापि यातुसम्बन्धी प्रभावः स्पष्टः।

८, ७, १२-१४ यजमानस्य पत्नी गर्भिणी यथा स्यात्तथा च संख्यापनाख्यो विधिरुक्तः। अत्र उद्गाता यजमानस्य पत्नीं "हिंकारं" कृत्वा विलोकयति, तेन सा गर्भिणी जायते। अत्र ह्युद्गातुर्हिंकारसमये पत्न्यवलोकनार्थमध्वर्युः प्रैषं करोति। उद्गाता अत्र प्रजापतिरूपो मन्यते। अध्वर्यवश्च तृतीयास्तोमीयपर्यन्तं हिंकारं प्रति उद्गात्रा संख्यापयन्ति। रेतश्च शरीरेन्द्रियान्तःकरणरूपेण त्रिवृद् भवति। तथा च मूलम्—

उद्गात्रा पत्नीः संख्यापयन्ति रेतोधेयाय (१)
हिंकारं प्रति संख्यापयन्ति हिं कृताद्धि रेतोऽधीयत (२)
आतृतीयाः संख्यापयन्ति त्रिवृद्धि रेतः (३)

दृष्ट्या सृष्टिरिति यातोरपूर्वं निदर्शनमेतत्। एवमेव २, ७, ४; २, १०, ३; २, १६, ३; ८, ५, १५; ८, ८, १५; १२, ४, १५; इमानि स्थलान्यपि विलोकनीयानि।

प्रजाकामार्थम्—४, ८, ३; १३, ३, १५; १६, ३, २; २२, १५, १-२; २२, ६, १-२; २३, ६, १-२; २३, १४, २; २५, १६, ३; द्रष्टव्यानि।

(घ) ऋद्धिः सर्वकामावाप्तिश्च

ज्येष्ठो ज्यैष्ठिनेय स्तुवीत (२)

यो यजमानो भ्रातृणां मध्ये स्वयं ज्येष्ठो भवति सपत्नीनां मध्ये या ज्येष्ठा तस्याः पुत्रश्च भवति स यजमान एतया विष्टुत्या स्तुवीत स्तौति—(सायणाचार्यः)।

एतां विष्टुतिमग्रप्राप्त्यादिफलसाधनतया प्रशंसति —

अग्रादग्रं रोहत्यभिक्रामन्त विष्टुतिरभिक्रान्त्या एवाभिक्रान्तेन हि यज्ञस्यर्ध्नोति तस्मादेतया स्तोतव्यमृध्या एव ॥ ३ ॥

अग्रादग्रमुत्कर्षादूर्ध्वं पुनरप्युत्कर्षं रोहति प्राप्नोति, उत्तरोत्तराभिवृद्धिर्भवति, तस्यैतया विष्टुत्या स्तुवते; तथा इयं विष्टुतिभिरभिक्रामन्ती त्रिषु पर्यायेषु प्रथममध्यमोत्तमानुपूर्व्येणाभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

मुखमाक्रामन्ती उपर्य्युपरि गन्त्री, अत एषा प्रयुज्यमाना यज्ञस्याभिक्रमणायैव उपर्य्युपरि प्राप्तये एव भवति। ततश्च किमित्याह—"यज्ञस्याभिक्रान्तेनाभिक्रमणेनारोहणेन परिसमापनेन ऋध्नोति, यजमानः समृद्धो भवति। यस्मादेवं तस्मादेतया विष्टुत्या स्तोतव्यम्—ऋद्ध्या एव तत्स्तवनं यजमानस्य समृद्ध्या एव भवति" (सायणः)।

इयमूर्ध्वगमनेन हेतुना "उद्यती" विष्टुतिः। "एकस्मा अन्यो यज्ञः कामायाह्रियते सर्वेभ्योऽग्निष्टोमः"।

५, १०, १५-१८ अत्रोक्तं यो हि वर्षाकामः स्यात्, स बहिष्पवमानस्तोत्रं "प्रास्य धारा अक्षरन्" इति त्रिस्तृचा प्रारभेत। अत्र प्रयुक्तो "धारा" शब्दो यातुसम्बन्धिनं महत्त्वपूर्णमर्थं द्योतयति। अत्रैवाग्रे पुनरुक्तं यदुक्तस्य मन्त्रस्य प्रयोगेणोद्गाता दिवो वृष्टिं च्यावयति, तथा—"वृष्णः सुतस्यौजसः" इत्यस्य प्रयोगेणोद्गाता अन्तरिक्षाद् वृष्टिं च्यावयितुं समर्थो भवति। पुनस्तृतीयपादे—"देवां अनुप्रभूषत" इत्यस्य प्रयोगेऽस्मिन् लोके अर्थात् भूर्लोके वृष्टिं प्रतिष्ठापयति। पुनरग्रे "ओजसा वा एतद्वीर्येण" इत्याद्युक्तेदं स्पष्टीकृतं विद्यते, यद् "वृष्णः सुतस्यौजसः" इत्याह। उद्गाता तेनौजसैव-वीर्येण-स्वप्रयोगे सामर्थ्यादस्मै यजमानाय दिवो वृष्टिं प्रयच्छति-इति।

अनेन सन्दर्भेणेदं स्पष्टं यद् विशिष्टानां कालोपयोगिनां छन्दसां गानेनोद्गाता यजमानाय वृष्टिं च्यावयितुं समर्थो भवति। स्पष्टमेवेदं यातुकर्म।

७, १, ११ अत्र बहिष्पवमाने गायत्रसाम्नो विषये कामभेदे निधनान्याह—

"इडां पशुकामाय निधनं कुर्यात्, स्वः स्वर्गकामाय, यशो ब्रह्मवर्चसकामाय, आयुः आमयाविने, हंसि "इत्यभिचरते"॥

अनेनेदमायाति यद् विशिष्टस्यइडादिशब्दस्य निधनरूपेण प्रयोगे कृते विशेषस्याभिलाषस्य पूर्तिर्भवतीति स्पष्टं यातुमाहात्म्यम्।

१२, ४, १६ तृतीयस्य दिवसस्य प्रस्थस्तोत्रस्य प्रसङ्गे साम्नि बहूनां निधनानां प्रयोगे नीरसत्वं संभवति, तत्रोत्तरमुक्तम्—

"यथा मण्डूक आट् करोत्येवं निधनमुपयन्त्ययातयामतायै" लोके वृष्टेरनन्तरं यथा-मण्डूकः—'आट्, आट्' इत्येवं शब्दं स्वरभेदेन विलक्षणमेव करोति; एवं निधनमप्येते विभिन्नं स्वरमेवोपगच्छन्ति, येन रसातिशय उत्पद्यते न तु नीरसत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

१२, ६, ११–१२ चतुर्थदिवसस्य माध्यन्दिनपवमानस्तोत्रे "निधनं कामम्" साम-प्रयोगेण यात्वुद्देश्यं सिध्यति। वाक्, इडा—इत्याद्येकेन निधनप्रयोगेणैकमेव कामं सम्भजते, किन्त्वेतत् साम निधनकामं सर्वेषां कामानां पूर्त्यै जायते। तथा चात्र ब्राह्मणम्—

"एकं वा अन्येन निरुक्तेन निधनेन कामं सनोत्यथैतद् निधनकामं सर्वेषां कामानाम् अवरुध्यै"।

एवमेव ६, १०, १२–१३, १२, ४, १६; १२, १३, १२; १३, ६, ८; १३, ११, १८; १३, १२, ५; १४, ३, २०; १४, ६, ६, ८; १४, १२, ५; १७, १; २०, १, ५; २०, २, २; २०, ११, ११; २२, १, ४; २३, ३, १–४; २४, ४; २५, ४, ३; २५, ६, ४; २५, ५, ३; २५, ७, २; द्रष्टव्यानि भवन्ति।

(ङ) यशोब्रह्मवर्चस्तेजश्च

१, १, ८ वसतीवरीनामिकाभिः अद्भिः सह हविर्धानमंडपे अध्वर्योः प्रवेशानन्तरं तत्रोद्गाता प्रविशत्यथ च मण्डपस्य पूर्वस्मिन् द्वारे तिर्य्यगवस्थितां काशमयीं यष्टिं रराटीति व्यवहृतां स्वकीयेन दक्षिणेन हस्तेन स्पृशन् गायति—

"विष्णोः शिरोसि यशोधा यशो मयि धेहि" इति।

हविर्धानमण्डपो विष्णुदेवतात्मको भवति। अत एव विष्णुत्वेनोपचर्यते, तथा पूर्वस्मिन् द्वारे तिर्यगवस्थिता काशमयी यष्टिर्विष्णोर्ललाटरूपेण गृह्यते। ईदृश्यां भूमिकायामुद्गाता प्रार्थयते —"हे रराटि त्वम् अचेतनापि सती यशोधा असि। विष्णुशिर इत्येवंभूतस्य यश-सोधारयित्री भवति। तस्मात् त्वदीयस्पर्शं कुर्वति मयि उद्गात्रे यशः धारय सम्पादयेति।"

यद्यपीयं प्रार्थनैका, तथापि मया भागोऽयमस्य ब्राह्मणग्रन्थस्य यातुकर्मनिदर्शनरूपेण गृहीतः। यतो हीयं प्रार्थना रराट्या सह यशःसम्बन्धमभिव्यनक्ति। उदगाता नैवं वक्ति पूर्वं यत् त्वं मह्यम् इदमिदं देहीति, किन्तु सः पूर्वं रराट्या यशोनिधित्वं ख्यापयत्यनन्तरं च यशः प्रार्थयते। अनेन कर्मणोद्गातुः प्रार्थना बलवती भवति। रराट्याः स्पर्शमात्रेणोद्गाता यशस्वी भविष्यतीति स्पष्टमेवायं संस्पर्शजो यातुः॥

१, २, ४ हविर्द्धानमण्डपे दक्षिणशकटस्याधस्तात् पश्चिमे भागे द्रोणकलशे सोमोऽवस्था-पितो वर्तते। सोमरसपरिपूर्णं च द्रोणकलशं त्रय उद्गात्रादयः स्वहस्तैरधोदेशे तस्मादक्षात् प्राञ्चं पूर्वदिग्गामिनं कुर्वन्ति गायन्ति च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

"वानस्पत्योसि बार्हस्पत्योसि प्राजापत्योसि प्रजापतेर्मूर्द्धास्यत्यायुपात्रमसीदमहं मां प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्चसाय।"

अत्र द्रोणकलशस्य पूर्वां दिशं प्रति प्रोहणमुद्गातृणामपि प्रोहणाय भवति तथा च कृत्वा ते ब्रह्मवर्चस्विनस्तेजस्विनश्च जायन्ते।

६, ६, ४ अग्निष्टोमे यदा उद्गाता ग्राव्णामुपरि द्रोणकलशाध्यूहनं परस्पराभिमुखं विधत्ते, तदा सः गायति।

"इदमहं मां तेजसि ब्रह्मवर्चसेऽध्यूहामि" इति। अनेन कर्मणा सः सत्यमेव तेजो ब्रह्मवर्चश्च प्राप्नोति।

एवम्—२, ५, २, ४; २, ११, २; २, १७, २; ४, ६, १२; ८, १०, २; ११, १, ७; १३, ३, २२; १५, १०, ६; १६, १६, ६; १६, ६, २; १६, ५, ८; १६, ७, ७; २०, १०, १०; इत्यत्रापि द्रष्टव्यम्।

(च) दीर्घायुष्ट्वं, प्राणाः दीर्घरोगमुक्तिश्च

२, २, २ अत्रोक्तं या हि परिवर्तिन्या विष्टुत्या स्तौति, सः पूर्णस्यायुषो भोगं करोति, नाकाले म्रियते च।

६, १०, ४ यो हि ज्योगामयावी अर्थात् दीर्घरोगी भवेत्तस्य कृते उद्गाता सामवेदस्य (२, १३–१५) इति बहिष्पवमानस्तोत्रान्तर्गतस्य तृचः प्रयोगं कुर्यात्। तेन सः रोगमुक्तो भवति, यतो हि दीर्घरोगिणः प्राणापानावपक्रान्तौ भवतः। प्राणापानयोर्हि साम्ये आरोग्यं भवति। तथा सति यदेषा मैत्रावरुणी प्रतिपद् भवति, तेन प्राणापानादेवास्मिन् आमयाविनि दधाति। मित्रावरुणयोः प्राणापानयोश्च सम्बन्धः श्रुत्यन्तरेषु प्रतिपादितः।

ईदृशान्येवोदाहरणानि निम्नाङ्कितेष्वपि स्थलेषूपलभ्यन्ते—२, १५, ३; ५, ४, १–२; ७, १, १०; ७, ६, १२; ७, ७, ६; ८, १, ८; १२, ११, १६–१७; १३, ११, १२; १६, ३, ५, ६; २३, १६, १२; (कुष्ठरोगः) २४, १६, २;।

(छ) ऊर्जो वीर्यं शक्तिश्च

४, ८, ७ : दशाहस्तोत्रे रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानि—इति षट् पृष्ठानि भवन्ति, तानि च वीर्यरूपाणि भवन्ति। "वीर्यं वै पृष्ठानि" इत्युक्तेः एषां पृष्ठानां प्रयोक्ता वीर्ये प्रतिष्ठितो भवति। इत्थमत्र कृत्ये यातुप्रयोगः स्पष्टः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

५, ५, २ : अत्रोक्तम्—उद्गाता यदा औदुम्बरीम् आसन्दीमारुह्य राजनेन साम्ना उद्गायति तदा यतो ह्युदुम्बरः ऊर्ग् वै, बलकरम् अन्नमेव अतः स ऊर्ज्जमेव साक्षात् प्राप्नोति। अयं सांसर्गिको यातुर्ज्ञेयः।

६, ४, ११–१२, उदुम्बरस काष्ठेन निर्मितं सरसं स्तम्भं यदा सदसो मध्ये समन्त्रकं स्थापयन्ति, तदा तद् स्थापनं प्रजानां जीवनाय तेषामुदरे अन्नं स्थापितं भवति। अत्र रहस्यम्—यत एतत् प्रजापतेः उदरं खलु उदुम्बर इति यत्तत् ऊर्ग् अन्नमेव अत एव मध्यदेशे उदरे एव प्रजननात् अन्नसिद्धयर्थम् अन्नम् ऊर्ज्वं दधाति।

"ऊर्ग्गस्यूर्जादा ऊर्ज्जं मे देह्यूर्ज्जं मे धेह्यन्नं मे देह्यन्नं मे धेहि"।

अत्रदेमवधेयं यदस्मिन्नुदुम्बर्य्युच्छ्रयणकर्मणि उदुम्बरः सरसः आर्द्रः भवेन्न तु शुष्कः। अन्यथा प्रजाः क्षुधिताः भवन्ति। सायणमते मन्त्रेण स्थापनं सरसस्थापनं मन्त्ररहितस्थापनं गतरसस्थापनमिति—

"तस्माद् यत्रैषा यातयामा (गतरसा) क्रियते तत् प्रजा अशनायवो (क्षुधिताः) भवन्ति।"

कर्मेदं सांस्पर्शिकस्य यातोः स्पष्टं निदर्शनम्॥

एवं विधान्युदाहरणानि—१, ६, १५; ६, ४, १३; ८, १, ७; १८, २, ११; २०, १०, १; २२, ३, ३; २४, १७, ३; इत्येतेष्वपि विलोकनीयानि।

(ज) आधिपत्यं, श्रैष्ठ्यं, राज्यम्

६, ६, १–२ : "उपास्मै गायता नर" इति तृचं प्रतिपदं युञ्जन् उद्गाता ग्रामकामाय यजमानाय ग्राममेव "उपाकः" उपायनीयः कृतवान् भवति। ग्राममेवावाप्नोति "नरो वै देवानां ग्रामो ग्राममेवास्मा उपाकः" ग्रामलाभे हेतुरस्ति–नरः मनुष्याः खलु देवानां ग्रामः। नरः पदेनात्र यजमानस्य नरः ऋत्विजः उच्यन्ते। ग्राम इति निवासाश्रयः। अतः देवानां यागनिष्पादनद्वारा ग्रामः अवाप्यते—ग्रामस्य नायकत्वमवाप्यते।

६, ६, १०–१२ श्रैष्ठयकामाय "पवस्व व्वाचो अग्रिय" इत्यादि बहिष्पवमानस्य तृचं प्रतिपदं कुर्यात्। यतः पवस्व व्वाचो "अग्रिय" इति भागे अग्रिय इति पदमस्ति। अतस्तत् प्रयोगेण एतं यजमानम् अग्रं पुरोभागः स श्रीरेव खलु। बहूनां मध्ये यस्य वाक् प्रथमं प्रवृत्ता भवति, स शोभते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अत्र सुस्पष्टम् "अग्रिय" शब्दमाहात्म्याद् यजमानाय श्रेष्ठतोक्ता। तेनेदं यातोः परिस्फुटमुदाहरणम्।

१३, ६, २२–२३ : अत्रोक्तं माध्यन्दिनपवमानस्तोत्रे वरुणसाम्ना तुष्टुवानः राज्यम् आधिपत्यं गच्छति यशस्वी च भवति।

"एतेन वै वरुणो राज्यमाधिपत्यमगच्छद् यशो भवद् राज्यमाधिपत्यं गच्छति यशो भवति वरुणसाम्ना तुष्टुवानः"।

एवम् २, १६, ४ इत्यत्र पुरोहितत्वम्, १३, ६, २३, १७, १०, ३; इत्यत्र ग्रामाधिपत्यम्, १६, १; १६, १२, ५; १६, १३, १; २१, ५, २; इत्यत्र राज्यम् २५, ७, ३, २५, ११, २ इत्यत्र स्वाराज्यम्–विलोकनीयम्।

शान्तिकर्माणि

(क) पापान्निवृत्तिः दुर्दैवादीनां निवारणञ्च

६, ७, १५ ब्राह्मणाऽनुसृताः पञ्चर्त्विजस्त्रय उद्गातारश्चाध्वर्युणा नीयमानाः परस्परं सङ्गताः बहिष्पवमानानुष्ठानस्थलं यदा प्रसर्पन्ति, तदा प्रतिहर्त्ता यद्यवच्छिद्यतेऽन्वारम्भणतस्तर्हि यजमानः पशुभिर्विरहितः सञ्जायते, यतो हि प्रतिहर्त्ताऽत्रान्वारम्भणे पशुरूपो भवति। अस्य प्रायश्चित्यर्थं यजमानः देयं सर्वमपि धनं दद्यात्। अन्यथा यजमानस्य सर्वपुत्रपशुधनादिरूपा हानिर्जायते—इत्यत्रोक्तम्।

इदं निषेधात्मकस्य यातोर्निदर्शनम्।

७, १, ६ अत्रोक्तं बहिष्पवमाने गायत्रसाममध्ये निश्वासं न कुर्यात्। अन्यथा कृते प्राणच्छेदो जायते पूर्णायुषः प्राप्तिर्न भवतीति।

"प्राणो गायत्र्यन्न व्यवान्यात् प्राणस्याविच्छेदाय यदि व्यवानिति प्रमायुको भवति। यदि न व्यवानिति सर्वमायुरेति"।

अत्र सायणाचार्येणोक्तं गायत्रे सामनि नव स्तोत्रीयाः। प्राणाश्च सप्तशीर्षण्या द्वाववाञ्चाविति। तत्र डब्लू० कालॅण्ड महाशयः १६, १४, ५; ६, २, १, २४, ६, ४, २, ५, इत्यादि निर्देशन् कथयति गायत्रं प्राण इति।

इदमप्यभावात्मकस्य यातोर्निदर्शनम्।

१७, ५, ३ "योऽपूत इव स्यादग्निष्टुता यजेताग्निनैवास्य पाप्मानमपहत्य त्रिवृता तेजो ब्रह्मवर्चसं दधाति।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यो यजमानः ब्रह्महत्यादिदोषाशङ्कितो भवेत्, सोऽग्निष्टुता त्रिवृत् स्तोमकेनानेन यजेत। तथा चायं कृत्स्नयज्ञभाजा अग्निना निष्पापो भूत्वा ब्रह्मवर्चसी तेजस्वी च जायते।

निवृत्ति परकोऽयं यातुः। एवमेव १७, ५, ४–७ इत्यत्रापि द्रष्टव्यम् तथा निम्नाङ्कितान्यपि द्रष्टव्यानि भवन्ति। २, १७, ४ (अश्लीला वाक्) ७, ७, १५ (दृष्टिशक्ति विरहितो न भवेत्) १२, ३, १३; ११, १०, २२; १२, १३, २३; १३, ६, १०; १४, १२, ७; १५, ५, २०; १७, १, ६; १६, ४; २०, १३, ५; ।

(ख) शत्रोः प्रतिकूलानि कृत्यानि

२, ६, २; अत्रोक्तं यस्य यजमानस्य शत्रवः स्युः सः सप्तदशस्तोमस्य सप्तास्थितया विष्टुत्या स्तुवीत।

"भ्रातृव्यवांस्तुवीत यथा सप्तास्थितेन सत्येन समीकरोत्येवं पाप्मानं भ्रातृव्यं प्ररुजति"।

अत्र सायणाचार्यः व्याख्यानं करोति—यथा लोके सप्तास्थितेन सप्तभिरनडुद्भिः सप्तभिस्तीक्ष्णभागैः शङ्कुभिर्वा अधिष्ठितेन मत्येन मत्यन्नाम कृष्टस्य क्षेत्रस्य समीकरणादिसाधनफलकं तेन समीकरोति, समीकरणार्थं कर्षकः प्रव्रजति क्षेत्रम्, एवं पाप्मानं भ्रातृव्यं शत्रुं अनया प्रथमतः सप्तसंख्यया विष्टुत्या स्तुवानः प्ररुजति प्रभुनक्ति।

विष्टुत्याऽत्र यजमानस्य विशेषोद्देश्यपूर्त्तिर्जायते।

२, १०, ५, अत्रोक्तं यो हि यजमानः शत्रुकृतेनाभिचारेण पीडितः स्यात्। सः सप्तदशस्तोत्रस्य सप्तास्थितया विष्टुत्या स्तावयेत्। एवमनुष्ठानेन सः प्रजापतेरेव मध्यदेशे प्रविशति तेन च हेतुना हिंसितो न भवति।

अत्रावधेयं वस्तु—सप्तदशस्तोमे सप्तदशत्वम्, द्वादशमासाः पञ्चर्तवश्च। अनयोः समासेन संवत्सरस्यैव प्रजापतित्वमैतरेयके स्वीकारात् प्रजापतावपि सप्तदशत्वम्—इत्थं समानसंख्याकयोर्द्वयोः संयोगे दोषस्य निराकरणं यातुरहस्यमुद्घाटयति। ईदृशीभिरनेकाभिर्विष्टुतिभिरनेकेषां दोषाणां वारणमिष्टप्राप्तिश्चानेकत्रात्र ब्राह्मणे दृश्यते।

६, ६, २–३ अग्निष्टोमे उद्गाता द्रोणकलशं ग्राव्णामुपरि अध्यूहति। एतस्मिन् प्रसङ्गे यजमानस्य पापं कामयमानः उद्गाता द्रोणकलशं ग्राव्णो विमुखान् करोति, भद्रं कामयमानश्च सम्मुखान् करोति। सर्वमेतद् यजमानस्य नामगोत्रोच्चारणपूर्वकं क्रियते यच्च यातोः स्पष्टं निदर्शनमुपस्थापयति। अत्र मन्त्रयोरुभयोः शब्दानां प्रयोगो विशेषेणावधेयः —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

"यं द्विष्याद् विमुखान् ग्राव्णः कृत्वेदमहम् अमुम्, अमुष्यायणम्, अमुष्याः पुत्रम्, अमुष्या व्विशोऽमुष्मादन्नाद्यात् निरुहामीति निरूहेद् विश एवैनमन्नाद्यन्निरूहति।"

"योऽस्मप्रियः स्यात् सम्मुखान् ग्राव्णः कृत्वा—इदम् अहम् अमुष्यायणम् अमुष्याः पुत्रम् अमुष्यां व्विश्यम् अमुष्मिन् अन्नाद्ये अध्यूहामिइत्यध्यूहेत्।"

अत्र द्रोणकलशो द्वेष्यस्य प्रियस्य च प्रतीकः ग्रावा च व्विशस्यान्नाद्यस्य च प्रतीको भवति। इत्थं प्रतीकात्मकमिदं यातुकर्म।

६, ६, १० अत्रोक्तं यं यजमानम् उद्गाता द्विष्यात्तस्य कृते कृष्णवर्णस्य पवित्रे कुर्यात्, तथा यश्च यजमानः उद्गातुः प्रियः स्यात् तस्य कृते शुक्लवर्णं पवित्रं कुर्यात्। कृष्णो वर्णः पाप्मनः शुक्लो वर्णश्च तेजसः प्रतीकः। इत्थमत्र भिन्नवर्णप्रयोगः रहस्यात्मकं यातुकर्मणः प्रभावं प्रकटयति।

६, १०, ६-७ "अपघ्नन्पवते मृधोपसोमो अराव्ण" इत्याद्याः सामवेदस्य (२, ५६३-५६५) तृचः यदा बहिष्पवमानस्तोत्रस्यारम्भ एवोद्गायन्त्युद्गातारस्तदा यजमानस्य मिथ्याभिशंसकाः शत्रवो नश्यन्ति।

८, १, १-२ अत्रोक्तम्—अभिचारार्थं ब्रह्मसामवषट्कार निधनं कुर्यात्, तथा माध्यन्दिने पवमाने अभिनिधनं कुर्यात्तेन हि "अभि" वषट् इत्यनयोर्महिम्ना शत्रुमभिलक्ष्य बाणप्रयोग इवास्य प्रभावो भवति येन शत्रुम्प्रत्यभिचारः सिद्ध्यति। अत्र वषट् इत्यस्य विषये उक्तम् देवसम्बन्धी बाण—इति तथा अस्य प्रयोगस्य कर्त्ता वज्रं प्रहृत्य यथेन्द्रोवृत्रं जघान तथैव शत्रुं नाशयति।

"देवेषुर्व्वा एषा यद् वषट्कारो, अभीति वा इन्द्रो व्वृत्राय वज्रं प्राहरदभीत्येवास्मै व्वज्रं प्रहृत्य देवेष्वावषट्कारेण व्विध्यति" ८, २, ७-८ अत्र भ्रातृव्यवते यजमानाय ब्रह्मसाम्नः प्रयोगो विहितः "अभीवर्तं भ्रातृव्यवते ब्रह्मसाम कुर्यात्" अस्य फलमाह—

"अभीवर्तेन वै देवा असुरानभ्यवर्तन्त यदभीवर्त्तो ब्रह्मसाम भवति भ्रातृव्यस्याभिवृत्यै"।

एवमेव २, १३, २; ६, ४, १०; ६, ६, ५; १२, ३, १४; १६, १६, २; २०, ८, १; इत्याद्यपि द्रष्टव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

षड्विंशब्राह्मणम्

(१) भूतिकृत्यानि

(क) अन्नं धनानि पशवश्च

१, २, ८ सुब्रह्मण्यपुरोधाः सुब्रह्मण्यापाठानन्तरं मन्त्राणां प्रशंसनाय यजमानं वाचयति। यजमानश्च चतुर्णां पादानां पाठानन्तरं वदति—

"परोरजास्ते पञ्चमः पादः" इति।

अनन्तरञ्च प्रार्थयते "सा न इषमूर्जं धुक्ष्वेत्याहेषमेवास्मा ऊर्जं दुग्धे, वीर्यमन्नाद्यं वेहीत्याह वीर्यमेवास्मा अन्नाद्यं दधाति" इत्थमत्र सुब्रह्मण्यामन्त्रप्रभावेणाभीष्टपूर्तिः स्पष्टा।

१, ५, ४ इन्द्रः विश्वामित्राय "उक्थं" वशिष्ठाय च "ब्रह्म" साम उवाच। तत्र उक्थमिति वाक् ब्रह्मेति मनः। तथा चोक्तं वाङ्मनस्योर्वेदिचारं वा वशिष्ठगोत्रोत्पन्नं वा त्रैविधं वा ब्रह्माणं कुर्वीत। एतस्य फलञ्चात्र सुष्ठु प्रतिपादितं वर्त्तते—

"तद् यथोभयवर्तनिना रथेन यां यां दिशं प्रार्थयते तां तामभिप्राप्नोत्येवमेतेनोभयवर्तनिना यज्ञेन यं कामं कामयते तमभ्यश्नुते" इति।

१, ६, २० : शोभनोऽयं प्रसङ्गस्तथा च प्रवृत्ते प्रायश्चित्ते यदि नाम मृण्मयं पात्रं भिद्येत चेत्तर्हि ब्रूयात् "भूमिर्भूमिमगात्" इति। अनन्तरञ्च शोभना प्रार्थना विद्यते—भूयाम पुत्रैः पशुभिर्योऽस्मान् द्वेष्टि स भिद्यतामिति। एतेन हि आत्मानं च यजमानं च स्वेन रसेन समर्धयति।

२, १, २३, अत्र बहिष्पवमानस्तोत्रस्य स्तोत्रीयमन्त्रप्रसङ्गेनोक्तं यो हि पञ्चमीं (ऋग्वेदे ६, ६४, २६, सामवेदे २, ५) निनर्दन्निव गायति सः बहुतमात् पुरुषात् अन्नम् अत्ति। बहुवर्षपर्यन्तम् अन्नभोजी भवति।

"पञ्चमी गायति तां निनर्दन्निव गायति। आ ह बहुतमात् पुरुषादन्नमत्त्यन्नादो भवति य एवं वेद"।

अत्र सायणाचार्यः—एवं वेद अर्थाद् य एवं वेद सोऽपि।

३, ७, ५-६ द्वादशाहकृत्ये तृतीयत्रिरात्रस्य प्रातः सवनीयाः मन्त्राः जगत्यां छन्दसि वर्त्तन्ते यस्यान्तः 'इडा' शब्देन भवति। इडाश्च पशवः उक्ताः। जगतीछन्दोऽपि पशुना सम्बद्धम्। तथा च जगत्या यजमानः पशूनाप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

"पशवो वा इडा पशवो जगती जागताः पशवः पशूनेवाप्नोति"।

४, ४, ६ यज्ञीयस्य यूपस्य निर्माणार्थं विभिन्नाभिः कामनाभिः विभिन्नानां काष्ठानामुपयोगविषयेऽत्रोक्तम्—

"पालाशं पुष्टिकामस्य, बैल्वं ब्रह्मवर्चसकामस्य, औदुम्बरम् अन्नाद्यकामस्य, खादिरं बलकामस्य, वैभीतकराजवृक्षौ भ्रातृव्यवतः, क्रमुकाश्वत्थपाषाणा यशस्कामस्य यत्किञ्च यज्ञीयं पशुकामस्य"।

एवमेव भूत्यै १, ४, १३ सर्वकामतृप्त्यै १, ६, १६, २, ११, ३१, ३, ७, १०, अन्नाय २, २, ५, स्वर्गसन्ततिपशूनाञ्च कृते २, ७, ६ धनाय ३, १, १५ प्रजा पश्वन्नाद्यर्थञ्च ४, ७, ३ द्रष्टव्यानि।

(ख) यशः प्रजाश्च

२, ३, १३ : अभीष्टावाप्तयेऽत्र विधिर्वर्णितः। उद्गाता यदि यजमानाय यशः प्रजाश्चेच्छेद् यथादिष्टं तर्हि सः होतुः आज्यप्रशंसनेन सह धुरः गायत्र्याद्याः गायेत्। एवमनुष्ठानेन यजमानः यथादिष्टं प्रजाः प्राप्नोति। "यः कामयेतैकधा यजमानं यश ऋच्छेद् यथादिष्टं प्रजाः स्युरिति होतुराज्ये गायेदेकधा यजमानं यश ऋच्छति यथादिष्टं प्रजाः भवन्ति"।

२, १०, १५ अत्रोक्तं यज्ञस्थानात् पश्चिमे भागे परस्य यज्ञस्य कृते स्थानं रक्षति चेद् यजमानस्तर्हि तस्यावरपुरुषाः भाविन्यः प्रजाः तस्माद् यजमानाच्छ्रेयांसो भवन्ति। एवं २, ३, १४ इत्यत्रापि।

(ग) ब्रह्मवर्चः, तेजः, बलम्, यशश्च

३, ७, १६ अत्रोक्तं ब्रह्मवर्चसकामः द्वादशाहकृत्यान्ते सूर्यदैवत्यं पशुम् आलभेत—इति। "सौर्यं ब्रह्मवर्चसकाम आलभेत"।

४, ४, ६ पूर्वत्राप्युल्लिखितं "बैल्वं ब्रह्मवर्चसकामस्येत्यादि।

(२) शान्तिकर्माणि

(क) अरिष्टवारणं मृत्युनाशश्च

२, १०, १३ अत्रोक्तं यज्ञस्थानात् पूर्वस्मिन् भागे साम्यानि पातनाम्यन्तरेऽन्यस्य यज्ञस्य कृते स्थानं न अवशेष्येत्, अन्यथा यजमानस्य अवरपुरुषाः तस्माद् यजमानान्निकृष्टा भवन्ति"।

"अवरपुरुषा ह्यस्मात् पापीयांसो भवन्ति" इदं निषेधात्मकस्य यातोरुदाहरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

४, १, ७ अत्रोक्तं यजमानस्याज्यं यदा स्कन्दति तदा तस्य यजमास्याहुतिः स्कन्ना इत्युच्यते। यजमानश्च मरणशीलो भवति। अस्य प्रायश्चित्तये पुरोधसे गोरूपां दक्षिणां दद्यादिति–

इदमपि निषेधात्मकस्य यातोरुदाहरणम्।

एवं ४, १, ८, इत्यत्रापि द्रष्टव्यम्।

(ख) ५. ३, २–३ गृहस्थस्य कदाचित् किमपि हेतुविशेषं विनैव यानच्छत्रशय्यासनगृहैकदेशभङ्गादिरूपा अद्भुताः हानयो संभवन्ति। अत्र च कासाञ्चिदासां परिगणनं विधाय पुनश्च तासां वारणायोपायः प्रदर्शितः, अरिष्टभङ्गाय कृतस्य यातुकर्मण इदं सम्यगुदाहरणम्।

"अथ यदास्य मणिमणिकक्रुम्भ-स्थाली दरणमायासो राजकुलविवादो वा यानच्छत्र-शय्या-आसन-आवसथ-ध्वज-पताका-गृहैकदेशप्रभञ्जनेषु गजवाजिमुख्या वा प्रमीयाः प्रमीयन्त इत्येवमादीनि तान्येतानि सर्वाणि इन्द्रदेवत्यानि अद्भुतानि प्रायश्चित्तानि भवन्ति"।

वारणार्थमुपायः

इन्द्रायेन्द्रो मरुत्वत (ऋग्वेद ६, ६४, २२) इति स्थालीपाकं हुत्वा पञ्चभिराज्याहुतीरभिजुहोतीन्द्राय स्वाहा शचीपतये स्वाहा वज्रपाणये स्वाहेश्वराय स्वाहा सर्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत्। साम० (१, ४७२)

५, ४, २–३ अत्रापि पूर्वं संभवारिष्टोल्लेखस्तदनु च तेषामरिष्टानां वारणाय यत्न उक्तः।

अथ यदास्य प्रजायां पशुषु शरीरे वा अरिष्टानि प्रादुर्भवन्ति व्याधयो वा अनेकविधाः, अतिस्वप्नम्, अस्वप्नम्, अतिभोजनम्, अभोजनम्. आलस्यम्, व्रणम्, अजीर्णं निद्रैवमादीनि तानि एतानि सर्वाणि यमदेवत्यानि अद्भुतानि प्रायश्चित्तानि भवन्ति।

एतदर्थमुपायः —नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्-(ऋक्० १०, १२३, ६) इति मन्त्रेण स्थालीपाकं कृत्वा दक्षिणाभिमुखो भूत्वा (१) यमाय स्वाहा (२) प्रेताधिपतये स्वाहा (३) दण्डपाणये स्वाहा (४) ईश्वराय स्वाहा (५) सर्वपापशमनाय स्वाहा इति पञ्च व्याहृतिभिः आज्याहुतीर्जुहुयादिति। अनन्तरं च साम गायेत्। साम (१, ३२०)।

एवमेव वरुण-कुबेर-अग्नि-वायु-सोम-विष्णु-रुद्र-सूर्यदैवत्यानि अरिष्टानि भवन्ति तेषां वारणार्थं तत्तद्दिङ्मुखो भूत्वोपायं कुर्यात्। अन्ते च होमं कृत्वा ब्राह्मणान् भोजयेत्तेभ्यो दक्षिणाञ्च दद्याद् इत्युक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

(१) क्षेत्रगृहसंस्थेषु धान्येष्वीतयः प्रादुर्भवन्तीतयो वानेकविधा आखु-पतङ्ग-पिपीलक-मध्वक-भौमक-शुक-शरभक-सौक्ष्मक इत्येवमादीनि सर्वाणि वरुणदेवत्यानि सन्ति।

(२) कनक-रजत-वरवस्त्र-वज्र-वैडुर्य-विमुक्ता-मणिवियोगो भवत्यारम्भा वा विपद्यन्ते अथवा अन्यानि क्रूराणि, मित्राणि वा विरज्यन्ते, अरिष्टानि वा वयांसि गृहम् अध्यासन्ते, वाल्मीकभौमानि वा जायन्ते, छत्राकं वोपजायते, मधूनि वा निलीयन्ते, इत्येवमादीनि वैश्रवण-देवत्यानि सन्ति।

(३) अथ यदास्य पृथिवी तटति, स्फुटति, कूजति कम्पति, ज्वलति, रुदति, धूमायत्यकस्मात् सलिलमुद्‌गिरति प्लवन्निमज्जति, निमग्नमुत्प्लवत्यकाले च पुष्पफलमभिनिवर्ततीत्यश्वतरीगर्भो जायते, यदा मज्जति हस्तिनी भूकम्पो जायते, प्रासादं भिनत्ति यत्र तत्र राजा विनश्यति गौर्गृहमारोहेद् ग्राममहिषीत्येवमादीनि सर्वाण्यग्निदेवत्यानि सन्ति।

(४) अथ यदास्य विवाता वाता वायन्तेऽभ्रेषु चापरूपाणि दृश्यन्ते खर-करभ-मन्थ-कङ्क-कपोत-उलूक-काक-गृध्र-श्येन-भास-वायस-गोमायुसंस्थान्युपरि पांसु-मांसपेश्यस्थिरुधिरवर्षाणि प्रवर्त्तन्ते काकमिथुनानि दृश्यन्ते रात्रौ मणिधनुं पश्येत्, शशकाः ग्रामं प्रविशन्ति, वृक्षाः स्रवन्ति रुधिराणि, आकाशे राजकुलं वसतीत्येवमादीनि सर्वाणि वायुदेवत्यानि सन्ति।

(५) अथ यदास्य तारावर्षाणि चोल्काः पतन्ति निपतन्ति धूमायन्ति दिशो दह्यन्ति-केतवश्चोत्तिष्ठन्ति, गवां शृङ्गेषु धूमो जायते, गवां स्तनेषु रुधिरं स्रवत्यत्यर्थं हिमं निपततीत्येवमादीनि सर्वाणि सोमदेवत्यानि सन्ति।

(६) अथ यदास्यायुक्तानि यानानि प्रवर्तन्ते देवतायतनानि कम्पन्ते, दैवतप्रतिमा हसन्ति रुदन्ति गायन्ति नृत्यन्ति स्फुटन्ति स्विद्यन्ति उन्मीलन्ति निमीलन्ति प्रतिप्रयान्ति नद्यः, कबन्धमादित्ये दृश्यते, विजले च परिविष्यते केतुपताकच्छत्रवज्रविषाणानि प्रज्वलन्ति। अश्वानां च वालधीष्वङ्गाराः क्षरन्ति, अहतानि मर्माणि कनिक्रदत इत्येवमादीनि सर्वाणि विष्णुदेवत्यानि भवन्ति।

(७) अथ यदास्य गवां मानुष-महिष्यजाश्वोष्ट्राः प्रसूयन्ते हीनाङ्गानि, अतिरिक्ताङ्गानि विकृतरूपाणि वा जायन्तेऽसंभवानि संभवन्त्यचलानि चलन्तीत्येवमादीनि सर्वाणि रुद्रदेवत्यानि सन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(८) अथ यदास्य मानुषाणामतिधृतिमतिदुखं वा पर्वताः स्फुटन्ति निपतन्त्याकाशाद् भूमिः कम्पते महाद्रुमा उन्मूलन्त्यश्मानः प्लवन्ति तटाकानि प्रज्वलन्ति चतुष्पादं पञ्चपादं भवतीत्येवमादीनि सर्वाणि सूर्यदेवत्यानि भवन्ति।

(ग) शत्रोरुन्मूलनम्

१, ४, ७-६ उपवादे यदोद्गातारं प्रति प्रश्नो भवति उद्गातः किं स्तुतं त्वयेत्यादि तदा सः उत्तरं ददाति, अकार्षमहं तद् यन्मम कर्म, अगासिषम् अहं यन्मया गेयम् आसीत्। इत्युत्तरानन्तरं तं चेद् ब्रूयुः —

"तमो वै त्वम् अगासीः, न ज्योतिरिति"—(तदा) स ब्रूयात्" ज्योतिस्तेन येन ज्योतिर्ज्योतिंस्तेन येनग्ज्योतिस्तेन येन गायत्री ज्योतिस्तेन येन छन्दो ज्योतिस्तेन येन सामज्योतिस्तेन येन देवताज्योतिरेवाहमगासिषं न तमो युष्मांस्तु पाप्मना तमसा विध्यानीत्याह पाप्मनैवैनांस्तत्तमसा विध्यति।" प्रसङ्गेनानेन द्वेषिणम्प्रति यातुकर्मणः प्रभावः स्पष्टः।

३, २, १-२ अभिचारार्थं द्वाभ्यां विष्टुतिभ्यां स्तुवीत त्रिवृत् स्तोमस्य। विष्टुतिश्च-इषुः-इत्याख्यया प्रसिद्धा। विष्टुतेः स्वरूपं त्विदम्, उद्गाता प्रथमम् एकां ऋचं गातुं हिंकारं कुर्यात् पुनः तिस्रः ऋचो गातुं हिंकुर्यात् ततः पञ्च ऋचोगातुं हिंकुर्यात्। इत्थं नवानां ऋचां गानमेका विष्टुतिः। एवमानुलोम्येन त्रिः गानं त्रिवृदित्युच्यते। अत्र हि प्रथमा ऋक् इषुधारास्थानीया भवति पुनस्तिस्रः इषुः, धनुः, ज्या स्थानीया भवन्ति, अनन्तरं पञ्चभिः बाणानां विसर्जनमिव भवति। इत्थमत्राभिचारकर्मणि विष्टुतेः प्रयोगः धनुषा बाणेन च लक्ष्यवेधसाम्यं भजते। तेन हि सपत्ननाशः संजायते स्तोता च वसीयान् बहुधनसम्पन्नो भवति।

> अनीकं प्रथमेषुर्धनुर्ज्या यत्तिस्रः संदधाति ज्येव पञ्चभिः सृजते
> स्तृणुते भ्रातृव्यं वसीयानात्मना भवति य एतया स्तुते।

सर्वाणीमानि सविस्तरं वर्णितानि यातुकर्मणः कानिचिदुदाहरणानि ज्ञेयानि, परत्र चास्मिन् षड्विंशे ब्राह्मणे २, १०, २४ इत्यत्रोक्तम् "यथा श्मशानकरणं तथाभिचरणीयानां देवयजनम्" एतेनाभिचारकर्तुः कृते स्थाननिर्देशो विहितः, कीदृशे स्थले समुपविश्य सः स्वीयमनुष्ठानं कुर्यादिति। तथा चास्य स्पष्टमेवार्थो यत्तत्रोपवेशनेन सपत्नस्य मृत्युना नाशोऽनुष्ठानातिरिक्तं स्थानमपि सहायकं भविष्यति। इदं सांसर्गिकस्य यातोर्निदर्शनम्।

३, ८, १३ शत्रोः पशूनां क्षयः स्यादिति कामयेत चेत्तर्हि बृहत्, रथन्तरम्, वैरूपम्, वैराजं, शाकम्, रैवतम्, इति षट्सु पृष्ठसामसु मध्ये होता बृहत् पृष्ठं, साम कुर्याद् ब्रह्मा च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

रथन्तरम् । कार्यकारणाभावादिमे सामनी बलपशुरूपे स्तः । ततश्चैवमनुष्ठेयशत्रोः पशुसंक्षयो जायते ।

"यं कामयेत जीयेतेति तस्य बृहत्पृष्ठं कुर्याद् रथन्तरं ब्रह्म साम क्षत्रं वै बृहत् पशवो रथन्तरं । क्षत्रेणैवास्य पशून् हन्त्यपशुर्भवति जीयते ।"

सायणाचार्योऽत्र जीयते इत्यस्य स्थाने क्षीयते इति पाठं मत्वा क्षयमाप्नोतीत्यर्थं कृतवान् ।

३-८, १४ यो हि यजमानः कामयेत तस्य सपत्नोऽतिदूरं गच्छेदाश्रयं च न लभेत इति सः श्येनयागे माध्यन्दिने पवमाने रथन्तरं बृहत्पृष्ठं च कृत्वा ब्रह्मसाम प्लवं कुर्यादिति । ततश्च बृहद्रथन्तराभ्यां सपत्नः स्वर्गलोकात् भूलोकाच्च च्युतो भूत्वा प्लवेन प्रप्लावितो भूत्वा दूरं गच्छति प्रतिष्ठां च न लभते ।

"यं कामयेत परां परावतमियान्न प्रतितिष्ठेदिति पवमाने रथन्तरं कुर्याद् बृहत्पृष्ठं प्लवं ब्रह्मसाम बृहद्रथन्तराभ्यामेवैनमेभ्यो लोकेभ्य उद्धृत्य प्लवेन प्रप्लावयति परां परावतमेति न प्रतितिष्ठति ।"

३, ८ २०-२२ श्येनयागे शत्रुनाशाय शरमयं बर्हिर्भवति वैभीतकश्च इध्मः तथा ऋत्विजः लोहितोष्णीषाः लोहितवाससश्च प्रचरन्ति इत्युक्तम् ।

"शरमयं बर्हिः शीर्त्यै" "वैभीतक इध्मो विभित्त्यै"

"लोहितोष्णीषा लोहितवाससो निवीत ऋत्विजः प्रचरन्ति स्तुत्यै"

सर्वमेतद् यातूद्देश्यं साधयितुं साहाय्यं सम्पादयति—इति विशेषेणावधेयमत्र ।

३, १०, २-४ अत्रोक्तं जिघांसुर्यजमानः संदंशयागं कुर्यात् । अत्र च यागे द्वौ द्वौ स्तोमौ सहैव विहितौ संदंशसाम्यं भजतः । लोके यथा संतप्तायःपिंडादिसंदंशेन "संडसी" इति लोकभाषया प्रसिद्धेन यन्त्रेण गृह्यते तथैवात्रापि यागेनानेन शत्रोर्दंशः क्रियते सुस्पष्टमत्र यातुकर्म-माहात्म्यम् ।

४, ४, ६ अत्र हि भ्रातृव्यवतो यूपार्थं वैभीतकराजवृक्षावुदितौ । यूपेऽयं विशेषो यातू-द्देश्येनेति स्पष्टम् ।

एवमेव—३, ३, १-३, ६, २; ३, ८, १-३; ३, ८, ६, ९, ११; ३, ९, २-३; ३, १०, ५ (शत्रोः पशुक्षयाय) ३, १०, ७, ८, ९; ३, ११, १, ३, ५, ७, ४, ४, २; ५, २, २ द्रष्टव्यानि भवन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(घ) राक्षसाः पिशाचाश्च

१, २, ८; सुब्रह्मण्यो नाम ऋत्विक् सुब्रह्मण्यां गायति। तदनन्तरं च यजमाने वाचनीयं भवति सासि सुब्रह्मण्ये तस्यास्ते पृथिवीपाद इत्याह यान्येव पृथिव्यामसुररक्षांसि तान्येव तेनापहते० इत्यादि एतेन दिवि भुवि चान्तरिक्षे यान्यसुररक्षांसि यज्ञविघ्नकारकाणि भवन्ति तेषां समेषां नाशो जायते।

अत्र ३, १, ६–१५ अपि द्रष्टव्यम्।

३—सामविधानब्राह्मणम्

यतो हि ब्राह्मणस्यास्य यातुसम्बन्धिनो विषयाः नान्येभ्यो वेदेभ्यो भिन्नाः अतो मयाऽत्राल्पीयांस्येवोदाहरणान्युद्धृतानि।

पुष्टिकर्माणि

(अ) अन्नाद्यम्

२, ३, ५-६ अत्रोक्तं श्वेतपुष्पमर्कवृक्षं गृहीत्वा तस्मात् त्रिवृतं मणिं=रक्षाकरंडं निर्माय तस्मिन्नेव दिनेऽग्निं प्रतिष्ठाप्य पाकयज्ञविधानेन तत्र "स्वाशिरामर्केण" इति मन्त्रेण शतकृत्वः सहस्रकृत्वो वाऽऽहुतीर्हुत्वा तं मणिं=रक्षाकरण्डं कण्ठेन शिरसा वा धारयन् बह्वन्नो भवति।

"दीर्घतमसोऽर्कोऽर्कशिरोऽर्कग्रीवा इति चैतानि प्रयुञ्जानः सर्वत्रान्नं लभते"।

(आ) राजकर्माणि

३, ७, २ यः पुरोहितो यं राजानम् इच्छेदयं राजा भूमण्डलस्यैक एव राजा भवेत् अस्य मण्डलञ्च केनापि वैरिणा न प्रतिहतं भवेत् तर्हि सः पुरोहितस्तं राजानम् "एकवृषेण" इति साम्ना अभिषिञ्चेत्। इत्यत्रोक्तम्।

३, ६, १ अत्रोक्तं योद्धुमिच्छतो राज्ञो जयार्थं पुरोहितः शतावरं सहस्रकृत्वः "सोमं राजानं वरुणमित्येतेन मन्त्रेण महाव्याहृतिपर्यन्तम् आज्यतन्त्रेण हुत्वा "यो राजा–चर्षणीनाम्" इत्याद्यस्य साम्नः पूर्वभागेन सम्पातेन राजानं जलं पाययेत् तथा ये तत्र मुख्याः पुरुषाः स्युस्ताnुत्तरेणाभिषिञ्चेदिति।

प्रकीर्णकानि

(१)

२, २, १० अत्रोक्तम्—"तुचे तुनाय तत्सु न" इत्येतेन साम्ना अभिमन्त्र्य अन्वहं प्राश्नीयात्। एवमनुष्ठानेन दीर्घायुर्भवति इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२, २, ११ इत्यपि दीर्घायुष्ट्वार्थम् तथा २, ८, २, ३, ४ कुमारस्य दीर्घायुष्ट्वार्थं द्रष्टव्यम्।

(२)

३, १, ८-१३ "गौरान् सर्षपानग्नौ जुहुयाद् "वीडाविन्द्रयत्स्थिर इत्येतेन हिरण्यं लभते"। (८)

"व्रीहियवानग्नौ जुहुयात्" सुनीथो घास मर्त्य "इत्येतेन धान्यं लभते"। (६)

"व्रीहियवौ सर्पिर्मधुमिश्रावास्ये वधाय स पूर्व्यो महीनामित्ये—तन्मनसानुद्रुत्यान्ते स्वाहाकारेण निगरेदेवं सदा प्रयुञ्जानः सहस्रं लभते" (१०)। एवं ३, २, १, ३, २ "औदुम्बरीर्वा समिधो घृताक्ताः सहस्रं जुहुयाद् गां लभते" २, ४, ८ तथा २, ६, १, ५ स्वस्त्ययनार्थं सुभगार्थं सर्वजनस्य प्रियत्वार्थं च द्रष्टव्यम्।

(३)

— यशसे ब्रह्मवर्चसे च —

२, ६, १५ अथातो यशस्यानां त्वमिन्द्र यशा असि पवते हर्यतो हरिर्यश इत्येतेषामेकमनेकं वा सर्वाणि वा प्रयुञ्जानो यशस्वी भवति।

एवं २, ६, १६; २, ७, १-३ ब्रह्मवर्चसे च द्रष्टव्यम्।

(४)

लक्ष्मी प्राप्त्यर्थम् अलक्ष्म्याः नाशार्थं च।

३, १, ३ "गिर्वणः पाहि नः सुतम्" इति चैतत् सदा प्रयुञ्जीत मयि श्रीरिति चास्य निधनं कुर्यात् श्रीमान् भवति"।

३, १, ६ "तिष्येण घृतं क्रीणीयादायाहि सुषुमा हित इत्येतेन पिबेदलक्ष्मीं नुदते"।

एवं ३, १, ४; ३, १, ५; ३, १, ७ इत्येतानि द्रष्टव्यानि।

(२) शान्तिकर्माणि

(अ) भयाद् दौर्भाग्यात्, रोगात्, विषादेश्च मुक्तिः

२, १, ६ "उदुत्तमं वरुणपाशमित्येतत् सदा प्रयुञ्जानः संबाधं न निगच्छति निगतश्च प्रमुच्यते"।

२, २, १ अत्रोक्तम् —

"अथ यस्याः जातानि प्रमीयेरन् न्यग्रोधशृङ्गान् शरमूलं चोत्थाप्य तदहस्त्रिवृतं कारयेत् मणिम्, अग्निं प्रतिष्ठाप्य आवृता हुत्वा मणिं निधाय "अबोध्यग्निः" इत्येतेन जुहुयात् सहस्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कृत्वः शतावरं तृतीये गर्भमासि निदध्यात्, आज्यशेषं मेखलायां मणिं धारयेत् पुमांसं ह जनयति जातस्य कण्ठेऽवसृजेत् कुमारम् आज्यशेषं प्राशयेत् सर्वाणि स्रोतांसि तर्पयेद् अभ्यंजीत अहरहस्तत ऊर्ध्वमुपयुक्ते पुनः प्रयोगः शतं वर्षाणि जीवति जरयैव विस्रंसते।"

२, २, २ "अथ यो रक्षसा गृहीतः स्याद् अशनिहतस्य वृक्षस्येध्मः शुक्लाया गोः सरूपवत्साया अन्यस्य वाज्यं बैल्वं मणिमुत्थाप्य तदहस्त्रिवृतं धारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधायेन्द्र त्रिधातुशरणमित्येतेनाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयन् मुच्यते रक्षसा यद्वा विश्पतिरिति चैतत् सदा प्रयुञ्जीत स्वस्ति हास्य भवति।"

२, ३, ३ शङ्खपुष्पीं सर्पसुगन्धां चोत्थाप्य तदहस्त्रिवृतं कारयेन्मणिमग्निं प्रतिष्ठाप्यावृता हुत्वा मणिं निधाय चर्षणीधृतमिति वर्गेणाभिजुहुयात् सहस्रकृत्वः शतावरं तं मणिं कण्ठेन शिरसा वा धारयतो न सर्पभयं भवति कयानीयायां च सर्पसाम सदा प्रयुञ्जीत स्वस्ति हास्य भवति।

२, ३, १०-११ त्वमिमा ओषधीरित्येतत् सदा प्रयुञ्जानो न गरेण म्रियते। (१०)

सं ते पयांसि—इति पूर्वेण प्रथमं ग्रासं ग्रसेदुत्तरेण निगरेद् विषम् अप्यस्यान्नं भवति नैनं हिंसति नैनं हिंसति। (११)

२, ४, १-२ करवीरदण्डमुत्थाप्य देवव्रतैरभिजुहुयादनुगानशस्तेन हस्तगतेन यत्र क्वचन गच्छति सर्वत्र हास्य स्वस्ति भवति॥ १॥

तेन नगरं वा निगमं वा ग्रामं वा गोष्ठम् आगारं वा मनसा ध्यायन् परिलिखेन्नात्रारिष्टाः प्रविशन्ति॥ २॥

२, ३, ८ "इष्टाहोत्रीयं प्रयुञ्जानो नाप्सु म्रियते।"

२, ३, ९ "अचोदस इति तृतीयं प्रयुञ्जीत नैनं यक्ष्मा गृह्णाति।"

२, ३, १० "त्वमिमा ओषधीरित्येतत् सदा प्रयुञ्जानो न गरेण म्रियते।"

इत्थमेभिरुद्धरणैरिदं ज्ञातुं शक्यते यद्विशेषाणां साम्नां प्रयोगो विशेषान् गुणानाधत्ते।

एवम् २, २, ३ रोगवारणम् २, ३, ४ शस्त्रभयम्।

२, ३, ७ पिपासया मृत्युः २, ३, ८ अप्सु मरणम्।

२, ४, ४ शत्रोः शस्त्रभयम् २, ४, ५ दैवभयम्।

२, ४, ६-७ मार्गे जायमानं भयम् २, ४, ९ जरायाः मृत्योश्च भयम्—सर्वेषामेषां निवारणार्थं साम्नां व्यवस्था वर्णिता विद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

(आ) शत्रुः

२, ६, १४ अत्र हि शत्रोरावासात् तस्योत्सादनाय वर्णितः प्रयोगो विशेषेणावधेयः। तथाहि —

त्रिरात्रोपोषितः कृष्णचतुर्दश्याम् शवाद् अङ्गारम् आहृत्य चतुष्पथे बाधकम् इध्मम् (रोगपीडितं चतुरङ्गुलायामम् इध्ममिति सायणः) उपसमाधाय मत्स्यं कृकरं (पक्षिविशेषम्) इत्येतौ जुहुयाद्" अग्ने मृड महां असीति पूर्वेण अग्निर्वृत्रेति द्वितीयान्ते आहुती कोशे कृत्वा हरितालेन गोहृदयशोणितेन चेत्युत्तरेण संनयेद् यं द्विष्यात् प्रमंहिष्ठीयेनास्य शय्याम् अवकिरेद-गारं च भस्मना नैकग्रामे वसति।

(३) वशीकरणमथवा आवर्तनम्

२, ५, ३; अत्र हि वशीकरणोपाय इत्थमुक्तः—पुरुषं स्त्रियं वा गुणिनं विधातुमर्थाद् वशीकर्तुं युक्ते चन्द्रमसि प्रौष्ठपदे नक्षत्रे पांसुभिः प्रतिकृतिं कृत्वा पूर्वाह्णे प्राक्शिरसं मध्याह्ने दक्षिणशिरसम् अपराह्णे प्रत्यक्शिरसम् अर्द्धरात्रे उदक्शिरसं कृत्वा तस्य हृदयदेशम् अधि-ष्ठाय ब्राह्मणस्य कृते" अयं ते इन्द्र सोम इति साम्ना, इदं ते एकमिति क्षत्रियस्य, एष प्रकोश इति वैश्यस्य, विभीष्ट इन्द्र राधस इति शूद्रस्य अथवा सर्वेषां कृते उद्वयं तमसस्परीति साम-गानेन सह प्रतिकृतिं प्राक्शिरसं कृत्वा अग्नौ प्रतिष्ठाप्य औदुम्बरेण स्रुवेण आज्येन अभिजुहुयाद् अच्छाव इति निधनेन। एवमनुष्ठानेन वशीकरणं भवति। अत्र प्रतिकृतिविषये विकल्पः— "सौवर्णीं प्रतिकृतिं कुर्याद् ब्राह्मणस्य, राजतीं क्षत्रियस्य, औदुम्बरीं वैश्यस्य, आयसीं शूद्रस्य, औदुम्बरीं वा सर्वेषामिति"।

प्रसङ्गेऽस्मिन् २, ५, ४; २, ५, ५, ६; २, ६, ६; २, ६, १० इत्येतान्यपि द्रष्टव्यानि।

मन्त्रब्राह्मणम् —

अस्य ब्राह्मणस्य यातुसम्बन्धिनो विषया विभागविशेषं विनैव क्रमशो वर्णिताः। यतो हि विषया इमेऽन्येष्वपि वेदेषु तत्तत्स्थलेषु लिखिताः विद्यन्ते। अतोऽत्र सङ्क्षेपेणैव मया प्रदर्शिताः। सन्दर्भनिर्देशार्थमस्य ब्राह्मणस्य, प्राध्यापकेन श्रीदुर्गामोहनभट्टाचार्येण १९५८ वर्षे प्रकाशितं पुस्तकं गृहीतमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(१) १, १, ५, ६ नववधूः नवीनां शाटीं परिदधाति पतिः प्रेरयन् शोभनं मन्त्रं पठति, यत्र शाट्याः निष्पादयित्रीणां स्त्रीणां प्रासङ्गिकी प्रशंसा प्रासङ्गिकी च जरायाः दीर्घायुषश्च वार्ता, आशीर्वाद-सम्बन्धेन समायाता। वधूः कान्तिमती भूत्वा शतं वर्षाणि जीवेदिति कामना पुष्टिकर्मणा सम्बद्धा। अत इदं यातुसम्बद्धं पुष्टिकर्म।

या अकृन्तन्नवयन् या अतन्वत याश्च देव्यो अन्तानभितो ततन्थ।
तास्त्वा देव्यो जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः॥
परिधत्त धत्त वाससैनां शतायुषीं कृणुत दीर्घमायुः।
शतं च जीव शरदः सुवर्चा वसूनि चार्ये विभजासि जीवन्॥

(२) १, १, १४ अप्रजस्यं पौत्रमर्त्यं पाप्मानमुत वा अघम्।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशम् स्वाहा॥

अत्रापि वधूं सम्बोध्य उच्यते, हे कन्यके! इदानीमहं त्वदीयं वन्ध्यत्वं पुत्रमरणादिरूपम् अन्यच्चारिष्टं सर्वं मस्तकात् मालामिव उन्मुच्य शत्रुषु प्रतिक्षिपामि।

शान्त्या सम्बद्धोऽयं मन्त्रः। अत्र वध्वाः पापं यातुरहस्येन शत्रुषु न्यस्तो भवति।

(३) १, २, १ अयमपि मन्त्रः वधूमुद्दिश्योक्तः। विवाहावसरे यदा सा अश्मानमारोहति, तदा उच्यते "द्विषन्तमपबाधस्व मा च त्वं द्विषतामधः"। शान्त्यन्तर्गतमिदं संवेदनात्मकस्य यातोर्निदर्शनम्॥

(४) १, २, ६-१२ माङ्गलिके विवाहावसरे सप्तानां पादानाम् आक्रमणे इमे सप्त मन्त्राः "सप्तपदी" संज्ञकाः कन्यकायै बलम्, अन्नम्, ऐश्वर्यम्, सौख्यं पश्वादिकं च प्रार्थयितृभिः पठ्यन्ते। (पुष्टिः)

(५) १, ७, १-४ एभिः चतुर्भिर्मन्त्रैः वरः शीतोष्णाभिर्गन्धवतीभिरद्भिः स्व-शरीरमभिषिञ्चति। तत्राद्यौ शान्तिकर्माङ्गभूतौ वरस्याघं दूरीकुरुतः शेषौ द्वौ पुष्ट्यन्तर्भूतौ वराय ब्रह्मवर्चसादि मङ्गलं प्रयच्छतः।

(६) २, २, २-३ आग्रहायणे कर्मणि पायसहोमे विनियुक्ताविमौ मन्त्रौ पुष्टिकर्माङ्गभूतौ प्रतिष्ठातपौत्रब्रह्मवर्चसादि गुणार्थं तथा राष्ट्रे देशे प्रत्यश्वेषु, वाजिषु, गोषु, प्रत्येङ्गेषुपाणिपादादिषु पुष्ट्यर्थं सन्ति। अग्निमुद्दिश्येमौ प्रार्थनामन्त्रौ स्तः।

(७) २, ४, १ इदं भूमेर्भजामह इदं भद्रं सुमङ्गलम्।
परा सपत्नान् बाधस्वान्येषां विन्दते वसु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यजमानः यज्ञवेदिसमीपस्थां भूमिं स्पृशन् अग्निं प्रार्थयते। अग्निप्रार्थनापरोऽयं मन्त्रः। अत्र पूर्वार्द्धेन पुष्टिकर्माङ्गभूतं मङ्गलाशंसनम्। उत्तरार्द्धेन च शान्तिकर्माङ्गभूतं सपत्ननाशनार्थं प्रार्थनं वर्त्तते।

(८) २, ५, १-७ मूर्ध्नोऽधिमे वैश्रवणान् शिरसोऽनुप्रवेशिनः।

ललाटाद् घस्वरान् घोरान् विधनान् वि बृहामि वः स्वाहा॥ इत्याद्याः सप्त इमे मन्त्राः अलक्ष्म्याः अपनोदनार्थं सन्ति। एभिर्मन्त्रैर्यजमानः अग्नौ, आज्याहुतीर्जुहोति तथा "अलक्ष्मीर्नाशयाम्यहम्" इति भावनां करोति। शान्तिकर्माङ्गभूता इमे द्रष्टव्याः।

(९) २, ६, ११-१५ पूर्णहोमं यशसे जुहोमि, योऽस्मै जुहोति वरमस्मै ददाति। वरं वृणे यशसा भामि लोके स्वाहा। इत्याद्याः पञ्चेमे मन्त्राः पुष्टिकर्माङ्गभूताः सन्ति। एभिर्मन्त्रैर्यजमानः अन्नं बलं वीर्यमैश्वर्यञ्च कामयमानः आज्याहुतीः अग्नौ जुहोति।

(१०) २, ६, १८ मा भैषीर्न मरिष्यसि जरदष्टिर्भविष्यसि।
रसं विषस्य नाविदमुग्रम्फेनमिवास्यम्॥

शान्तिकर्माङ्गभूतोऽयं मन्त्रः सर्पदंशविषवारणाय प्रयुज्यते।

(११) २, ७, १-६ हतस्ते अत्रिणा क्रिमिर्हतस्ते जमदग्निना। गोतमेन तिनीकृतोऽत्रैव त्वा क्रिमे ब्रह्मवद्यमवद्यम्॥ इत्यादि षडिमे मन्त्राः क्रिमिनाशनाय प्रयुज्यन्तेऽतः शान्तिकर्माङ्गभूताः ज्ञेयाः।

(१२) २, ८, ५-८ यतो देवीः प्रतिपश्याम्यापस्ततो मा राद्धिरागच्छतु।
सव्यं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियं दधे॥
दक्षिणं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियमावेशयामि।
पूर्वमन्यमपरमन्यमुभौ पादाववनेनिजे राष्ट्रस्यर्ध्या अभयस्यावरुद्ध्यैव॥
इमे मन्त्राः अतिथेः पादप्रक्षालनेन राष्ट्रस्य समृद्ध्यै प्रयुज्यन्तेऽतः पुष्ट्यङ्गभूता।

(१३) २, ८, १२ यशसो भक्षोऽसि महसो भक्षोऽसि
श्री भक्षोऽसि श्रियं मयि धेहि स्वाहा॥

निगदोऽयमर्हणीयस्य मधुपर्कप्राशने विनियुक्तो भवति, पुष्टिश्चास्योद्देश्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

षष्ठोऽध्यायः

अथर्ववेदसंहितायां यातुविषयिणी सामग्री

अथर्ववेदस्य विवेचनाय ऋगादिवेदत्रयेऽङ्गीकृता पद्धतिरेव मया अनुसृता, न तु प्रथमाध्यायस्य पञ्चमे खण्डे वर्णिता ब्लूमफील्डस्य विभाग-पद्धतिः। प्रथममथर्ववेदसंहितायाः (शौनकीयशाखायाः) यातुविषयिका सामग्री संदर्शिता, तदनु गोपथब्राह्मणस्य।

१—अथर्ववेदसंहिता

(क) पुष्टिकर्माणि

६, ५, २४ : पञ्चौदनाज-यज्ञप्रशस्तावुक्तम्—"इषं मह ऊर्जमस्मै दुहे योऽजं पञ्चौदनं दक्षिणाज्ज्योतिषं ददाति" एवमेव पञ्चविंशतितमेऽपि मन्त्रे वर्णितम्, यद् यज्ञमिमं कुर्वाणो याजकः पञ्चसंख्याकधेनुरुक्मवस्त्रैः सम्पन्नो भवति। अत्र 'पञ्च' शब्दः सम्पूर्णोपलक्षकः, न तु तत्संख्यार्थ-परः। एतेन यज्ञेन जीवनस्य पोषिका समग्रोपलब्धिरनायासेनैव प्राप्यते। सहानुभूतिकस्य यातो-रुदाहरणम्।

१६, ३१ : पुष्टिकामः पशु-अन्न-पय-प्रजा-धन-धान्य-गृह-वीराणां 'भूमानं' तथा 'स्फार्ति' इच्छन् उदुम्बरमणिं तथा देवान् स्तुत्वा मणिं बध्नन् कथयति—

पुष्टिरसि पुष्ट्या मा समङ्ग्धि गृहमेधी गृहपतिं मा कृणु।
औदुम्बरः स त्वमस्मासु धेहि रयिं च नः सर्ववीरं नियच्छ रायस्पोषाय प्रति मुञ्चे अहं त्वाम्॥ १३॥

कृत्यस्यास्य यातुस्वरूपत्वं स्पष्टम्।

द्रष्टव्यम्—१, १५; ३, २४; १५, ७, ४-५; १५, ८, २-३; १५, १४, १-२ इत्यादयः।

(ख) राजकर्माणि

३, १९ : अत्र पुरोहितः स्वसंशितब्रह्मणा यजमानानां वीर्यं बलं तथा राष्ट्रं संशितं करोति, तेषां शत्रूंश्च नाशयति।

"समहमेषां राष्ट्रं स्यामि समोजो वीर्यं बलम्।
वृश्चामि शत्रूणां बाहूननेन हविषाहम्॥ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

नीचैः पद्यन्तामधरे भवन्तु ये नः सूरिं मघवानं पृतन्यान् ।
क्षिणामि ब्रह्मणामित्रानुन्नयामि स्वानहम् ॥ ३ ॥
अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
जयामित्रान् प्रपद्यस्व जह्येषां वरं वरं मामीषां मोचि कश्चन ॥ ८ ॥

४, ८ : राज्याभिषेकप्रसङ्गेऽस्मिन् सूक्ते राज्ञां व्याघ्र-चर्मासीनत्वं तथा सुद्दैः क्रमैः दिशामाक्रान्तिः सम्यग्वर्णितमस्ति । व्याघ्रो वीर्यस्य बलस्य च प्रतीकोऽस्ति । इमे द्वेऽपि कर्मणी वीर्यस्य, बलस्यैवं प्रभुतायाः प्राप्तये स्तः । अनन्तरं लोकत्रयस्य वर्चस्विभिर्जलैः राज्ञोऽभिषेको भवति । इयं क्रिया राजानं वर्चस्विनं करोति । अत्र सर्वत्र फ्रेजरमहोदयस्य सहानुभूतिक्रियातुन्यायः परिलक्षितो भवति ।

११, ६, १० इत्यपि द्रष्टव्यम् ।

(ग) सौमनस्यानि

३, ३० : मन्त्रैरेभिर्गृहजनेषु सहृदयत्वं सौमनस्यञ्च स्थापयितुं कामयते—

"सहृदयं सौमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यतवत्सं जातमिवाघ्न्या ॥ १ ॥
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥ २ ॥

सध्रीचीनान्वः संमनसस्कृणोम्येक श्नुष्टीन्त्संवननेन सर्वान् । (मंत्रः ७) इत्यादिः ।

अत्र वयं प्रार्थनापेक्षया यातोर्नियामकतत्त्वं पश्यामः ।

६, ४२ : मन्त्रा इमे हृद्देशाद् रोषापसारणाय तथा परस्परं सौमनस्य-स्थापनाय च प्रयुक्ताः ।

'अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः ।
यथा संमनसौ भूत्वा सखायाविव सचावहै ॥ १ ॥
.........अधस्ते अश्मनो मन्युमुपास्यामसि यो गुरुः ॥ २ ॥
अभितिष्ठामि ते मन्युं पार्ष्ण्या प्रपदेन च ।
यथा वशो न वादिषो मम चित्तमुपायसि ॥ ३ ॥

एतदपि कृत्यं सहानुभूतिक्रयातूदाहरणम् । कौ. सू. ३६, २८-३० सूक्तस्यास्य समावेशः स्त्री-कर्मणि क्रियते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

एवमेव ३, ८, ५-६ (सांमनस्यम्)[१]; ६, ४३ (क्रोधशमनम्); ६, ७४ तथा ९४ (सांमनस्यम्)।

(घ) रोगमुक्ति-दीर्घायुःप्राप्तिसम्बन्धिनो मन्त्रास्तत्कर्माणि च

(१) रोगोपशमनं विशनाशनञ्च

१, २ : अस्य प्रयोगोऽनेकविधः। रणसूक्तरूपेण[२] शत्रूनपनेतुं व्रणादीनां शान्त्यर्थं[३] तथोपकर्मणि अस्य प्रयोगो भवति। अपराजित-गणेऽप्यस्य समावेशः कृतः। ब्लूमफील्डमहोदयेन तथा ग्रिफिथमहोदयेनातिसारचिकित्सार्थमस्य प्रयोगो मन्यते। ह्विट्नीमहोदयेन "मुञ्जेन क्षतस्य तथा रोगस्य चिकित्सार्थम्" इति शीर्षकं प्रदत्तम्।

प्रथमे मन्त्रे शरस्य देवताभिः सम्बन्धो वर्णितः भूमिस्तस्य माता पर्जन्यं तस्य पिताऽस्ति। द्वितीये मन्त्रे ज्या शत्रूणां नाशार्थं पाषाणवत् कठोरभवनार्थं प्रार्थ्यते। तृतीये मन्त्रे शरतस्त्राणार्थमिन्द्रः प्रार्थ्यते। चतुर्थे मन्त्रे एको भिन्नो भावो वर्णितस्तथा ह्विट्नीमतानुसारं १, ३ इत्यनेन सूक्तेन सम्बद्धो भवेत्। अस्मिन् मुञ्जरोगस्यास्रावस्य च मध्ये स्यात्तुमुक्तः कौ० सू० २५-६ तथा १० तथा भाष्यस्याधारेण सायणस्य कथनमस्ति यद्—ज्वरातिसारचिकित्सको मूत्रातिसारचिकित्सकश्च रोगिणं मुञ्जरज्जौ बध्नीयात्। क्षेत्रस्य तथा वल्मीकस्य मृत्तिकाया द्रवं पाययेद्, आज्यस्य लेपनं च कारयेत्।

१-३ अस्य सूक्तस्य स्वरूपमभिचारमन्त्रवदस्ति तथास्य प्रयोगो मूत्रावरोधस्य विरुद्धे कृतोऽस्ति। अत्र ऋषिः चिकित्सकरूपेण तथा यातुविद्रूपेण कार्यं कुर्वन् मुञ्जस्य पितृगणानां विषये स्वज्ञानश्लाघां कुर्वन् रोगिणमाश्वासयति, यत्सः तच्छरीरस्थरोगान् अनेकदेवताभि-[४] सम्बद्धमुञ्जेनापाकरिष्यति। तदा स आत्मविश्वासपूर्णां वाणीमुच्चारयति यदहं, तव मूत्रनलिकां छेदयामि, तव मूत्राशयः शिथिलो भवतु तथा तत्र यत् किञ्चिदेकत्रितं भवेत्, तत्सर्वं धनुषः प्रक्षिप्तः शर इव पूर्ववद् वेगपूर्वकं बहिर्निःसरेत्। मन्त्रः। १·६।[५]

---

(१) अस्मिन् सूक्ते पूर्वाश्चत्वारो मंत्राः पूर्णतो विपर्ययेणासम्बद्धाः सन्ति।

(२) कौ० सू० १४·७।

(३) कौ० सू० २५·६।

(४) पर्जन्यं मित्रः, वरुणः, चन्द्रः सूर्यश्चास्य पितरः कथिताः। द्रष्टव्यो मन्त्रः १-५।

(५) ·········मूषिकामृत्तिकापूतीकतृणदधिमथितज्वरत्रमन्ददारुतक्षणशकलानाम् अन्यतमस्य पायनम्। हस्त्यश्वादियानारोहणं शरविसर्जनं शरेण मूत्रनालविदारणं लोहशकलस्य मूत्रद्वारे प्रवेशनम् इत्येमादीन्यपि सूत्रोक्त—प्रकारेण व्याधितस्य कुर्यात्, विपितं ते वस्ति बिलम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

परम्परागतकथनानुसारमस्मिन् रोगे रोगिणा हरीतकीकर्पूरादि बन्धनीयम् (शरीरे धारणीयम्)। मूत्रविमोचनार्थं शरक्षेपणं सहानुभूतिक-यातुन्यायस्योदाहरणमुपस्थापयति।

१-१७ : इदं सूक्तं शरीरस्य रक्तशिराणामवरोधनार्थमस्ति। कौ० सू० २६-१० रक्त-प्रवाहावरोधनार्थं प्रयुङ्क्ते। यो हि रक्तस्रावोऽसिपुत्रिकादिभिर्जातव्रणस्य, अथवा अव्यवस्थितरजः-स्रावस्य भवति। अस्यां क्रियायां पञ्चपर्वयुक्तदण्डेन व्रणमनेन सूक्तेनाभिमन्त्रणादयः क्रियन्ते[1]।

उक्तसूक्तस्य स्वरूपमभिचारमन्त्रवदस्ति। अत्र ऋषिर्लोहितवाससो भ्रातृविहीनां भगिन्य इव गच्छन्तीः शिरा अवरोधयितुं कथयति। द्वितीये मन्त्रे स मध्यमामुत्तमां प्रत्येकशिरां स्थातुं कथयति[2]। एतदन्तरं तृतीये मन्त्रे स्वमन्त्रस्य प्रभावं वर्णयतीत्यादयः।

१-१८ इदं सूक्तं दुर्भाग्यसूचकानि चिन्हानि शरीरादपनेतुं तथा यत्–किञ्चिदपि शुभं भद्रं वा भवेत्, तद्ग्रहणार्थं प्रयुज्यते। द्वितीये मन्त्रे ऋषिः देवतानां सहायतां स्वीकरोति, किन्तु तदनन्तरमेव पुनः स स्वशब्दशक्तिं स्मरति, तथा कथयति यद् ये केचन तवात्मनि, केशेषु शरीरे च घोरा भीमकराः सन्ति, हरिणसमानपादवन्ति (मन्त्रः ३) वृषभसमानमुखवन्ति च यानि चिन्हानि, अथवा एभिर्युक्ताः स्त्रियः सन्ति, ताः सर्वाः स्वशब्दैरपसारयामि[3] (मन्त्रः ४)। इत्थं वयं पश्यामो, यदलक्ष्मीनाशनक्रिया देवताभिः मन्त्रैश्चोभयसाधनेन सम्पाद्यते। एतद् विषये प्रयुज्यमानायां क्रियायां मुखप्रक्षालनमभिषेकस्तथा धान्यतुषाणाम् फलीकरण तुषावत-क्षणस्य होमो भवति।

१, २२ : अस्य हृद्रोगेण पाण्डुरोगेण च सम्बन्धोऽस्ति। प्रथमे मन्त्रे ऋषिः हृद्रोगं पाण्डुरोगं च सूर्ये गमनार्थं कथयति। स पाण्डुरोगस्य पीततां वैवर्ण्यं च नाशयितुं तथा रोगिणे

इति द्व्यृचेन मूषिकामृत्तिकाद्युक्तद्रव्येषु निरुद्धमूत्रपुरीषं पुरुषम् आस्थापयेत् (सायणः)। यद्ययं विचारो यथार्थस्तदा मूत्रावरोधनार्थं शल्यक्रियायाः प्रयोगः प्रामाणिकोऽस्ति, किन्त्वयं संदिग्ध एव।

(१) पञ्चपर्वणा दण्डेन रुधिरवहनस्थानाभिमन्त्रणं व्रणमुखे रथ्यापांसुसिकता प्रक्षेपणादिकम्, अर्भक-पालिकाबन्धनं च इत्येवमादि कुर्यात्। (सायणः)

(२) शतस्य धमनीनां सहस्रस्य हिराणाम्।
अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत॥

(३) रिश्यपदीं वृषदतीं गोषेधां विधमामुत।
विलीढ्यं ललाम्यं ता अस्मन्नाशयामसि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

दीर्घायुः प्रदानार्थं वृषभं रोहितवर्णेन आवृतं करोति[1], तथा हरीतिमां रोपणाकासु शुकेषु तथा हारिद्रवेषु[2] स्थापितं करोति । इत्थं स रोगिषु रक्तताम्, वयः, प्राणशक्तिं च सञ्चारयति। सूत्रेणानेन सह एकं दीर्घकालिकं विधानमस्ति[3] ।

रोगिणः रक्तवृषभस्य रोममिश्रितं जलं पानाय दीयत इत्यादि। रोगिणः पीततां स्थानान्तरितकरणे चेतनाचेतनोभयरूपं वस्तु साधनमस्ति । परम्परागतकथानुसारं रोगिणं रक्तवृषभरोममिश्रितजलं पाययेत् । वृषभः शक्तेःप्रतीकमस्ति, अतस्तद्रोममिश्रितं जलं रोगिणं पाययते। इदं सहानुभूतिकयातुन्यायस्योदाहरणमस्ति ।

१-२३, २४ः इमानि सूक्तान्योषधीभिः कुष्ठचिकित्सया सम्बन्धितानि सन्ति। सायणानुसारं हरिद्रा, रामा, कृष्णा, असिक्नी तथा रजनी नाम्न्य ओषधयः किलासं तथा पलितं कृष्णवर्णं विधातुं प्रार्थिताः सन्ति । (१, २३, १-२) ओषधीनामुत्पत्तेरपि वर्णनमस्ति। वस्तुत इदं सुपर्णस्य (गरुत्मनः) पित्तमस्ति, अतोरोगविनाशे पर्याप्तं समर्थमस्ति ।

अनयोर्द्वयोः सूक्तयोः १, २३, ४ मन्त्रं विहाय प्रारम्भादासमाप्ते रोगनाशार्थमोषधीनां प्रार्थना कृताऽस्ति। १, २३, ४ मन्त्रेष्वोषधीर्विहाय स्वमन्त्रद्वारा किलासेन पलितेन कृत्यया (दूष्या)[4] चोत्पन्नानां श्वेतचिह्नानां शरीराल्लुप्तकरणस्य वर्णनमस्ति[5]। मन्त्रेणानेनेदं स्पष्टमस्ति, यदस्य ऋषेः स्वशब्द-प्रभावे तथा तेषां शक्तौ च पूर्णा आस्था अस्ति। स विश्वसिति यत्

---

(१) या रोहिणीर्देवत्या गावो या उत रोहिणीः ।
रूपं रूपं वयो वयस्ताभिष्ट्वा परिदध्मसि ॥
मन्त्रः ३

(२) सायणः अन्त्यौ द्वौ शब्दौ क्रमशः काष्ठशुकार्थं तथा गोपीतनकार्यं च गृह्णाति। अस्य सूत्रस्यान्तिममन्त्रे ऋ० वे० सं० १,५०,१२ तथा तै० ब्रा० ३,७,६,२२ मन्त्रेऽपि लभ्यते ।

(३) रक्तवृषभरोममिश्रितोदकं पाययेत् । तथा तेनैव रक्तगोचर्म-छिद्रमणिं गोक्षीरे प्रक्षिप्य सम्पात्य अभिमन्त्र्य तन्मणिबन्धनम्, तत्क्षीरपानं च कारयेत् । तथा रोहिणं हरिद्रौदनं भोजयित्वा तदुच्छिष्टानुच्छिष्टेन आप्रपदं प्रलिप्य खट्वायामुपवेश्य तदधः शुककाष्ठशुकगोपीतनकाख्यानां त्रयाणां पक्षिणां सव्यजङ्घायां हरितसूत्रेणावबन्धनम् (सायणः) ।

(४) दूषयति प्राणिनं हिनस्तीति दूषिः । शत्रूत्पादिता कृत्या (सायणः) ।

(५) "अस्थिजस्य किलासस्य तनूजस्य च यत्त्वचि ।
दूष्या कृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

तेनौषधयोः यत्किञ्चित् कर्तुं प्रार्थितास्ता निश्चयमेव तत्कार्यं करिष्यन्ति। तथा यतः ओषधयं-स्तदाज्ञानरूपं कुष्ठरोगं विनाशितवत्यः, अतः स कथयति यत्तेन स्वमन्त्रशक्तिद्वारा रोगो विनाशितः। ओषधीनां रामा, कृष्णा इत्यादीनि नामानि साङ्केतिकानि सन्ति। इमा रंजन्या जाताः[1]। तथा यतो रात्रेर्वर्णः कृष्णः, अतः आसामोषधीनां वर्णोऽपि स्वाभाविकतया कृष्णोऽस्ति, परिणामस्य कारणानुरूपत्वात्। कृष्णत्वगुणयुक्ता इमा ओषधयः श्वेतचिह्नेभ्यः स्वाभाविकवर्णप्रदाने समर्थाः सन्ति। इदमपि फ्रेजरस्य सहानुभूतिकयातुन्यायस्यैकमुदाहरणमस्ति। अत एवैषां सूक्तानां सहकृत्ये श्वेतचिह्नेषु भृङ्गराज-नीलिकेन्द्रवारुणीहरिद्रादीनामोषधीनां चूर्णलेपविधेः समावेशोऽस्ति।

२, ३३ इदं सूक्तं यद् ऋग्वेदसंहितायाः १०-१६३ सूत्रस्य वृहत्तरं रूपमस्ति, रोगिणः शरीरस्य सर्वेभ्योऽङ्गेभ्यो यक्ष्मरोगं निष्कासयति[2]। कश्यपस्य वीबर्हेण स नेत्रास्थिकेशसन्धिचर्मभ्यः शरीरस्य विभिन्नाङ्गेभ्यो यक्ष्माणं निष्कासयति; अत्र न कस्यापि देवस्य कापि प्रार्थना कृता।

३, ७ इदं सूक्तं रोगिशरीराद् क्षेत्रियरोगस्य[3] दूरीकरणार्थमस्ति। ऋषिर्हरिणश्रृङ्गेण हृदये घनीभूतं क्षेत्रियं दूरीकर्तुं सोऽन्यत् साधनं प्रयुङ्क्ते। "नातिदूरस्थो य एकश्छर्दिरिव प्रकाशमानो भवति तेनाहं तवाङ्गेभ्यः क्षेत्रियं अपसारयामि[4]। तदन्ते द्वे" विचृत नक्षत्रे[5] तथा जलानि प्रति रोगिणं रोगमुक्तं विधातुं प्रार्थना कृतास्ति।

---

(१) नक्तं जातास्योषधे।

(२) अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते। मन्त्र १ आदि।

(३) क्षयकुष्ठादिरूपेण बहुविधं क्षेत्रियं रोगम् (सायणः)। रॉथमहोदयः बोह्तलिंकमहोदयः शरीरिणः दृढतया संलग्नो दुःसाध्य इन्द्रियसम्बन्धी वा रोगः (एस० डब्ल्यू० २, ५७३)। ह्निटनीः=आनुवंशिको रोगः स्पष्टतो विभिन्नप्रकारकाः संक्रामकदोषा ये सम्पूर्णपरिवारे सम्भवतो जातिविशेषे वा व्याप्ताः। ग्रिफिथः एकः क्लिष्टोरोगः तै० ब्रा० २, ५, ६, १ इत्यत्र क्षेत्री कस्यापि बालरोगस्य कृते प्रयुक्तम्। पाणिनिः ५, २, ९२ क्षेत्रियः कस्मिंश्चदन्यक्षेत्रे चिकित्स्यो रोगः (कतिपयभाष्यकृतां मतेऽसाध्योऽयं रोगः)। काशिकानुसारं कुष्ठरोगः।

(४) मन्त्रः ३—सायणेनास्य व्याख्या इत्थं कृता—"तेन चन्द्रमण्डलस्य हरिणात्मकेन पुरोवर्तिना वा चर्मणा" इत्यादि।

(५) अत्र शब्दचमत्कारोऽस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तदनन्तरं मन्त्रशक्तेः प्रदर्शनं कृतमस्ति—यदि क्रियमाणपेयेन[1] त्वयि क्षेत्रियरोगस्याविर्भावस्तदाहमस्योपचारं जानामि, अहन्तव शरीरात् क्षेत्रियं रोगं दूरीकरोमि। तदनन्तरं दुर्भूतं तथा क्षेत्रियं रोगं दूरं गन्तुं कथितवान्। नक्षत्रगणानाम् उषः कालस्य वैवर्ण्येन सह अस्मत्तः दुष्टप्रकृतिकक्षेत्रियरोगो नष्टो भवतु। (मन्त्रः ७)। अनेन सह संयुक्तकृत्ये हरिणशृङ्गस्य मणेर्बन्धनं तच्छृङ्गमिश्रित[2]जलस्य पानमित्यादीनि विहितानि सन्ति। एतेषां यातुरूपमसंदिग्धम्।

३, ११ इदं सूक्तं[3] यक्ष्मापनयनार्थं रोगिणो आयुष्यप्रदानार्थमस्ति। प्रथमे मन्त्रे स्वहविषः शक्त्या अज्ञातयक्ष्मणो राजयक्ष्मणश्च मुक्त्यर्थमुद्घोषयति[4]।

इन्द्रोऽग्निश्च ग्राहिण्याः (राक्षस्याः) रोगिणस्त्राणार्थं प्रार्थितौ। सम्पूर्णे सूक्ते आत्मनिर्भरता, नियमनं तथा देवतासु आस्था परिलक्ष्यन्ते। ५-६ मन्त्रयोः प्राणापानौ जने प्रवेशार्थं कथितौ तथा मृत्युर्दूरेऽपसरणार्थं कथितः। येन रोगी स्वस्थो भूत्वा शतसंवत्सरपर्यन्तं जीवितो भवेत्। अत्र प्रार्थनायास्तथा यातुनो मिश्रितं रूपमस्ति।

४, १३ सूक्तं यक्ष्मणश्चिकित्सया सम्बद्धमस्ति। अस्मिन् सूक्ते प्रार्थनाया यातुनश्च मिश्रणमस्ति। एवमिदं सूक्तं पूर्वसूक्तसमानमस्ति। द्वयोः करयोर्यातुस्पर्शो व्याधिशामकतत्त्वरूपेण वर्णितोऽस्ति।

६, १०५ कासाद् विमुक्त्यर्थमत्र नियमनमार्गः स्वीकृतः। कास उक्तः—"यथा मनो विचारैः सह शीघ्रमुड्डीयते तीक्ष्णः शरः सूर्यरश्मिश्च यथा शीघ्रमुड्डीयेते तथैव त्वमपि शीघ्रं प्रयाहि (प्र पत)" इत्यादि।

६, ८ अत्राप्यनेकेषां रोगाणां पीडा, कर्णशूलम्, विलोहितम्, प्रत्येकशरदः तक्मा (ज्वरः), यक्ष्मा बलासादयो रोगिणः शरीराद् बलाद् निष्कासिताः।

२०, ९६ इदं बहुभिर्भागैर्निर्मितमस्ति[5]। १-५ मन्त्रेष्विन्द्रः सोमपानार्थमामन्त्रितः।

---

(१) ह्विटनीमतानुसारम्। सायणः—"द्रवीभूतमन्नम्"।

(२) प्रथमे मन्त्रे 'हरिणशृङ्ग : क्षेत्रियरोगस्योपचारः' इति कथितम्।

(३) एकतश्चत्वारो मन्त्राः किञ्चित्परिवर्तनेन सह ऋ० वे० संहितायाम् १, १६१, १-४ सन्ति।

(४) मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्।

(५) इदं सूक्तं ऋ० वे० सं० १०, १६०, १-५; १६१, १-५; १६२, १६३, १६४-१ इत्यत

Nepal Sanskrit University, Balmeeki Campus, Kath...

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

६-१० मन्त्रा राजयक्ष्मणो विरोधे प्रयुक्ताः सन्ति। ११-१६ मन्त्राः स्त्रियो गर्भसन्तानयोर्हानिकराणां दुष्टात्मनां विरोधे प्रयुक्ताः सन्ति। १७-२२ मन्त्राः पुना राजयक्ष्मणः सम्बद्धाः सन्ति। २३ मन्त्रे मनसस्पतिः दूरे गमनार्थमुक्तः। अन्तिमाश्चत्वारो भागाः स्पष्टतोऽभिचारमन्त्राः सन्ति।

एवमेव १, १८ (शिरः पीडा आदि); २, ३ (आस्रावः); ६, १४ (बलासः); ६-८३ (अपचितः); ६-८५ (यक्ष्मा); ६-६१ (सामान्यरोगः); ६-१-१०५ (कासः); ७, १३६ (केशवृद्धिः); ७, ७४ (७८) (अपचितस्तथा ईर्ष्या); ५, १३; ६, १२; ७, ५६; ५८ तथा १०-४ (विषनाशः)।

(ii) आयुष्यम्, वर्चः, वीर्यमित्यादि

१, ३५ : इदं सूक्तं—हिरण्यमणिना कस्मैचिज्जनाय दीर्घजीवनं वीर्यमेवं ब्रह्मचर्यसं प्रदातुं प्रयुक्तम्। इमं हिरण्यमणिं सर्वप्रथमं दक्षः शतानीकमबन्धयत्। अस्य मणेः प्रशंसायाम् ऋषिः कथयति यद् हिरण्यधारकं राक्षसाः पिशाचाश्च पराजितं न कुर्वन्ति। स हिरण्यधारको जलस्य तेजः, ज्योतिः, ओजः, बलं तथा वनस्पतीनां वीर्यं प्राप्नोति। अन्ते स ऋषिः कथयति यदहं त्वां "समा" इत्यस्य (समा = ग्रीष्मः, ह्विटनी) मासानान्, ऋतूनां संवत्सराणां च पयसा पूरयामि। इन्द्रोऽग्निश्च द्वेषमुक्तौ भूत्वा तुभ्यमनुज्ञां दत्ताम्। अत्रापि यातु तथा प्रार्थना परस्परं मिश्रिते स्तः।

२, १५ : इदम् अभिचारमन्त्रः प्रतीयते। अत्र रोगी स्वप्राणान् द्यावापृथिवीदिनरात्रि-सूर्यचन्द्र-ब्रह्म-क्षत्र-सत्यानृत-भूतभव्यवद् भयमुक्तभवनार्थं कथयति।

कौ० सूत्रे ५, ४, ११ इदं गोदानसंस्कारस्यान्ते बालकाय भोजनप्रदानसमये प्रयुज्यते। सायणः—"इदं सूक्तमायुष्कामिने विहितम्" इति कथयति।

१६, २६ अत्र हिरण्यमग्नेरुत्पन्नं तथा मर्त्येषु अमर्त्य इति कथितम् (मन्त्रः १)। इदं हिरण्यममृतत्वस्य वर्चसश्च प्रातिनिध्यं करोति। एतद्धारको जन आयुष्यम्, वर्चः, ओजो बलं च प्राप्नोति। शरीरे हिरण्यधारणकाले तृतीयो मन्त्र उच्चार्यते[1]। अत्र हिरण्यस्य हिरण्यनिर्मितमणेश्च शक्तिस्तथा तस्य नियामकगुणाश्च वर्णिताः।

उद्धृतमस्ति। ६-९ मन्त्राः किञ्चित्परिवर्तनेन सद्यार्थर्ववेदसंहितायाः ३, ११, १-४ मन्त्रेषूपलभ्यन्ते। १७-२२ मन्त्राः अ० वे० सं० २-३३ सन्ति।

(१) आयुषे त्वा वर्चसे त्वौजसे च बलाय च यथा हिरण्यतेजसा विभासासि जनाँ अनु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

१६, ६०: इदं मनुष्यशरीरस्थविभिन्नाङ्गानां समुचितं सञ्चालनार्थं शक्तिप्राप्तये अभिचार-मन्त्रः प्रतीयते। इदमुक्तं यद् मम मुखे वाणी अस्तु, नासिकारन्ध्रे प्राणाः सन्तु, नेत्रयोः ज्योतिः (चक्षुषोः दर्शनशक्तिः), कर्णयोः श्रवणशक्तिः, अपलिताः केशाः सन्तु, अभग्नाः दन्ताः सन्तु, बाह्वोः बलमस्तु–इत्यादि (मंत्रः १)।

इत्थं द्रष्टव्यम्—३, ३१ : (कल्याणम्, आयुष्यम्) ४, १० : (बहुप्रकारकानिष्टेभ्यो रक्षा तथा दीर्घायुषः वर्चश्च प्राप्तिः) ५, १६ (वृषरोगशमनम्) ५-१० (आयुष्यम्); ६, ११ (पुंशक्तिः) ७, ५३, ५५ (स्वास्थ्यं तथा आयुष्यम्); ८, १२ : (आयुष्यम्) १६, २८, १ (आयुष्यं तेजश्च); १६, २, १ (आयुष्यार्थं दर्भमणेः प्रयोगः) १६, ६० (वाणी, प्राणाः, दृष्टिः आदि)।

स्त्रीकर्माणि

अस्मिन् विभागे पुष्टेः शान्तेश्च उभयोः विषययोरुदाहरणानि समाविष्टानि, परं पुष्टि-विषयकाणां मन्त्राणां बाहुल्यमस्ति। अत्राहम् अन्यवेदानां कृते व्यवहृतां पद्धतिं परित्यज्य पुष्टेः शान्तेश्च उभयोर्विषययोरुदाहरणावलिरुल्लिख्यते। अत्रेदं कारणम्। प्रथमं तु बहुषु उदाहरणेषु द्वयोः मिश्रणमस्ति, द्वितीयन्तु एतादृशकरणेन विषयप्रतिपादने सौविध्यमस्ति।

१, ११ : इदं सूक्तं सफलप्रजननेन सह सम्बन्धमस्ति। १-२ मन्त्रयोः पूषा, अर्यमा अन्ये च देवा सुखेन सुरक्षितं च प्रसवार्थं स्त्रियः पर्वणः शिथिलीकरणार्थं गर्भस्य प्रेरणार्थं च आहूताः। तदनन्तरं तृतीयमन्त्रतः ऋषेः स्वरः परिवर्तितो भवति तथा अन्तपर्यन्तं तादृश एव भवति। अभिचारमन्त्रः सर्वशक्तिमान् जायते।—'सूषा व्यूर्णोतु वि योनिं हापयामसि ०।३। "वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके" इत्यादिः।५।

अन्ते ऋषिः कथयति यत् वायुर्मनः पक्षी च यथा उड्डीयन्ते तथैव हे दशमासक शिशो त्वमपि जरायुणा सह बहिः पत (पद्यताम्)[1]।

इत्थं वयं पश्यामो यद् ऋषिरत्र केवलं देवताशक्तौ एव आश्रितो नास्ति। किन्तु, मन्त्रैः प्राप्तस्वशक्तावपि। कौ० सू० ३३, १ इदं सुरक्षितप्रजननार्थं प्रयुज्यते। सायणोऽनेन सह प्रयुज्यमानां क्रियां[2] स्वभाष्ये उल्लिखति।

(१) पत धातोरर्थः उड्डीयनं पतनं च।

(२) गर्भिण्यां शिरसि संपाताभिहुतोष्णजलेन आप्लावनम्, शालाग्रन्थिविमोचनम् योक्त्रबन्धम् इत्येवमादीनि सुखप्रसवकर्माणि पुत्रजनन-विज्ञान-कर्मान्तानि कुर्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१, १४ : एतत्सूक्तस्य शीर्षकं ह्विटनिः" "एकस्याः स्त्रियः विषये चिरकौमार्यं शापः" इति लिखति । वेबरः लुडविगश्च इदं सूक्तं विवाहगीतं मन्येते, किन्तु ब्लूमफील्डः विवाहगीतं न मत्वा स्वप्रतिस्पर्द्धिनीं प्रति एकस्याः स्त्रियः शापं मन्यते । "पितृषु" इति पदस्यार्थः पितॄणां प्रेतगणानां वा मध्यो भवति । स्वतन्त्रदृष्ट्या अर्थे गृहीते तृतीयमन्त्रेण प्रतीयते यदिदं सूक्तं कुमार्यास्तरुण्या अन्तिमक्रियावसरे सम्भवतः पठ्यते । कौ० सू० ३६, १५-१८ इदं सूक्तं स्त्रियः विरुद्धे शापरूपेण गृह्णाति तथैतत् सूक्तविषयेऽन्यं किमपि न प्रकाशयति । सायणः[1] इदं कस्या अपि स्त्रियः पुरुषस्य वा कृते दुर्भाग्यकारकं मन्यते । सायण एतत्सम्बधिनीं क्रियामपि लिखति, यत्संसर्गात्मकयातुन उदाहरणमस्ति । मन्त्राणामयं भावः—

"कस्मादपि वृक्षाद् अपहृतां पुष्पावलीमिव तस्या भगो वर्चश्च मया स्वयं गृहीते । कश्चिद् महाधारः पर्वत इव सा स्वपितुः समीपे दीर्घकालपर्यन्तं वसेत् । हे यम इयं कन्या ते पत्नी भवेत् । इयं स्वमातुः गृहे एव तिष्ठेत् । अन्ते च यथा भगिन्यः पेटिकायां वस्तूनि पिहितानि कुर्वन्ति तथैव अस्याः स्त्रियः (शापलक्ष्यभूतायाः) भगः असितकश्यपगयमन्त्रैः पिहित इति । यद्यप्यत्र यमः सम्बोधितस्तथापि तस्य नायमर्थो यद् ऋषिस्तस्य कृपाया आकाङ्क्षी तथा तस्मिन् आश्रितः । इदं सूक्तम् अभिचारमन्त्रे आत्म-निर्भरताम् आत्मविश्वासं च अभिव्यञ्जयति ।

१, ३४; अस्य सूक्तस्य बहवो विनियोगा लिखिताः । कौ० सू० कस्मिंश्चिद् वादविवादे श्रेष्ठताप्राप्तये तथा वैवाहिककृत्येषु अस्य प्रयोगं करोति । सायणः प्रमाणं विनैव अस्य प्रयोगम् अश्वमेधयज्ञस्य वादविवादे करोति । किन्तु, एषुप्रयोगेषु अस्य सूक्तस्य विषयसामग्र्यः समन्वयं नार्हन्ति । ह्विटनिः इदं प्रेमविषयकं यातु मन्यते ।

एकः प्रियः स्वप्रेयस्याः हृदयमाक्रष्टुं मधुरौषधिम् उत्पाटयति, या हि एकान्ते उत्पद्यते । तां प्रति स्वेच्छां प्रकटीकरोति—"सा नो मधुमतस्कृधि" (मन्त्रः १); "जिह्वा या अग्रे मधु मे जिह्वामूले मधूलकम् । ममेदह क्रतावसो मम चित्तमुपायसि ॥ मंत्रः २ ॥ तदनन्तरमस्य अभिचार-मन्त्रस्य कर्ता स्वयं मधुकौषधेरपि अधिको मधुरोभूत्वा आत्मविश्वासेन सह कथयति यत् त्वम् मधुयुक्तशाखावद् मां प्रति स्नेहं कुरु । मधोरस्मि मधुतरो मदुघान्मधुमत्तरः । मामित्किल त्वं वनाः शाखां मधुमतीमिव ॥ ४ ॥ अहं त्वाम् अभितः चतुर्षु दिक्षु इक्षुभिः परिवेष्टयामि तथा

(१) स्त्रियः पुरुषस्य वा दौर्भाग्यकरणे तदुपभुक्त-माल्य-कन्दुक-दन्तधावन-केशानां सूक्तोक्तप्रकारेण (नि) खननादिकर्माणि कुर्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

त्वामभितः चलामि येन पारस्परिकी घृणा न भवेत् त्वं मां प्रति स्नेहं कुरु तथा मत्तो दूरं न याहि (मन्त्र ५)।

मधुकौषधे इक्षोश्च संसर्गेण स स्वयमपि मधुरं बुध्यते; यतो हि प्रत्येकं जनाय मधुरं रोचते। अतः सोऽपि विश्वसिति यत् तस्य प्रेयस्यपि तं प्रति आकृष्टा स्निह्येत्। (सहानुभूतिक-यातु)

३, १८ : इदं सूक्तम् अभिचारमन्त्रं प्रयोक्त्र्या पत्न्या सपत्नीं वशीकर्तुं तथा स्वं पतिं सम्पूर्णरूपेण केवलं स्वस्यामेव आसक्तं कर्तुं प्रयुज्यते। सपत्न्याः पराभवकार्यं पत्न्याः (मन्त्रमुच्चारयन्त्याः) तद्वनितौषधेश्च उभयोः सहयोगेन अनुष्ठितमस्ति। सा कथयति—

"अहमस्मि सहमानाथो त्वमसि सासहिः।
उभे सहस्वतीभूत्वा सपत्नीं मे सहावहै ॥५॥

ओषधिः अतिमानुष्या अलौकिक्या वा शक्त्या सम्पन्नास्ति। यया तत्प्रयोगकर्त्री स्वस्पर्द्धिनीं दूरे करोति (मन्त्रः १)[1] सा इमाम् ओषधिं स्वसपत्न्याः शय्यायाः अधः स्थापयति कथयति च अहं तव कृते "सहमानाम्" (शक्ति युक्ताम्) आस्थापयम्। तव मनः मम पश्चात् तथैव धावेद् यथा वत्सः स्वमातरं गाम् अनुधावति जलं च स्वनिम्नमार्गे धावति[2]।

३, २३ सूक्ते वीरपुत्रस्य जननम् अभीष्टम्। स्त्रियं सम्बोद्ध्य कथितं यद् त्वं येन वन्ध्यात्वं प्राप्तवती तमहं त्वत्तो दूरे करोमि तं चान्यत्र स्थापयामि (मन्त्रः १)। तूणीरे (इषुधौ) वाण इव तव योनौ गर्भ आगच्छेत् (मन्त्रः २)। अहं तव कृते प्राजापत्येष्टिं[3] करोमि (मन्त्रः ५)। दिव्यौषधयः पुत्रप्राप्त्यै तव सहायतां कुर्वन्तु (मन्त्रः ६)।

परम्पराप्राप्तकथानुसारम् अनेन सूक्तेन सह स्त्रियः शिरसि त्राणभङ्गक्रियादयः सम्पाद्यन्ते।

---

(१) इमां खनाम्योषधिं वीरुधां बलवत्तमाम्।
यया सपत्नीं बाधते यया सविन्दते पतिम् ॥

(२) सायणः कौशिकसूत्रमनुसरन् निम्नलिखितक्रियाविधिमवर्णयत्—"सपत्नी जयकर्मणि बाणापर्णि पत्रचूर्णं लोहितवर्णा जाया दध्युदकेन संमिश्रय अभिमन्त्र्य सपत्नीशयने परिकिरेत्। "अभि तेऽधाम्" (मन्त्रः ६ अ) इति पादेन तत्पत्राण्यभिमन्त्र्य शयनस्याधस्तात् प्रक्षिपेत् "उपतेऽधाम्" (मन्त्रः ६ ब) इति पादेन—शयनस्योपरि प्रक्षिपेत्"।

(३) प्रजापतिः प्रजानामुत्पादकोऽस्ति। अतः एतदिष्टिसम्पादनेन अभीष्टसन्ततेः प्राप्तिर्भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

३, २५ : इदं कस्याश्चित् स्त्रियः स्नेहं प्राप्तुं प्रयुज्यते। अस्य स्वरूपम् अभिचारमन्त्रवदस्ति। अस्य सूक्तस्य उच्चारणेन सह प्रियः स्वप्रेयस्याः प्रतिमाया हृदयं बाणेन भिनत्ति। बाणः कामस्य प्रतीकमस्ति। इत्थं लाक्षणिक्या संकेतात्मिकया वा क्रियया स स्वप्रेयस्याः हृदये प्रेम प्रवेशयति। अभीष्टनार्याः प्रतिमा केवलं प्रतिमैव न, अपितु शरीरेण आत्मना च सह सा साक्षाद् अभीष्टा स्त्री एव। इत्थं यत् किञ्चिदपि तस्यां प्रतिमायां क्रियते तत्सर्वं तस्यां स्त्रियाम् एव क्रियते। स्त्रीप्रतिमायाः हृदयं बाणेन विध्यन् स कथयति—

उत्तुदस्त्वोत्तुदतु माधृथाः शयने स्वे।
इषुकामस्य या भीमा तया विध्यामि त्वा हृदि ॥ १ ॥

स प्रेमी एवम् एतदर्थं करोति येन तस्य प्रेयसी भीषणव्यथया पीडिता भवेत्। दीनमुखी, नम्रतया तं प्रति विनीता भूत्वा तस्य पार्श्वे आगच्छेत्, तस्य वशे तिष्ठेत् (मन्त्रः ३-४)। इदमपि होमियोपैथिकयातुन एकमुदाहरणमस्ति।

अस्या यातुक्रियायाः प्रयोगानन्तरं स मित्रं तथा वरुणं प्रार्थयते, यत् तौ तस्य प्रेयस्याः हृदयतो विरोधिभावम् अपहृत्य तां शक्तिहीनां कुरुतां येन सा तस्य वशे तिष्ठेत् (मन्त्रः ६)।

४, ५ : इदं सूक्तं "स्वापनसूक्तम्" अस्ति। कौ० सूत्रम् एकस्याः स्त्रियः पार्श्वे सुरक्षया सह प्रापणार्थं तां तथा तस्याः भृत्यादिकान् स्वापयितुम् अस्य सूक्तस्य अनुष्ठानं प्रयुङ्क्ते स शयनशालायाम् अनेन सूक्तेन अभिमन्त्रितस्य जलस्य सिञ्चनविधानं प्रतिपादयति।

अस्य सूक्तस्य अथवा एतदभिचारमन्त्रस्योच्चारणेन प्रेमी सर्वाः स्त्रीः (मन्त्रः ३) तस्या मातरं पितरं रक्षकान् सारमेयान् गृहस्वामिनं सम्बन्धिनश्च स्वापयति (मन्त्रः ६)।

निःस्तब्धरात्रौ अस्मिन् काले यत् किञ्चिद्गतिमदस्ति तानि सर्वाणि अधिकृतानि। यत् किंचित् स्थितं, गतियुक्तम् उत्थितं सद् वा बहिरवलोकयति तानि सर्वाणि एतद्धर्म्यवत् स्वापयामि इत्यर्थकैः मंत्रैः स सर्वाणि स्वापनार्थं प्रेरयति। अन्ते निद्रां सम्बोधयन् कथयति "हे निद्रे त्वं इमानि सर्वाणि सूर्योदयं यावद् निद्रायाम् उपस्थापय" तथा माम् अनाहत इन्द्र इव प्रातः कालं यावद् निद्रारहितम् उपस्थापय। इदमपि यातुन एकं स्पष्टमुदाहरणमस्ति।

६, ११ : अत्र एकं सांकेतिकम् अनुष्ठानमस्ति, येन पुत्रप्राप्तेः वाञ्छितं फलमुपलभ्यते। अस्य प्रथमे मन्त्रे शम्यश्वत्थयोः संयोगेन पुत्रप्राप्तेः लक्ष्यस्योपलब्धिः विशेषरूपेण ध्यातव्यास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

शमीमश्वत्थ आरूढस्तत्र पुंसुवनं कृतम् । तद्वै पुत्रस्य वेदनं तत्स्त्रीष्वाभरामसि ॥ १ ॥

पुंसि वै रेतो भवति तत्स्त्रियामनुषिच्यते ॥ २ ॥

इदमनुष्ठानं स्वकीयालौकिकप्रभावेण स्त्रियै पुत्रं प्रददाति । (सहानुभूतिकयातुन्यायः) ।

६, १७ : इदं गर्भदृंहणं सूक्तमस्ति । अनेन समयतः पूर्वं शिशोः जन्मग्रहणस्य भयं निराक्रियते । अत्र कोपि देवो न प्रार्थ्यते नापि कस्योल्लेखः । केवलम् इदमेवोक्तं यद् यथा इयं महती पृथिवी भूतानां गर्भं वनस्पतीन् पर्वतांश्च धारयति तथैव तव गर्भोऽपि त्वयि स्थितो भवतु, येन अयं गर्भोऽवधौ पूर्णे सति जन्म गृह्णीयात् ।

७, ३५ : इदं सूक्तं प्रतिद्वन्द्विनः स्त्रियो वन्ध्याकरणार्थं प्रयुज्यते । अस्य केवलं द्वौ मन्त्रौ द्वितीयस्तथा तृतीय उद्देश्येन सम्बद्धौ स्तः । प्रथमे मन्त्रे विरोधिनाम् अभिभवार्थं प्रार्थना कृतास्ति । वस्तुत इदं सूक्तं ७-३४ इत्यनेन सम्बद्धं भवेत् ।

ऋषिः कस्यापि देवस्य सहायतां विना स्वशक्त्यैव वांछितफलप्राप्तये चेष्टते तथा यातुविद् इव कार्यं करोति । स कथयति अहं तव सहस्रशिरावद् मुखं प्रस्तरैराच्छादयामि[१] । तव सन्तति लाभो न भवेत् । अहं त्वां वन्ध्याम् विदधामि[२] (मन्त्रौ २-३) ।

प्रथमे मन्त्रे तु प्रार्थना अवशिष्टयोः द्वयोः यातु अस्ति । सम्भाव्यते यद् इदं सूक्तं कस्यापि प्रतिद्वन्द्विनः पुरुषस्य पत्नीः वन्ध्या विधाय तासां सन्तानहीनकरणेन सम्बद्धं स्यात् तथा कस्या अपि स्त्रियः सपत्नीनां सन्तानहीनकरणेन सम्बद्धं न भवेत् ।

७, ३७ (३८) : अत्र पत्नी स्वपतिं कथयति यत्सा तं मनुज्ञातवस्त्रेणा[३]वेष्टयति येन सः तां प्रति निरन्तरमनुरक्तः सन् अन्यया स्त्रिया सह वार्तामपि न कुर्यात् ।

१४, २, १७ : पत्न्या आवेष्टनं तस्याः सन्ततिधनशक्तिप्राप्तेः लक्ष्यस्य पूर्तिं करोति[४] ।

अनेनैव प्रकारेण दृश्यताम्—६-८, ६, ८६, १०२, १३६ (स्त्रीप्रेमप्राप्तिः), ७-३८

---

(१) गर्भधारणार्थम् ।

(२) परं योनेरवरं ते कृणोमि मात्वाप्रजाभिभून्योत सूनुः । अस्वं त्वाप्रजसं कृणोम्यश्मानं ते अपिधानं कृणोमि ॥ ३ ॥

(३) मनुना मन्त्रेण जातेन मन्त्रपूर्वकं परिहितेन मनोर्वा जातेन । (सायणः) ।

(४) सं त्वा नह्यामि पयसा पृथिव्याः, सं त्वा नह्यामि पयसौषधीनाम् ।

सं त्वा नह्यामि प्रजया धनेन, सा सन्नद्धा सनुहि वाजमेमम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

(३६) (पुरुषप्रेमप्राप्तिः); ७-११३ (११८) स्त्रियः प्रतिस्पर्द्धिन्या विरुद्धम्। ८-६ (राक्षसेभ्यो गर्भिणीरक्षा)।

शान्ति-कर्माणि

(क) क्षतेः, दुर्भाग्यात्, आपत्तेरथवा अवाञ्छितस्थितेरित्यादिभ्यो रक्षणम् ।

२, ४ : इदं सूक्तं विभिन्नापद्भ्यो रक्षणार्थमस्ति । अत्र जङ्गिडनामा मणिः दीर्घायुः-सुखप्राप्तये तथा जम्भविशरविष्कन्धाभिशोचनेभ्यः (मन्त्रः २) सर्वतो भक्षकेभ्यः सुरक्षणार्थं प्रतिपादितोऽस्ति । देवैः प्रदत्तोऽयं मणिर्विश्वभेषजमस्ति तथा कृत्याऽऽरातीनां नाशकोऽस्ति ।

"कृत्यादूषिरयं मणिरथो अरातिदूषिः" । ६ ।

अत्र दीर्घायुःप्राप्त्यै तथा आपद्भ्यः सुरक्षेषणा कृतास्ति ।

२, १० : इदं सूक्तं सर्वविधाभ्य आपद्भ्यो (evils) मुक्तये कल्याणप्राप्तये च अस्ति, तथैकोऽभिचारमन्त्र (spell) इव प्रतीयते । अत्र मन्त्रशक्त्या क्षेत्रियनिर्ऋतिवरुणपाशाना-गतेत्यादिभ्यो मुक्तिप्राप्त्यै चेष्टा कृताऽस्ति[१] । मन्त्रैः वक्तुः शक्तिः प्रकटिता भवति—

"अमुक्था यक्ष्माद् दुरितादवद्यात् द्रुहः पाशाद् ग्राह्याश्चोदमुक्थाः" इत्यादिः (मंत्रः ६)।

अस्य सूक्तस्य सर्वेषां मन्त्राणामुत्तरार्द्धेषु "एवाहं त्वाम्" शब्दैः सह प्रथममन्त्रावृत्तिः कृताऽस्ति प्रथममन्त्रान्ते तथा द्वितीयस्य चतुर्थस्य च मन्त्रस्यारम्भे आपद्भ्यो मुक्तिदानायाहूत-देवानां नामानि यन्त्रचालितरूपेण (in a machanical way) कथितानि सन्ति । वस्तुतः तेषां सन्तुष्टिकरणस्य किमपि उद्देश्यं नास्ति तथा नास्ति, तेषु निर्भरतायाः कश्चन भावः । एवं प्रतीयते यत् २-४ मन्त्रयोः पूर्वार्द्धे दैवसाहाय्येन मन्त्रमधिकशक्तियुक्तं विधातुं संलग्ने कृते स्तः । विभिन्नापद्मुक्तिप्रदानशक्तिः मन्त्रे निहितेति प्रतिपादितमस्ति । अष्टमे मन्त्रे कष्टान्वित-व्यक्तेः क्षेत्रियादिभिर्मुक्तिविधानकृत्यस्य तुलना देवैः सूर्यस्य अन्धकारात् मुक्तिप्रदान-कार्येण कृतास्ति ।

४, ३ : इदं भयावहवन्यपशूनां चौराणाञ्च प्रतिकारार्थमस्ति । दूरस्थितमार्गेभ्यो वृकसर्प-चौरान् तथा दुर्भावयुक्तान् (अघायून्) इत्यादीन् पृथग् गमनाय कथितमस्ति (मन्त्रः २) व्याघ्रस्य नेत्रयोः तस्य मुखस्य तथा विंशतिनखानाञ्च सम्पिष्टनकथा कथिताऽस्ति (मन्त्रः ३)। इत्थं क्रमशो व्याघ्रचौरसर्पयातुधानवृकाणाम् एकैकशः नाशः कृतोऽस्ति । ऋषि चौरं भयं दर्श-

(१) क्षेत्रियात्त्वा निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाशात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यति[1] तथा मार्गापध्वंसेन तस्य निवारणवार्तां कथयति। सः कामयते यदीन्द्रवज्रं चौरं हन्तु। अन्ते मन्त्रप्रभावो वर्णितोऽस्ति यद् मृगदन्ता मूर्णा जाताः तथा पार्श्वास्थीनि छिन्नभिन्नानि जातानि सन्ति इत्यादयः।

कौ० सू० ५१.१ इदं गोवृद्ध्यर्थं तथा तासां व्याघ्रचौरादिभ्यः सुरक्षार्थं प्रयुङ्क्ते।

४, ६ : इदं विषाक्तशराणां प्रतीकारार्थमस्ति। व्यापकप्रभावैर्विषघ्नशब्दैः विषं प्रभावहीनं क्रियते 'वाचं विषस्य दूषणीं तामितो निरवादिषम्' ।१। शराग्रभागम्, तस्य विषम्, येन बाणाः प्रक्षिप्यन्ते तत्कोदण्डश्च निःसत्वं (Sapless) क्रियते (मन्त्रः[2] ६)। तेनैव प्रकारेण शरनिर्मातृव्यक्तयः, विषाक्तद्रुमोत्पत्तिस्थानपर्वताः, तद्विषाक्तद्रुमेभ्यो विषनिष्कासयितृव्यक्तयश्च विषहीनाः (impotent) कृताः सन्ति (मन्त्रः ७-८)। इत्थं मन्त्रशक्त्या ऋषिः प्रत्यक्षरूपेणाथवाऽप्रत्यक्षरूपेण शरविषाक्तविधातॄन् सर्वान् पदार्थान् सर्वांश्च व्यक्तीः सामर्थ्यहीनान् करोति।

४, १७ : अत्रापामार्गसाधनेन दुःस्वप्नराक्षसमरणादीनां निवारणं कृतमस्ति। अत्र ऋषिः स्वेच्छां प्रकटयति यच्छापप्रदातारः स्वयमेव स्व सन्ततिभक्षणं कुर्युः। ओषधिः ऐन्द्रजालिकाम् तदैन्द्रजालेन तानेव नाशयतु। शक्तियुक्तैः शब्दैर्दुःस्वप्नदुःस्थित्यादीनां निवारणं विधीयते।

दौष्वप्न्यं दौर्जीवित्यं रक्षो अभ्वमराय्यः।
दुर्णाम्नीः सर्वा दुर्वाचः ता अस्मन्नाशयामसि ॥५॥
क्षुधामारं तृष्णामारमगोतामनपत्यताम्।
अपामार्ग त्वया वयं सर्वं तदपमृज्महे ॥६॥ इत्यादिः

अनेन प्रकारेणापचारे कृते ओषधेः प्रशंसां कुर्वन् यातुना प्रभावितां व्यक्तिं प्रतीदं कथ्यते यत्सर्वौषधिष्वयमेक एव नियन्त्रको (वशी) वर्त्तते। एतत्साहाय्येन वयं तवासन्नस्य संकटस्य निवारणं कुर्मः, इदानीं त्वं रोगमुक्तो भूत्वा विचर (मन्त्र ८)। अत्रापि देवेन न कापि सहायता स्वीकृता।

---

(१) मन्त्रः ५–यो अद्य स्तेन आयति स संपिष्टो अपायति।

(२) अरसस्त इषो शल्योऽथो ते अरसं विषम्
उतारसस्य वृक्षस्य धनुष्टे अरसारसम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

४, ३४ : विष्टारिणोदन-प्रशस्तिं कुर्वन् कथितमस्ति यदस्य यज्ञस्य कर्त्ता कदापि विनाशं न प्राप्नोति (मन्त्र ३)। यमः तं रेतो वञ्चितं न करोति। अयं रथीभूत्वा रथमार्गेण रथयानेन याति (ईयते) इत्यादि।

६, ५६ इदं सर्पेभ्यो रक्षणार्थमस्ति। विभिन्नप्रकारकसर्पेभ्यो रक्षणार्थं देवप्रार्थनानन्तरं सर्पाणां दन्तजिह्वास्यानां विद्रावणकथया सह सूक्तमिदं समाप्तिं भजते।[१]

७, १२ (१३) इदं सभायां सफलताप्राप्तय अस्ति। सभागन्तृजनः सभां तथा समितिं च प्रशंसति तथा तदनुग्रहयाचनामपि करोति (मन्त्रः १२)। मन्त्र ३ तृतीयस्योत्तरार्द्धे स इन्द्रसाहाय्यं कामयते। शेषाः सर्वेऽभिचारमन्त्राः (spell) सन्ति। सः कथयति यदहमत्रासीनानां सर्वेषां जनानां वर्चसं विज्ञानं च गृह्णामि। युष्माकं यन्मनः दूरं गतम् तदहमत्र परावर्त्तयामि। युष्माकं मनो मयि रमताम् (३-४)।

७, ८८ (९३) एकमन्त्रकमिदं सूक्तं सर्पविषनाशाय वर्त्तते। सर्पसमीपं गन्तुं तथा तं हन्तुं चात्र विषं प्रति कथितमस्ति "अपेह्यरिरस्यरिर्वा असि। विषे विषमपृक्था विषमिद्वा अपृक्थाः। अहिमेवाभ्यपेहि तं जहि ॥१॥

कौ० सू० इदं सर्पविषशमनक्रियायां प्रयुङ्क्ते। दंशस्थाने घर्षणानन्तरं सर्पदिशि तृणं प्रेष्यते। इयं क्रिया स्पष्टतया यातुसम्बन्धिनी वर्तते। अत्र निहितो भावोऽयमस्ति यत् तृणेन दंशस्थाने घर्षिते दंशस्थाने संलग्नं विषं तृणे स्थानान्तरितं भविष्यति तत्पश्चात् सर्पदिशि तृणे प्रक्षिप्ते तद्विषं पुनः सर्पे प्रवेक्ष्यति।

७,१०० (१०५) अस्मिन् सूक्ते एक एव मन्त्रः। ऋषिः कथयति "पर्यावर्ते दुष्वप्न्यात्पापात्स्वप्न्यादभूत्याः। ब्रह्माहमन्तरं कृण्वे परा स्वप्नमुखाः शुचः" ॥१॥ दुःस्वप्नानान्तथानिष्टसूचकानां निवारणार्थमयं मन्त्रो स्पष्टतया अलौकिकशक्तिसम्पन्नोऽस्ति।

१४, २, १९ कौ० सू० ७७, १६ अनुसारं नवागता वधूः स्वगृहेऽनेन मन्त्रेण सह जलं प्रकिरति। एतैरादेशात्मकशब्दैः जलप्रकिरणैः सा निर्ऋतिमरातिञ्च दूरगमनायावरुणद्धि।

---

(३७) सं ते हन्मि दता दतः समु ते हन्वा हनू।
सं ते जिह्वया जिह्वां सम्वास्नाह आस्यम् ॥ मन्त्रः ३ ॥
सम्भवतोऽत्र सर्पदन्तादि त्रोटनार्थं प्रयुक्ता दन्तहन्वादयो शब्दा अस्मिन्नभिचारं प्रयुक्तेन केनचित् पदार्थेन यन्त्रेण वा सम्बन्धिताः सन्ति। (द्रष्टव्यम्—ह्विटनी कृताथर्ववेदानुवादं पृष्ठम् ३२३, पादटिप्पणी)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मन्त्र एवमस्ति —

"उत्तिष्ठेतः किमिच्छन्तीदमागा अहं त्वेडे अभिभूः स्वाद्गृहात्। शून्यैषी निर्ऋते। याजगन्धोत्तिष्ठाराते प्र पत मेह रंस्थाः ॥"

अपि च : २, १ (विष्कन्धस्य कृते तथापरेषां दोषाणां कृते ६, १८ (ईर्ष्या) ६, ६० (अन्नविनाशकानां विरुद्धम्) ६, ६३ (निर्ऋतेर्मुक्तिः) ६, १०६ गृहाग्निदाहविरुद्धम्), ७, २३ (२४) दुःस्वप्नविरुद्धम् ७, ६५ (६७) दुष्कृतं शमनम्, ७, १०० (१०५) दुःस्वप्नविरुद्धम् ७, ११५ (१२०) पापलक्षणनाशनम्; १२, २ : यक्ष्ममृत्युनाशादीनां निवारणार्थम्; १४, २, ४१, ४८, ४६ राक्षसेभ्यः कृत्याभ्यः पाशेभ्यश्च विमुक्तिः, १६, ५७ दुःस्वप्ननिवारणं तथा तस्य शत्रावारोपः।

(ख) वरुणपाशान्मुक्तिः

१, १० इदं वरुणक्रोधात्कस्मैचित् मुक्तिसम्बद्धमस्ति। यद्यपि "द्वितीये मन्त्रे वरुण प्रार्थना कृतास्ति तथापि शेषमन्त्रेषु तत्पाशान्मुक्तिप्राप्तये ब्रह्मशक्तिप्रदर्शनमात्रं लक्षितं भवति। कौ० सू० इदं दर्भपिञ्जुलीमिश्रितजलेन शिरसि विकिरणक्रियया सह उपशमनार्थकानुष्ठाने (Lealing ceremony, सायणानुसारं जलोदरे) प्रयुक्ते।

(ग) शत्रूणां राक्षसादीनाञ्च विरुद्धम्

१, १६ इदं सूक्तं सीसेन विष्कन्धपिशाचभक्षक (अत्रिणः) शत्रूणां पराभवेन नाशेन च सम्बद्धमस्ति। यद्यपि प्रथमे मन्त्रेऽभिचारस्य नाशकरूपेणाग्निर्वर्णितोऽस्ति, इन्द्राय, वरुणाय अग्नये च सीसप्रदानश्रेयो दत्तमस्ति तथापि सम्पूर्णरूपेणास्मिन् सूक्ते विष्कन्धस्य तथा अन्यशत्रूणां विरुद्धं सीसस्य यात्विकशक्तिः प्रकटिता अस्ति।

१, २७ इदं सूक्तं विभिन्नानां पापात्मनाम् अघायूनां विरुद्धम् अस्ति। अत्रैषां दुरात्मनां प्रत्यक्षरूपेणैव विरोधः कृतो वर्त्तते तथा नानाप्रकारेण तेषामहितस्य नाशस्य च वार्ता कथिता। वर्त्तते।

१, २८ : इदं यातुधानानां राक्षसीनां च विरुद्धं वर्तते। प्रथमे मन्त्रद्वये राक्षसानां रोगाणाञ्च नाशकरूपेण भस्मीकरणार्थमग्नेरावाहनं कृतमस्ति। तत्पश्चाद् द्वौ मत्रौ अभिचारिकौ तथा शापौ स्तः —

"या शशाप शपनेन याघं मूरमादधे।
या रसस्य हरणाय जातमारेभे तोकमत्तु सा ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

पुत्रमत्तु यातुधानीः स्वसारमुतनप्त्यम् ।
अधा मिथो विकेश्यो विघ्नतां यातुधान्यो वितृह्यन्तामराय्यः ॥ ४ ॥

२, ७ : शापस्य तथा शप्तृणाञ्च विरुद्धमस्ति। एकेन शापमोचकौषधिना सर्वे शापास्तथैव दूरीक्रियन्ते यथा जलं मलमपनयति। ओषधिं सम्बोधयन् विरोधिशापदलनार्थं तथा स्वसंतत्या सम्पत्या च सह स्वरक्षणकामना कृताऽस्ति। अन्ते च शप्तारं प्रतिगमनाय, दुर्हार्दपेषणाय कथितमस्ति।

२, १२ इदं सूक्तं मन्त्रविरोधिनां विरुद्धमस्ति। मनःक्षतिकृतां विरुद्धं शापानां वर्षणं कृतमस्ति। यद्यपि कुत्रापि ब्रह्मद्विषद्भ्यो दण्डदानाय देवाः प्रार्थिताः। किन्तु शेषमन्त्रेषु प्रत्यक्ष-रूपेणापराधिषु अभिचारप्रयोगः कृतोऽस्ति। उदाहरणार्थं अन्त्यौ द्वौ मन्त्रौ द्रष्टव्यौ स्तः[१]।

कौशिके सूत्रे ४७, १२ इत्यत्राभिचारकर्मण्येकस्य वेणुदण्डस्य छेदनं विहितम् तथा द्वेष्यनिषूदनाख्ये कर्मणि पलायमानस्य शत्रोः पादक्षेपस्थानोपरि पत्राणां प्रक्षेपोऽनन्तरं च तेषां खनित्रेण शातनं विहितमित्यादि।

२, १४ दस्युनाशनप्रसङ्गे "सदान्वानां" प्रतिकूलमिदं प्रकरणम्। तत्र बहुभिरोजस्वि-वचनैः गृहात्, गोष्ठात्, अन्यस्माच्च स्थानात् "सर्वाश्चण्डस्य नप्त्यो नाशयामः सदान्वाः" "नश्य-तेतः सदान्वाः" इत्याद्युक्त्वा सदान्वानां नाशः क्रियते। यद्यपि चतुर्थे मन्त्रे भूतपते इन्द्रस्य च साहाय्यस्य कामना कृता विद्यते तथापि सम्पूर्णस्य सूक्तस्य भाव एक एवास्ति। अग्रेऽपि स्वसा-मर्थ्यस्य प्रभावेण तान् पलायितुं बहुधा कथितमस्ति ॥[२]

२, २४ "शेरभक शेरभ पुनर्वो यन्तु यातवः पुनर्हेतिः किमीदिनः" इत्याद्यारभ्यात्रेमान् शत्रून्प्रत्युक्तं यूयं स्वप्रेषकं प्रति गत्वा तं खादत अथवा स्वमांसानि खादत इति। "तमत्त स्वा मांसान्यत्त"।

---

(१) सप्त प्राणानष्टौ मन्यस्तांस्ते वृश्चामि ब्रह्मणा।
अया यमस्य सादनमग्निदूतो अरंकृतः ॥ मन्त्रः ७ ॥
आ दधामि ते पदं समिद्धे जातवेदसि।
अग्निः शरीरं वेवेष्ट्वसुं वागपि गच्छतु ॥ मन्त्रः ८ ॥

(२) यदि स्थ क्षेत्रियाणां यदि वा पुरुषेषिताः।
यदि स्थ दस्युभ्यो जाता नश्यतेतः सदान्वाः ॥ ५ ॥ इत्यादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अत्र प्रथमस्य मन्त्रस्यावृत्तिः सम्पूर्णे सूक्ते कृता विद्यते। कौशिके सूत्रे १६, ६-१३ इत्यत्र सामुद्रे नामकेऽनुष्ठाने अस्य सूक्तस्योपयोगो विहितः। किन्तु सायणाचार्यः सूक्तमिदमभद्रवारणाय वक्ति।

२, २५ सूक्तेऽस्मिन् देवानां साहाय्यं कृपां चानपेक्ष्य "पृश्निपर्णी" इति नामिकाया ओषधेः प्रयोगोऽभिचारकर्मणि कृत्वा वाञ्छितस्य फलस्यावाप्तिर्निरपेक्षरूपेण कृताऽस्ति। चित्रपल्लवा इयं पृश्निपर्णी उग्रा कण्वजम्भनी इति नाम्ना उक्ता। अस्याः प्रयोगेण दुर्णाम्नां शिरोवृश्चनमुक्तम्—

"तयाहं दुर्णाम्नां शिरो वृश्चामि शकुनेरिव" ॥ २ ॥

पुनश्च ३, ४, ५ मन्त्रेषु रक्तपं स्फातिं नाशयितुं तथा गर्भादान् कण्वान् पराभूय पर्वतेषु आवेशयितुं पृश्निपर्णी ओषधिः प्रार्थिता भवति। अन्ते चोक्तम्—"तमांसि यत्र गच्छन्ति तत्क्रव्यादो अजीगमम्"।

२, ३१ अस्मिन् सूक्ते इन्द्रस्य दृषदा क्रिमयः खल्वानिव पिष्टा भवन्ति। अनन्तरमग्रिमेषु मन्त्रेषूपवर्णितं यद् वनेषु, पर्वतेषु, पशुषु, ओषधीषु, जलेषु, शरीरस्य प्रत्येकस्मिन्नङ्गेषु च वर्तमानान् दृश्यादृश्यान् क्रिमीन् वचसा नाशयामीति (मन्त्राः १-५)। अत्रापि देवादीनां साहाय्यमनपेक्ष्यैव सर्वं साध्यते।

२, ३२ अस्मिन्नति सूक्ते क्रिमिनाशप्रसङ्गेन पूर्वमादित्यस्यावाहनं क्रियते। किन्त्वग्रे प्रत्यक्षाभिचारप्रयोगो दृश्यते। तृतीये मन्त्रे कण्वजमदग्न्यगस्त्यानां पुरातनानाम् ऋषीणां साहाय्येनैषां क्रिमीणां नाश उक्तः। पुनश्चोपसंहारे उक्तम्—

प्र ते शृणामि शृङ्गे याभ्यां विदुदायसि।
भिनद्मि ते कुषुम्भं यस्ते विषधानः॥

३, ६ खदिरवृक्षोपरि समुत्पन्नस्याश्वत्थस्य साहाय्येन शत्रून् हन्तुमत्र प्रार्थना कृताऽस्ति।

पुमान् पुंसः परिजातोऽश्वत्थः खदिरादधि।
स हन्तु शत्रून् मामकान् यानहं द्वेष्मि ये च माम्॥
तानश्वत्थ निः शृणीहि०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

खद स्थैर्ये हिंसायाञ्चेत्यस्मात् किरचि निष्पन्नस्य खदिरशब्दस्य हिंसक इत्यर्थो भवितुमर्हति तथा अश्वत्थे अग्निनिवासो भवतीति प्रसिद्धिः। अतः खदिरोपरि जातोऽश्वत्थः शत्रून् भस्मसात् कर्त्तुं प्रभविष्यतीति भावनयाऽत्राभिचारकर्मणि तस्य सहायता प्रार्थिता।

३, २७ इदमपि सूक्तं शत्रुनिवारणसम्बन्धि, किन्त्वस्य रूपं प्रार्थनापरमतोऽस्यात्र विशदं विवेचनं न क्रियते। कौशिके सूत्रे तु ३, २६; ३, २७ सूक्ते "दिग्युक्ते" इति निर्दिष्टे तथा शत्रुसैन्योपरि विजयप्राप्तये तथा सौभाग्यावाप्तये अनयोरनुष्ठानमुक्तम्। वेबर, ग्रिफिथ, महोदयाविमे सूक्ते सर्पसम्बन्धिन्यभिचारे उक्तवन्तौ। कौ० सूत्रे ५०-१७ इत्यत्रेमे सूक्ते ६-५६ तथा १२-१-४६ इत्यस्य सम्बन्धिनी इत्युक्तं यत्र सर्पविरोधिप्रयोगः।

४-१६-८-९ सूक्तेऽस्मिन् वरुणस्य सातिशयं प्रशंसनं विद्यते, किन्तु यातुकर्मण्यस्योपयोगेन किंचिद्विवावरमस्य स्थानं जातम्। रॉथ महोदयस्तु कथयति सम्पूर्णे वैदिके वाङ्मये नास्त्येतत् समं सूक्तं कुत्रापि यस्मिन् देव्याः शक्तेरीदृशं सर्वसाक्षित्वमुपवर्णितं भवेदिति। सत्यानृतसमीक्षाप्रसङ्गेनात्रोक्तमनृतवादी वरुणपाशपतितो भवेत्सत्यवादी च मुक्तः तद्यथा—

"ये ते पाशा वरुण सप्त सप्त त्रेधा तिष्ठन्ति विषिता रुषन्तः।
छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु" ॥६॥

सूक्तेऽस्मिन् वरुणस्य विवेकदृष्टेरभिनन्दनमुच्चैस्तरेण कृतम्। किन्तु अन्तिमे मन्त्रे शत्रुं प्रति शापः, येन सः वरुणपाशबद्धो भवेदिति।

अत्रोक्तं रॉथमहोदयस्य मतं एस० बी० ई० ग्रन्थमालायां प्रकाशिते ब्लूमफील्डस्य पुस्तके ४२ भागे ३८९ पृष्ठे वर्णितं विद्यते।

६, १३५ : अत्र संवेदनात्मकस्य सहानुभूत्यात्मकस्य वा यातोर्निदर्शनं विद्यते। स्वस्य भोजनेन पानेन संगिरणेन च शत्रोर्विनाशः परिकल्पितोऽत्र भवति।

यदश्नामि बलं कुर्व इत्थं वज्रमा ददे।
स्कन्धानमुष्य शातयन् वृत्रस्येव शचीपतिः॥ १॥
यत्पिबामि सं पिबामि समुद्र इव संपिबः।
प्राणानमुष्य संपाय सं पिबामो अमुं वयम्॥ २॥
यद् गिरामि सं गिरामि समुद्र इव संगिरः।
प्राणानमुष्य संगीर्य सं गिरामो अमुं वयम्॥ ३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

७, १३ (१४) शत्रुनाशसम्बन्ध एवेदमपि सूक्तम्। अत्र द्वावेव मन्त्रौ स्तः। मन्त्राभ्यामाभ्यां शत्रोर्वर्चसः तेजसश्चापहरणं क्रियतेऽतोऽभिचारात्मकमिदं सूक्तं कथ्यते। तत्राद्यो मन्त्रः —

"यथा सूर्यो नक्षत्राणामुद्यंस्तेजांस्याददे।
एवा स्त्रीणां च पुंसां च द्विषतां वर्च आ ददे॥

७-५६ (६१) सूक्तेऽस्मिन् केवलमेक एव मन्त्रोऽरिविनाशसम्बन्धी वर्त्तते। तत्रोक्तं यो ह्यस्मभ्यमशपद्भ्यः शपति सः विद्युता हतः वृक्ष इव समूलं नश्यत्विति।

यो नः शपादशपतः शपतो यश्च नः शपात्।
वृक्ष इव विद्युता हत आ मूलादनु शुष्यतु॥ १॥

६-५-३१ : यो वै नैदाघं नामर्तुं वेद।

एष वै नैदाघो नामर्तुर्यदजः पञ्चौदनः।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति॥ ३१॥

अत्र नैदाघर्तोः "पञ्चौदनो अजः" इत्यपरां संज्ञां विधायोक्तं यः तं ददाति सः सपत्नस्य श्रियं दहतीति। इत्थमत्र यातुकर्मसिद्धिरुक्ता। तत्र निदाघशब्दो "नि" उपसर्गपूर्वकाद् 'दह' धातोर्निष्पन्नो यस्य चार्थ एव दाहः इत्यर्थसाम्यादत्र यातुसम्बन्ध्यर्थः सिद्ध्यति। एवमेवास्मिन्नेव सूक्ते ३२-३६ इत्यत्रापि द्रष्टव्यम्।

१०-१ सूक्तमिदं कृत्यायाः तत्प्रयोक्तुश्च विषये वर्त्तते। अत्र कृत्यास्वरूपमुक्त्वा तां कृत्यां मन्त्रौषधिबलेन परावृत्य प्रयोक्तुः समीपं सम्प्रेष्य तस्यैव नाशाय विधानमस्ति। इत्थमत्र पूर्वं मन्त्रौषधिभ्यां यातुकर्मणः सिद्धिमुक्त्वाऽपि २१-२३ मन्त्रेषु—इन्द्राग्नी अस्मान् रक्षतां यौ प्रजानां प्रजावती" इत्यादिना देवसाहाय्यमपि कृत्याविनाशाय प्रार्थितम्। कृत्या कीदृशी भवति तदर्थमिमे मन्त्रा द्रष्टव्याः।

शीर्षण्वती नस्वती कर्णिनी कृत्याकृता संभृता विश्वरूपा।
सारादेत्वप नुदाम एनाम्॥२॥
शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता।
जाया पत्या नुत्तेव कर्त्तारं बन्ध्वृच्छतु॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

चतुर्थे च मन्त्रे—"अनयाहमोषध्या सर्वाः कृत्या अदूदुषम् ।

यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ॥४॥ इत्यादि

कथयित्वा १८ मन्त्रे "यां ते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः" इत्यादि तस्या विनाश उक्तः । अन्ते च "अमून् कृत्याकृतो जहि" इति स्पष्टमुक्त्वा शोभना परिसमाप्तिः कृता—

"यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहात्युषसश्च केतून् ।

एवाहं सर्वं दुर्भूतं कर्त्रं कृत्याकृता कृतं हस्तीव रजो दुरितं जहामि ॥३२॥

१०, ५ अत्र शत्रुनाशाय प्रतीकात्मकस्यैकस्य यातुसम्बन्धिनोऽनुष्ठानस्य वर्णनमस्ति । अत्रानुष्ठाता जलात्मकेन वज्रेण शत्रुमाहन्ति । (मन्त्राः १५, २१, ४२, ५०) विष्णोः पादविक्षेप इवाहं क्रमे इति अनुष्ठाता वदति (२५, २६ मन्त्राभ्याम्) ।

तदनन्तरं सः घोषयति—

"जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकं यज्ञोऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ।

तस्मादमुं निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः । स ग्राह्याः पाशान्मा मोचि ।

तस्येदं वर्चस्तेजः प्राणमायुर्निवेष्टयामीदमैनमधराञ्चं पादयामि ॥ मंत्रः १६.८.१ ॥

विष्णोः क्रमोऽसि सपत्नहा पृथिवीसंशितोऽग्नितेजाः ।

पृथिवीमनु विक्रमेऽहं पृथिव्यास्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः स मा जीवीत्तं प्राणो जहातु ॥२५॥१॥

प्रतीकात्मकैरेभिः क्रमैः पृथ्वीं द्यामन्तरिक्षं दिशं सर्वमपि क्षेत्रं तथा ऋचः यज्ञं जलम् ओषधिं श्वासादिकं चाभिव्याप्य सर्वेभ्य एतेभ्यः शत्रुम् अपसारयति । ततश्च पठति मन्त्रमिमम्—

"जितमस्माकमुद्भिन्नमस्माकमभ्यष्ठां विश्वाः पृतना अरातीः । इदमहमामुष्यायणस्यामुष्याः पुत्रस्य वर्चस्तेजः प्राणमायुर्निवेष्टयामीदमेनमधराञ्चं पादयामि ॥मन्त्र ३६॥१॥

१६, ७-६ अत्रानुष्ठानकर्त्ता शत्रुं विपद्भिर्विघ्नैरसफलतादिभिश्चाभिव्याप्तं करोति । सः तं वैश्वानरस्य दंष्ट्रयोर्मध्ये निपातयति येन सः निगीर्णो भवेत् । अनन्तरं च तस्मै शापं ददाति—

"योऽस्मान् द्वेष्टि तमात्मा द्वेष्टु यं वयं द्विष्मः स आत्मानं द्वेष्टु" इति । सः शत्रुं त्रिभ्यो लोकेभ्यो निष्कासयति तथा मन्त्रेण सह शत्रोर्नामसंयोगं कृत्वा स्वकीयान् दुःस्वप्नान् तं प्रति प्रेषयति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

"इदमहमामुष्यायणेऽमुष्याः पुत्रे दुःस्वप्नयं मृजे" ॥८॥

सः शत्रुं स्वयं भुक्तैः पदार्थैः सह वियुनक्ति। तदनन्तरं सः घोषयति—"यज्ञोऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् तस्मादमुं निर्भजामो।"

इत्थमत्रानुष्ठाता यातुकर्मणा शत्रुनाशं सम्पादयति।

एवमेव—४, २० यातुधानस्यान्वेषणम्, ४, ३६ शत्रवः पिशाचाश्च, ४, ३७ अतिमानुषाः शत्रवः ४, ४० विभिन्नक्षेत्रीयाः शत्रवः, ५, २३ क्रिमयः, ६, ३७ शप्तारः, ६, ३५ शत्रुम्प्रति साफल्यम् ६,७५ प्रतिद्वन्द्विनोऽपसारणम्, ६, १०४ शत्रुबन्धनम् ६, १३८ क्लीबकरणम्, ७, ५९ (६१) शप्तारः, ७, ७० (७३) शत्रुयज्ञः, ७, ९० (९५) शत्रोर्बलनाशः, ७, ९५ (१००); ११४ (११६) १०, ६; ११, १, १२, २१, १४, २, ४१, शत्रुविरोधिनो मन्त्राः; १५, ३, १०-११ दासीकरणम्; १६, ३६ दुर्णाम्नां गन्धर्वाणां च प्रतिकूलम् इत्यादि द्रष्टव्यम्। तथा २, ११; ४, १८; ५, १४; ५, ३१; ८, ५ शत्रोः कृत्याम्प्रति—सर्वमेतद् विलोकनीयम्।

गोपथब्राह्मणम्

अथर्ववेदस्य वास्तविकं विधानादिकं कौशिकसूत्रे समुपवर्णितं न तु गोपथब्राह्मणे अथवा वैताने सूत्रे। उभयोरप्यनयोर्ग्रन्थयोः सातिशयमयमाशयो यदथर्ववेदः ब्रह्मणः पुरोधसो वेदोऽस्ति। अतो गोपथब्राह्मणस्यात्रोद्धृता सामग्री ऋग्यजुः सामविधानैः सम्बद्धा ज्ञेया—

(१) पुष्टिकर्माणि

(क) प्रजाः पशवश्च

२, २, १ अत्राग्निष्टोम-प्रसङ्गेनोक्तं यत् प्रजाकामः पशुकामश्च यजमान ऐन्द्रम् आग्नेयञ्च पशुम् आलभेत इति। इन्द्रोऽग्निश्च क्रमशः प्राणापानौ तथा प्रजाः पशवश्च प्राणापानाभ्यां सहैवोत्पद्यन्ते। इत्थमनेन सविशेषेण पश्वालम्भनेन यजमानः प्रजाभिः पशुभिश्च युक्तो भवति। प्रजाकामी अस्मिन्नेव खण्डेऽग्रेऽस्यैवोद्देश्यस्य पूर्त्यैऽपरस्य काम्यपशोर्विधानं विद्यते। प्रजाकामी त्वष्ट्रा सम्बद्धां बडवामेकामालभेत प्रजापतिश्चैकदा बडवालम्भनद्वारा प्रजा उत्पादयामास मिथुनं चावाप्तवान्। एवं यो हीमामिष्टिं समाचरति सः प्रजया मिथुनेनापि च संयुक्तो भवति।

२, ३, ३, अत्र प्रजाकामिनः पशुकामिनश्च कृते धामच्छदवषट् प्रयोगो निर्दिष्टः।

एवम्—१, ४, १०, ११, १२, १५; १, ५, २०; २, १, ४, २, ३, २; २, ३, ४; २, ४, ५, ७; २, ६, १; ५, १२, १५ स्थलान्यपि द्रष्टव्यानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

ऋद्धिः

२, १, ७, यथैकदा देवा ब्रह्मौदनद्वारा असुरान् पराजितवन्तः, तथैव भूतार्थस्यास्य वेत्ता यः ब्रह्मौदनं पचति स ऋद्धिं प्राप्नोति तथा तस्य विद्विष्टो रिपुः पराजितो भवति।

(ख) आयुष्यम्

२, २, १ अत्रायुष्ट्वार्थम् इन्द्राग्निभ्यां सम्बद्धस्य पशोरालम्भनं निर्दिष्टम्। इन्द्राग्नी क्रमशः प्राणापानौ, तथा चास्य विशेषस्य पशोरालभनेनानुष्ठाता स्वस्मिन्नेव सहानुभूतिकेन यातु-रहस्येन प्राणापानौ प्रतिष्ठापयति।

२, ३, ५ अत्रोक्तं वषडित्यस्योच्चारणेन साकमेव वाक्प्राणापानाः होतारं परित्यज्य प्रयान्ति। अस्य दोषस्य वारणाय होता "वागोजः सहौजो मयि प्राणापानौ" इति मन्त्रस्य जपं करोति। अस्य परिणामभूतं सः वाचा प्राणेनापानेन च संयुक्तः पूर्णमायुः प्राप्नोति। अत्र मन्त्रेणानेन भौतिकस्यार्थस्य सिद्धिः कृता।

अस्मिन्नेव प्रसङ्गे २, २, १६ इत्येतावपि द्रष्टव्यौ।

(ग) सर्वकामतृप्तिः

अत्र चातुर्मास्ययज्ञानां शक्तेरुत्कर्षं द्योतयतोक्तं यदिमे प्रजापतयः संवत्सराणि च सन्ति। "सर्वं वै प्रजापतिः सर्वं च यज्ञम्"। तथा च यो हीदं सत्यं जानाति, इमान् यज्ञांश्च सम्पादयति सः सर्वं लभते।

इत्थमेव २, २, १८ इत्यपि द्रष्टव्यम्।

(घ) राज्यम्

२, १, १८ अयं राजा भवेत् राज्याधिकारांश्चावाप्नुयादिति कामयेत चेत्तम् अप्रतिरथ-मन्त्रोच्चारणेन सह शस्त्रैः सज्जितं कुर्यात्। एवमनुष्ठानेन सः राज्याधिपत्यं लभते।

२, ३, ३ पुरोधाः कामयेत चेदयं यजमानः श्रेयान् स्यादिति तर्हि सः सर्वप्रथममेतदर्थं निर्दिष्टान्मन्त्रान् मन्दस्वरेणोच्चारयेत्। अनन्तरं च वषड्उच्चारणमुच्चैः कुर्यादिति। एवमनुष्ठानेन सः श्रैष्ठ्यं लभते।

(२) शत्रोः प्रतिकूलानि कृत्यानि

२, १, १८ अत्रोक्तं यथैव पूर्वमिन्द्रोऽप्रतिरथेनासुरानजयत्तथैवास्य प्रयोक्ताऽप्रतिरथो भवति शत्रून् पराभूयेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

२, २, ७ अत्राग्निष्टोमप्रसङ्गेनैकमाख्यानमुपवर्णितम्। यथाहि–देवाः पूर्वम् असुरान् लोकेभ्योऽपसारितवन्तः तथैवोपसदकर्मणां ज्ञाता तदाचरन् लोकेभ्यः स्वशत्रून्नाशयति।

२, ३, ३ अत्र शत्रवे वज्रवषट्कारप्रयोगो विहितः। अनेन वषड्डुच्चारणेन द्वेष्यं रिपुं प्रति वज्रप्रहार इव क्रियते। अस्मिन्नेव खण्डे कञ्चन द्वेष्यं दुर्दैवाक्रान्तं कर्त्तुं प्रयोग उक्तः। एतदर्थं सः प्रथमं तु ऋचमुच्चैरुच्चारयेदनन्तरं मन्दं वषडिति कुर्यात्। एवमनुष्ठानेन सोऽभीष्टं नरं महता दौर्भाग्येन योजयति।

अस्मिन्नेव प्रसङ्गे २, २, २, २, २, ६, २, २, १६ (रक्षांसि) इमानि स्थलान्यपि द्रष्टव्यानि भवन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

सप्तमोऽध्यायः

उपसंहारः

इतः पूर्वं षट्स्वध्यायेषु प्रतिपादितेन विषयेणेदं स्पष्टं यत् "केवलमथर्ववेद एव यातु-विषयको वेदः" इति पाश्चात्यविदुषां मतं न युक्तम्। यद्यपि ऋग्, यजुः सामवन्नायमथर्वा सर्वथा यज्ञपरकस्तथापि प्राचुर्येणायमन्यैर्वेदैः साकं साम्यं भजते। यैरभिचारकृत्यैरयमाधुनिके युगे समुपेक्षितोऽवरश्च गण्यते, तान्यभिचारकृत्यादीनि त्रयीष्वपि पूजार्हासु श्रुतिषु समुपलभ्यन्ते। अथर्ववेदस्य द्वेष्यो भावो 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' अन्येषु वेदेष्वपि परिलक्ष्यते।

सत्यमयमथर्वा मुख्यत्वेन शान्ति-पुष्टिकृत्यैः संबद्धः। किन्तु यथा सविस्तरं पूर्वेष्वध्यायेषु (२-६) प्रदर्शितं नैतानि त्रयीषु दुर्लभानि। तत्रास्ति मात्राभेदमात्रम्। अत इदं सहजेनैवानुमातुं शक्यं यन्नास्त्ययमथर्वा सर्वथा भिन्नः ऋग् यजुः सामभिरिति। वेदानामध्ययनेन सम्यगिदमवगम्यते यदभीष्टं किञ्चिदवाप्तुं स्तुतिषु, यज्ञेषु, चास्त्यपूर्वा काचिद् रहस्यमयी शक्तिः। देवा अप्यस्याः शक्तेः साहाय्यमगृह्णन्। ऋग्वेदसंहितायाम् ऋषिर्विश्वामित्रो वदति यत् सः भारतान् जनान् स्वीयेन स्तुतिसामर्थ्येन ररक्ष[1] इति। द्वितीया तावदियं कोटिः यन्नास्ति तत्रान्तरं धर्मस्य यातोश्च शक्त्योः। केषुचित् प्रयोगेषु तु दानवानप्यनुकूलयितुं यत्नः कृतो वर्तते (अथर्वसंहिता १-२६, ५-७, ५-२२, ६-१३) तथा रुद्रवरुणसदृशदेवेभ्योऽपि तथैव भयमाशङ्क्यते यथा दानवेभ्यः, यतो हि क्रुद्धा एतेऽपि तथैव क्षतिं कर्तुं प्रभवन्ति यथा दानवाः। वेदेषु यातोरप्याधार उपासनैवासित। तृतीया तावदियमावश्यकी कोटिः यदत्राथर्वणि बहुधा धर्मस्य यातोश्च विषय एकस्मिन्नेव सूक्ते किंबहुना, एकस्मिन्नेव मन्त्रे सम्पृक्तो दृश्यते (अथर्वसंहिता १-६, ३-११, ४-१३, ४-४०, १६-३४,४४ इत्यादि)।

यातुप्रयोक्ता देवप्रसादमाकाङ्क्षते। किन्तु सहैव सओषधीनां रक्षा-करण्डानां, मन्त्राणां, अनुष्ठानानाञ्च माध्यमेन संप्राप्तां स्वकीयां शक्तिमपि न विस्मरति। विशुद्धयातुसूक्तानां संख्याऽथर्वणि नास्ति महती (अथर्वसंहिता–५-१६)। प्रयोक्ता प्रथमं मणिमौषधिं वा प्रसादयितुं

---

(१) "विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम्"।

(ऋ० वे० सं० ३.५३.१२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

यतते येन तस्य कार्यसिद्धिः स्यादनन्तरं सः तां शक्तिं स्वस्मिन्नेव कल्पते (अथर्वसंहिता ४, १८, ३७; ८, ७; १६, २०)। कदाचिच्च यातुकर्तुर्मन्त्रोच्चारणम्, ओषधिश्च—इत्युभयोः साहाय्येन सिद्धिः सञ्जायते। अस्योदाहरणत्वेन प्रस्तूयतेऽयं मन्त्रः—

त्वमसि सहमानोऽहमस्मि सहस्वान्।
उभौ सहस्वन्तौ भूत्वा सपत्नान्त्सहिषीवहि॥
(अ० वे० सं० १६, ३२, ५)

अत्र दर्भमुद्दिश्य यातुकृत् कथयति—'त्वञ्च अहञ्चोभावपि शक्तिमन्तौ—अतः आवामुभौ मिलित्वा शत्रून् जयावः'।

यद्यपि प्रस्तुतं प्रबन्धमनुरुध्य धर्मस्य यातोश्च मध्ये मया फ्रेजरमहाशयेनोपस्थापितो भेदोऽङ्गीकृतः। किन्तु वैदिकं वाङ्मयं विमृशतामयं भेदोऽकिञ्चित्करः। बलान्नियोजनम्, प्रसादनम्, आत्मसमर्पणम्—इति कोटीरुद्दिश्य यातोः धर्मस्य च मध्ये भेदः कर्त्तुं न शक्यते। अत्र पाश्चात्त्यविदुषो मैरेटमहाशयस्य विचारा विमृश्याः (थ्रेशोल्ड ऑफ रिलिजन—१६१४ पृ० ३०)। सः प्रतिपादयति यद् उभयोरपि धर्मयात्वोः कृते "अलौकिकत्वम्" आधारभूतपदार्थः। एका भ्रष्टा, विकृतिं प्राप्ता स्तुतिः शापरूपेण तथा-एतद्विरुद्धं शापश्च क्रमशः स्तुतिरूपेण विपरिवर्तितो भवितुमर्हति। करणभूतसाधके चेतनत्वारोपः तथा तस्य देवत्वकरणः शनैः शनैः यथा सुस्पष्टो भवति, तस्य शापोऽपि स्वभावतः प्रार्थनायां परिणतो जायते। अग्रे पुनः सः कथयति—"प्रार्थना कदाचिच्छलछद्म भवितुं शक्नोति कदाचिच्च "छलछद्म" आच्छादयितुं? शिष्टाचारविनयस्वरूपा", अतः बलान्नियोजनम्, प्रसादनञ्चाधारीकृत्य व्यावहारिकरूपेण धर्मयात्वोर्मध्ये विभाजिका काचनरेखा कर्त्तुमशक्या।

अस्माकं भारतीयानां कृते तु विषयोऽयमतीव कठिनः, यतो हि भारतीया हिन्दव बहोः प्राचीनकालाद् "आचारः परमो धर्मः" सद् आचरणं व्यवहारं धर्मं मन्वते, न तु स्तुत्युपासनादिमात्रम्। वेदकालिका आर्या धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु त्रयाणां धर्मार्थकामानां कृते यागादीन् महान्ति साधनानि मन्यन्ते स्म। चतुर्थो मोक्षाख्यस्तु ज्ञानकाण्डस्योपनिषदो विषय आसीत्। अतो यदि वयं धर्मयात्वोर्मध्ये भेदं विधातुमित्थं स्वीकुर्मः यद् मैजिके दिव्याशक्तिः विधिकर्मणि (रिचुअल) तिष्ठति या कल्पितसाध्यसाधनयोर्मध्ये केनापि हेतुभूतेन सम्बन्धेन घटनाचक्रं प्रभावयितुं तथा परिवर्तयितुं प्रवर्वते तर्हि समस्तं वैदिकं वाङ्मयं केवलं यातुमयमेव जायते धर्मस्य च क्षेत्रम् अतीव सङ्कीर्णमिव भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

सप्तमोऽध्यायः

उपसंहारः

इतः पूर्वं षट्स्वध्यायेषु प्रतिपादितेन विषयेणेदं स्पष्टं यत् "केवलमथर्ववेद एव यातु-विषयको वेदः" इति पाश्चात्यविदुषां मतं न युक्तम्। यद्यपि ऋग्, यजुः सामवन्नायमथर्वा सर्वथा यज्ञपरकस्तथापि प्राचुर्येणायमन्यैर्वेदैः साकं साम्यं भजते। यैरभिचारकृत्यैरयमाधुनिके युगे समुपेक्षितोऽवरश्च गण्यते, तान्यभिचारकृत्यादीनि त्रयीष्वपि पूजार्हासु श्रुतिषु समुपलभ्यन्ते। अथर्ववेदस्य द्वेष्यो भावो 'योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' अन्येषु वेदेष्वपि परिलक्ष्यते।

सत्यमयमथर्वा मुख्यत्वेन शान्ति-पुष्टिकृत्यैः संबद्धः। किन्तु यथा सविस्तरं पूर्वेष्वध्यायेषु (२-६) प्रदर्शितं नैतानि त्रयीषु दुर्लभानि। तत्रास्ति मात्राभेदमात्रम्। अत इदं सहजेनैवानुमातुं शक्यं यन्नास्त्ययमथर्वा सर्वथा भिन्नः ऋग् यजुः सामभिरिति। वेदानामध्ययनेन सम्यगिदमवगम्यते यदभीष्टं किञ्चिदवाप्तुं स्तुतिषु, यज्ञेषु, चास्त्यपूर्वा काचिद् रहस्यमयी शक्तिः। देवा अप्यस्याः शक्तेः साहाय्यमगृह्णन्। ऋग्वेदसंहितायाम् ऋषिर्विश्वामित्रो वदति यत् सः भारतान् जनान् स्वीयेन स्तुतिसामर्थ्येन ररक्ष[1] इति। द्वितीया तावदियं कोटिः यन्नास्ति तत्रान्तरं धर्मस्य यातोश्च शक्त्योः। केषुचित् प्रयोगेषु तु दानवानप्यनुकूलयितुं यत्नः कृतो वर्तते (अथर्वसंहिता १-२६, ५-७, ५-२२, ६-१३) तथा रुद्रवरुणसदृशदेवेभ्योऽपि तथैव भयमाशङ्क्यते यथा दानवेभ्यः, यतो हि क्रुद्धा एतेऽपि तथैव क्षतिं कर्त्तुं प्रभवन्ति यथा दानवाः। वेदेषु यातोरप्याधार उपासनैवासित। तृतीया तावदियमावश्यकी कोटिः यदत्राथर्वणि बहुधा धर्मस्य यातोश्च विषय एकस्मिन्नेव सूक्ते किंबहुना, एकस्मिन्नेव मन्त्रे सम्पृक्तो दृश्यते (अथर्वसंहिता १-६, ३-११, ४-१३, ४-४०, १६-३४,४४ इत्यादि)।

यातुप्रयोक्ता देवप्रसादमाकाङ्क्षते। किन्तु सहैव सओषधीनां रक्षा-करण्डानां, मन्त्राणां, अनुष्ठानानाञ्च माध्यमेन संप्राप्तां स्वकीयां शक्तिमपि न विस्मरति। विशुद्धयातुसूक्तानां संख्याऽथर्वणि नास्ति महती (अथर्वसंहिता—५-१६)। प्रयोक्ता प्रथमं मणिमौषधिं वा प्रसादयितुं

---

(१) "विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम्"।

(ऋ० वे० सं० ३.५३.१२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यतते येन तस्य कार्यसिद्धिः स्यादनन्तरं सः तां शक्तिं स्वस्मिन्नेव कल्पते (अथर्वसंहिता ४, १८, ३७; ८, ७; १६, २०) । कदाचिच्च यातुकर्तुर्मन्त्रोच्चारणम्, ओषधिश्च—इत्युभयोः साहाय्येन सिद्धिः सञ्जायते । अस्योदाहरणत्वेन प्रस्तूयतेऽयं मन्त्रः—

त्वमसि सहमानोऽहमस्मि सहस्वान् ।
उभौ सहस्वन्तौ भूत्वा सपत्नान्त्सहिषीवहि ॥
(अ० वे० सं० १६, ३२, ५)

अत्र दर्भमुद्दिश्य यातुकृत् कथयति—'त्वञ्च अहञ्चोभावपि शक्तिमन्तौ—अतः आवामुभौ मिलित्वा शत्रून् जयावः' ।

यद्यपि प्रस्तुतं प्रबन्धमनुरुध्य धर्मस्य यातोश्च मध्ये मया फ्रेजरमहाशयेनोपस्थापितो भेदोऽङ्गीकृतः । किन्तु वैदिकं वाङ्मयं विमृशतामयं भेदोऽकिञ्चित्करः । बलान्नियोजनम्, प्रसादनम्, आत्मसमर्पणम्—इति कोटीरुद्दिश्य यातोः धर्मस्य च मध्ये भेदः कर्त्तुं न शक्यते । अत्र पाश्चात्यविदुषो मैरेटमहाशयस्य विचारा विमृश्याः (थ्रेशोल्ड ऑफ़ रिलिजन—१६१४ पृ० ३०) । सः प्रतिपादयति यद् उभयोरपि धर्मयात्वोः कृते "अलौकिकत्वम्" आधारभूत-पदार्थः । एका भ्रष्टा, विकृतिं प्राप्ता स्तुतिः शापरूपेण तथा–एतद्विरुद्धं शापश्च क्रमशः स्तुति-रूपेण विपरिवर्तितो भवितुमर्हति । करणभूतसाधके चेतनत्वारोपः तथा तस्य देवत्वकरणः शनैः शनैः यथा सुस्पष्टो भवति, तस्य शापोऽपि स्वभावतः प्रार्थनायां परिणतो जायते । अग्रे पुनः सः कथयति—"प्रार्थना कदाचिच्छलछद्म भवितुं शक्नोति कदाचिच्च "छलछद्म" आच्छादयितुं ! शिष्टाचारविनयस्वरूपा", अतः बलान्नियोजनम्, प्रसादनञ्चाधारीकृत्य व्यावहारिकरूपेण धर्म-यात्वोर्मध्ये विभाजिका काचनरेखा कर्त्तुमशक्या ।

अस्माकं भारतीयानां कृते तु विषयोऽयमतीव कठिनः, यतो हि भारतीया हिन्दव बहोः प्राचीनकालाद् "आचारः परमो धर्मः" सद् आचरणं व्यवहारं धर्मं मन्वते, न तु स्तुत्युपासनादि-मात्रम् । वेदकालिका आर्या धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु त्रयाणां धर्मार्थकामानां कृते यागादीन् महान्ति साधनानि मन्यन्ते स्म । चतुर्थो मोक्षाख्यस्तु ज्ञानकाण्डस्योपनिषदो विषय आसीत् । अतो यदि वयं धर्मयात्वोर्मध्ये भेदं विधातुमित्थं स्वीकुर्मः यद् मैजिके दिव्याशक्तिः विधिकर्मणि (रिचुअल) तिष्ठति या कल्पितसाध्यसाधनयोर्मध्ये केनापि हेतुभूतेन सम्बन्धेन घटनाचक्रं प्रभावयितुं तथा परिवर्तयितुं प्रवर्वते तर्हि समस्तं वैदिकं वाङ्मयं केवलं यातुमयमेव जायते धर्मस्य च क्षेत्रम् अतीव सङ्कीर्णमिव भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

हिन्दुधर्मस्य सुदीर्घकालिके इतिहासे जनानामध्यात्मम्प्रति सामान्या अविच्छिन्ना च प्रवृत्तिः सहजोपलभ्या। प्रातःकालादारभ्य रात्रिं यावद् हिन्दोः प्रत्येकं कर्त्तव्यं तस्य धर्मानुरूपं निर्धारितं भवति। तस्याखिलानि धार्मिकानुष्ठानान्यपि नियतसंस्कारानुरूपमेव निश्चितानि पूर्णानि च जायन्ते। जन्मनः समारभ्य मृत्युपर्यन्तं काले काले विविधैः संस्कारैः सुसंस्कृतो हिन्दुः चिताधिरोहणमपि संस्कारपूर्वकं कुरुते। एतदतिरिक्तं वैदिकः सर्वोऽपि यज्ञियः संस्कारो नियत-क्रमेण मन्त्रैर्विधानैश्च क्रियते। पुनश्च यदि नाम कश्चन फ्रेजरमहाशयानुसारं सर्वान् वेदान् परीक्षेत चेत्तर्हि सः वैदिकस्य संस्कारस्य निखिलमप्युपकरणं यातुकमेव लभेत, परं वैदिक-कर्मकाण्ड-सामग्रीषु यत्र तत्र उदात्ता भावा विकीर्णा सन्ति। सर्वा वेदराशिः यातुरेवेति नास्ति सम्यङ् निर्धारणम्। अतो वयं धर्मयातोश्च मध्ये अन्यं भेदक-तत्त्वमन्वेष्यामः।

समग्रस्य वैदिकस्य वाङ्मयस्य सम्यगध्ययनेनेदं प्रतीयते यदस्माकं पुरातना महर्षयः स्वेषु देवेषु अगाधां श्रद्धां समधारयन्। आसीत्तेषामयं दृढो विश्वासो यत् कल्पतरुतुल्यास्तेषां देवास्तेषां सर्वमपि याचितं दातुं समर्थाः। तेषां शक्तिस्रोतःस्वरूपातु देवतासु तेषां दृढो विश्वास आसीत् क्रमशः प्रार्थनाया यागादेश्च सामर्थ्यं साफल्यं च दृष्ट्वा तेषामयं दृढो विश्वासोऽभूद् यत् यत्किमपि ते याचिष्यन्ते तत्सर्वं तेषां प्रार्थना यज्ञाश्च दातुं प्रभवन्ति। वैदिकोत्तरकालीनेषु धार्मिकेषु ग्रन्थेषु तेषु तेष्वर्थेषु नियतानां मन्त्राणां संस्काराणाञ्चोपदेशः समुपलभ्यते। येषां प्रयोगैः साधको निःसंशयम् उच्चैः स्थितामध्यात्मसम्बन्धिनीमभीष्टां सिद्धिं लभते, किम्पुनर्लौकिकीम्। तत्र खलु तान्त्रिकाणां प्रयोगाणां विषये तु विशेषेणेदं घटते यत्र सार्थकः प्रयोक्ता विमुक्ति-मपि लभते। तान्त्रिकेषु मन्त्रेषु प्रयोगेषु चापूर्वा काचन प्रभावशालिनी शक्तिर्विद्यते। एतदेव फ्रेजरमहाशयानां मते नियामिका शक्तिरिति उच्यते। किन्तु धार्मिकाणामेषां प्रयोगाणां विषये यातुका ऐन्द्रजालिकाः प्रयोगा इति कथनं भाषाया दुरुपयोगः। अतः भारतवर्षस्य गभीर-मध्यात्मं परिलक्ष्यैवास्माभिर्धर्मस्य यातोश्च विषये भेदो विचारणीयः। अत्र सप्रश्रयमहं प्रस्तौमि यत् पार्थिवानां पदार्थानां प्राप्तये विहिताः क्रिया यातुपदवाच्यास्तथा ध्यानयोगो भक्तियोगो ज्ञानयोगः। एवञ्चान्यान्यपि सर्वाणि तानि साधनानि येषामुद्देश्यं स्यादध्यात्मलाभस्तानि धर्मान्तर्भूतानि भवन्ति—वैशिष्ट्यमिदं परिलक्ष्य विविधैः संस्कारैः प्रयोगैश्च धमार्थकामानां प्राप्तये कृतः प्रयत्नो यातुस्तथा मोक्षावाप्तये विहितः प्रयत्नो धर्म इति।

श्रुतिसेवां चिरं कृत्वा कार्यमेतत् समापितम्।
प्रीयतामनया कृत्या भगवान् वेदपूरुषः॥ १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पठितग्रन्थानां सूची

१. ऋ० वे० सं० (मूल, शाकल) आर्य संहिता मंडल अजमेर १९५२
२. ऋ० वे० सायण भाष्य वैदिक संशोधन मंडल
३. ऋ० वे० सं० अंग्रेजी अनुवाद, ग्रिफिथ, तृतीय संस्करण १९२०
४. ऐ० ब्रा० (मूल) प्रकाशक एम० हॉग, भाग १, १८६३
५. शांखायन ब्राह्मण (मूल) आनन्दाश्रम, नं० ६५, १९११
६. ऐतरेय ब्राह्मण अंग्रेजी अनुवाद, हॉग, १९२२
७. ऋ० वे० ब्राह्मणाज़ अंग्रेजी अनुवाद, ए० बी० कीथ एच० ओ० एस०, भाग २५
८. ऐतरेय ब्राह्मण (सायण भाष्य) आनन्दाश्रम, नं० ३२
९. वाजसनेयी (माध्यन्दिन) संहिता (मूल) स्वाध्याय मंडल औंध, विक्रम संवत् १९८४
१०. वाजसनेयी संहिता अंग्रेजी अनुवाद, ग्रिफिथ, तृतीय संस्करण १९५७
११. शतपथ ब्राह्मण (माध्यन्दिन) मूल, अच्युतग्रन्थमाला, नं० १२
१२. श० ब्रा० अंग्रेजी अनुवाद जे० एगलिंग, एस० बी० ई०
१३. तैत्तिरीय संहिता मूल सायणभाष्य सहित, आनन्दाश्रम नं० ४२
१४. तै० सं० अंग्रेजी अनुवाद, ए० बी० कीथ, एच० ओ० एस०
१५. तै० ब्रा० मूल सायणभाष्य सहित, आनन्दाश्रम, नं० ३७
१६. साम-वेद-संहिता कौथुम (मूल) स्वाध्याय मंडल, पारडी
१७. सा० वे० सं० अंग्रेजी अनुवाद, ग्रिफिथ, तृ० सं०, १९२६
१८. ताण्ड्यमहाब्राह्मण मूल सायण भाष्य सहित, काशी संस्कृत, सीरीज, नं० १०५
१९. ताण्ड्य, म० ब्रा अंग्रेजी अनुवाद, डब्ल्यू कालान्द, एशियाटिक सोसाइटी ऑफ बंगाल, १९३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

(ख)

२०. सामविधान ब्राह्मण — मूल भाष्य और भूमिका सहित, ए० सी० बर्नेल, लंदन, १८७३

२१. षडविंश ब्राह्मण — विज्ञापन भाष्य सहित, प्रकाशक—एच० एफ० ईर्लसिंग, १९०८

२२. छान्दोग्य ब्राह्मण — दुर्गामोहन भट्टाचार्य, कलकत्ता संस्कृत कालेज, रिसर्च सीरीज़, नं० १, १९५८

२३. ऋग्विधान — (मूल) जगदीशलाल शास्त्री, लाहौर (अनुवाद जे० गोंडा, १९५१)

२४. अथर्ववेद संहिता — (मूल) स्वाध्याय मंडल, पारडी

२५. अ० वे० सं० — सायण भाष्य, एस० पी० पंडित, १८९५

२६. अ० वे० सं० — अंग्रेजी अनुवाद, हिटनी, एच० ओ० एस० लैनमन, भाग ७–८

२७. गोपथ ब्राह्मण — (मूल) डी० गास्त्र, १९१९

२८. कौ० सू०, प्रकाशक — ब्लूमफील्ड, जे० ए० ओ० एस० १४ दारिल, केशव टीका सहित

२९. वैतान सूत्र — (मूल) आर० गार्बे० लंदन, १८७८

३०. हिम्स आफ दि अथर्ववेद — एस० बी० ई० भाग० XLII १८९७

३१. बृहद्देवता — प्रकाशक ए० ए० मैक्डॉनेल

३२. अथर्ववेद और गोपथ ब्राह्मण — ब्लूमफील्डग्रुन्डरिस, १८९९

३३. ए हिस्ट्री ऑफ संस्कृत लिटरेचर — ए० ए० मैक्डानेल

३४. ए० हिस्ट्री ऑफ एन्शिएंट संस्कृत लिटरेचर — मैक्समूलर, १९२६

३५. ए० हिस्ट्री ऑफ इण्डियन लिटरेचर — विन्टरनित्ज़, भाग १, १९२७

३६. रिलिजन एण्ड फिलासफी आफ दि वेद — कीथ एच० ओ० एस० भाग ३१-३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

३७. गोल्डेन बाड	जे० जी० फ्रेजर, एब्रिज्ड एडिशन १९२३
३८. आफ्टर मैथ	फ्रेजर, सप्लीमेंटरी वाल्युम लन्दन, १९३६
३९. प्रिमिटिव रिलिजन	लोवी, १९२५
४०. दि थ्रे शोल्ड ऑफ रिलिजन	मारेट, द्वि० सं० १९१४
४१. रिकवरिंग दि एन्शिएंट मैजिक	मैक्स फ्रीउम लांग, लन्दन
४२. बिगनिंग्स ऑफ रिलिजन	ई० ओ० जेम्स
४३. मैजिक, साइन्स एण्ड रिलिजन	मालिनोव्स्की, १९४८
४४. मेडिसिन, मैजिक एण्ड रिलिजन	डब्ल्यू० एच० आर० रिवर्स १९२४
४५. प्रिमिटिव रिलिजन, मारेट	इन्साइक्लोपीडिया ब्रिटैनिका, भाग १९, पृ० १०३
४६. मैजिक एण्ड रिलिजन	एच० ए० रोज़ ई० आर० ई० भाग ८
४७. रिचुअल एण्ड बिलीफ	ई० एस० हार्टलैंड, कम्पैरेटिव रिलिजन ऑक्सफोर्ड यूनि० प्रेस १९१५
४८. मैजिक	ई० आर० ई० ८ पृ० २४५-३२१
४९. न्यू थ्योरीज़ ऐज़ टुं ब्रह्मन्	कीथ, जी० ए० झा कमेमोरेशन वाल्युम, पूना, १९३७ पृ० १९९-२१५
५०. प्रेसिडेन्शिएल एड्रेस	वेद सेक्शन, नवीं सभा ए० आई० ओ० सी०, पं० क्षेत्रेशचन्द्र चट्टोपाध्याय
५१. दि ओरिजिन्स ऑफ रिलिजन	कार्स्टेन, १९३५
५२. इन्साइ० ऑफ रिलिजन एण्ड रिलिजन्स	ई, रायस्टनपाइक
५३. मिथ, रिचुअल एण्ड रिलिजन	एण्ड्रिड लैंग, १८९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

५४. मैन इन दि प्रिमिटिव वर्ल्ड	ई० एडम्सन हॉयवेल, १९४९
५५. सेक्रिफाइस इन दि ऋग्वेद	पोद्दार, भारतीय विद्याभवन, १९५३
५६. अल्टिन्डिशे सॉबेराइ	कालान्द, १९०८
५७. चार्म्स एण्ड एम्यूलेट्स	ई० आर० ई० ३. पृ० ३९२
५८. चार्म्स एण्ड एम्यूलेट्स	(वेदिक) जी० एम० वोलिंग, ई० आर० ई० ३. पृ० ४६८
५९. दि फाउन्डेशन्स ऑफ अथर्वानिक रिलिजन	एन० जे० शेन्दे, बुलेटिन, डेकन कालेज, पूना, मार्च १९४९ भाग० ९, पृ० १९७-४१४
६०. वैदिक इन्डिया	लुइस रेनू, अनुवाद
६१. प्रेयर मारेट	इन्साइ ब्रिटे० भाग० १७, पृ० ४१९
६२. दि बैक ग्राउन्ड ऑफ टोटेमिज़्म	हाप्किन्स, जे० ए० ओ० एस० भाग ३८
६३. विचक्राफ्ट एण्ड ब्लैक मैजिक	मान्टेग समरस
६४. अंगिरस इन दि वैदिक लिटरेचर	एन० जे० शेन्दे ए० बी० ओ० आर आई०, ३१. १९५० पृ० १०८-३१
६५. इज़ अथर्ववेद ब्लैक मैजिक	वी० वेन्कटकृष्ण राव, बी० जे० बम्बई, जून १५, १९५८ पृ० २२-२५
६६. मैजिशिएन्स एन दि ऋग्वेद	एच० डी० वेलन्कर, एस० कमेमोरेशन वाल्युम १९५४, पृ० ८५-९२
६७. वैदिक आर्ट ऑफ हीलिंग	टी० ए० वी० दीक्षितर् बी० जे० २. (१) १४.८.१९५५. पृ० १११-११५
६८. वैदिक रिचुअल्स	वी० एम० आप्टे० सी० एच० आई०, भाग १ पृ० २३४
६९. हीलिंग बाइ इन्कैन्टेशन्स	वी० भट्टाचार्य, आर्यन पाथ, भाग २३, पृ० ६६-७१
७०. दि अथर्ववेद एण्ड न्याय-मंजरी आफ जयन्त भट्ट	एच० जी० नरहरि, इण्डियन कल्चर, भाग ६, १९३९-४०, पृ० ३६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

७१. ब्लैक मैजिक दि कर्स आन अफ्रीकाज़ फ्यूचर रावर्ट कालन	रीडर्स डाइजेस्ट, नवम्बर १९६१, पृ० ७१
७२. अथर्ववेदीय मन्त्र विद्या, प्रिय रत्न आर्ष	गुरुकुल स्वाध्याय मंजरी नं० १३
७३. दि मिरैकुलस एण्ड मिस्टीरिअस इन वैदिक लिटरेचर	वी० ए० परव, १९५२
७४. एन्टि क्विटी आफ तन्त्रिसिज्म चिताहरण चक्रवर्ती	इन्डिएन हिस्टारिकल क्वार्टरली, ६, पृ० ११४
७५. स्पिरिचुअल हीलिंग	परमानन्द स्वामी १९२३
७६. अथर्ववैदिक सिविलिजेशन	वी० डब्ल्यू करमवेलकर
७७. प्री हिस्टारिक एन्शिएन्ट एण्ड हिन्दू इन्डिया	आर० डी० बैनर्जी
७८. दि साइन्स आफ रिलिजन	डा० भगवानदास
७९. सम नोट्स आन दि रेन-चार्म्स	डब्ल्यू एन० ब्राउन, न्यू इन्डियन एन्टिक्वरी २, १९३९-१९४०, पृ० ११५-११९
८०. श्रौत-कोष	वैदिक संशोधन मंडल, इत्यादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

शब्दानां सङ्केताः

अध्यात्मज्ञान	थियोसोफी
अमूर्तजीव	स्पिरिचुअल बीइंग
अलौकिक, अतिमानुष	सुपरनेचुरल
अभिचार, माया	विचक्राफ्ट
इन्द्रजाल, यातु	मैजिक
ईश्वरसायुज्य, देवत्वप्राप्ति	डीफिकेशन
उक्थ	लिटँनी
उद्गाता पुरोधाः	प्रेइंग प्रीस्ट
का०	काण्ड
गोचरवस्तु	फेनॉमेना
चेतनधर्मारोप	परसॉनिफिकेशन
जगत्सम्बन्धि	कॉस्मिक
धर्म	रिलिजन
निर्वपण, वलि, हवि	आफरिंग, आब्लेशन, मेस
परम्परा प्राप्त कथा	ट्रेडिशन
पुरोनुवाक्या	इन्वाइटेटरी वर्स
पृ०	पृष्ठ
प्रभाव, शक्ति	एफिकैसी
बलान्नियोजन	कप्पल्शन
भाव-साहचर्य	एसोसियेशन ऑफ आइडियाज़
यातुविद्, यातुधान	मैजिशियन
यातुमंत्र, अभिचारमंत्र	इन्केन्टेशन, स्पेल
यातु न्याय	लॉ ऑफ मैजिक
याज्या	आफरिंग वर्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

विश्वदेवतावाद	पैन्थीइस्ट
शंसन	रेपिटीशन
सहानुभूतिक, संवेदनात्मक यातु	सिम्पैथेटिक मैजिक
साधर्म्यमूलक यातु	होमियोपैथिक मैजिक
संसर्गक, संस्पर्शज यातु	कन्टैजियस मैजिक
सहज, नैसर्गिक	इन्हेरेन्ट
सूत्र	हिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

अनुक्रमणिका

अभिचार, आभिचारिक—२०, ३३, ३४, ३५, ७७, ८७–८६, ६५, ६६, ११४–११६, १२१, १३१, १३७–१३६, १४२, १६१–१६६

अध्यात्म—३

ओषधि—१६, ७२

कारीरीष्टि—६७

कार्स्टेन—६

कौशिकसूत्र—१

कृत्या—१५–१७

छान्दोग्य उपनिषत्—१

जेम्स, ई. ओ.—६

जैमिनि—१३

धर्म—११, १३

पाइक, ई० रायस्टन—१०

पुष्टि, पौष्टिक—१, २, २२, २४–२८, ३७–४५, ५०–५८, ६१–७०, ७८–८४, ६०–६३, ६६–११० १२०–१२६, १३३–१३४, १३६, १४३, १४५, १४७–१५२, १६७, १६८।

फ्रेजर, जे. जी.—६, ७, ६

ब्लूमफील्ड—१, ४, १८

बृहद्देवता—२६ (४)

ब्रह्म, ब्रह्मन्—२, ३

मालिनोव्स्की—६

मूलक्रिया—१७

मैक्डानल—१,२, २७

यातुः—६, ११, १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यातुधान—१४, १५
राजकर्माणि—७०, ७१, ८५-८६, ९३, ९४, ११०-१११, १३०, १३९, १४५-१४६, १६८
रिवर्स, डब्ल्यू. एच—९
लांग, एण्ड्रिउ--१२
लांग, मैक्स फ्रीडम-१०, १, ११
विण्टरनिट्ज़्—२
वैशेषिकसूत्र—१३
शान्ति, शान्तिक—१, २, २३, २८-३३, ४६-५०, ५८-६०, ७३-७६, ८६, ९४, ११२-११४, १३०-१३२, १३४-१३७, १४०-१४१ १४४, १५८-१६१
सव—४
स्तम्भयजुर्हरण—८८-८९
स्वापनमन्त्र—२८
हॉग—३६
होम्योपैथिक, कण्टेजस्, सिम्पैथेटिक—७-८
त्रयो—१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

Acc. No. 5992
Class No 294.59215 Book No MAL
Author मालवीया माया
Title अथर्ववेद शान्ति पुष्टिकर्माणि

Due on	Borrower's Name	Returned on

294.59215
MAL
5992

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu